(1) న ప్రాప్తి వంతులో శ్రీవారసంన్నుధిలో వచ్చిన దక్షిణ కర్పూరారాత్తి పూజాంశం స్తానాంశం వారుచెరి సఖముగా అ భవించుకొని వారిభాగస్థా (the document ends abruptly).

*Note:* The original orthography of the documents is retained in the reproduction.

## THE WORKS OF VĀDI VĀGĪS'VARA

(*Mānamanohara and Nyāya Lakṣmī Vilāsa*)

BY DR. V. RAGHAVAN, M.A., PH.D.

IN his Introduction to GOS edition of the Tarkasaṁgraha of Ānandajñāna, T.M. Tripathi briefly described in the midst of the authors cited by S'āriṅgadhara, the Vais'eṣika writer Vādi Vāgīs'vara, author of the Mānamanohara (Intro. p. xviii, GOS. III). Ānandānubhava, the Advaitin, severely handles Vādi Vāgīs'vara, referred to usually as Mānamanoharakāra, in his Padārthatattvanirṇaya and Nyāyaratnadīpāvali. Subsequent to Ānandānubhava, Citsukha and his commentator, Pratyaksvarūpa, make many references to the Mānamanoharakāra.[1]

Mr. Tripathi mentioned only one manuscript of the Mānamanohara, the one at the S'rīnāthaji's temple at Nāthadvāra. Recently Dr. C. Kunhan Raja told me that there was a manuscript of it in the State Library at Bikaner and on my expressing a desire to get a transcript, kindly secured one for examination.

The Mānamanohara is rather a short work. The MS. is complete. There, however, seem to be small gaps. It is a Vais'eṣika work dealing with the seven Padārthas, giving in

[1] See JOR, Madras, XIII, pp. 240-263, E. P. Radhakrishnan's collection of these references to Mānamanohara.

each of its seven sections a number of Anumānas in support of the Vais'eṣika categories and their definitions, as against their critics, the Mīmāmsakas and the Advaitins in the main. The Saugata is once or twice taken note of and towards the end, there is also a refutation of the Pradhāna of the Sāṁkhyas (p. 151, Dr. C. K. Raja's Transcript).

The only colophons in the work refer to the sections as marked by each Padārtha :

p. 58. निरूपितो द्रव्यपदार्थ एष नवप्रकारो मुदमातनोतु ।
नवात्मकस्य त्रिदशाधिपस्य त्रिलोकपूज्यत्रिपुरान्तकस्य ॥

इति मानमनोहरे द्रव्यपदार्थः ।

p. 121. इति वागीश्वरकृते मानमनोहरे गुणपदार्थः ।

p. 129. इति वागीश्वरकृते मानमनोहरे कर्मपदार्थः ।

p. 139. इति वागीश्वरकृते मानमनोहरे सामान्यपदार्थः ।

There seems to be a gap in the portion dealing with Vis'eṣa.

p. 144. इति समवायपदार्थः ।

p. 146. The portion dealing with Abhāva ends towards the end of this page, but the colophon is missing.

After this, Vāgīs'vara refutes the possibility of S'akti as a distinct Padārtha (शक्तिरपि पदार्थान्तरमस्ति चेत् etc. p. 146); p. 149 एतेन निशिष्टतापि निराकृता । p. 150 एतेन विषयविषयिभावोऽपि संबन्धो निरस्तः । p. 150 एवं सान्निध्यादयोऽपि निराकर्तव्याः ।

Then again, Sādṛs'ya as a Padārtha is refuted (p. 150—अस्तु तर्हि सादृश्यं पदार्थान्तरमिति चेत, न).

Then the Pradhāna of the Sāṁkhyas: p. 151 एवं प्रधानादयोऽपि निराकार्याः । The section closes on Pp. 154-5—इति न्यायेन न पदार्थान्तराणां संभवः ।



The last section of the work deals with Mokṣa according to the Vais'eṣika, and the Advaitic view is criticized here. The work comes to a close here on p. 157 : इति मानमनोहरः समाप्तः ।

In the earlier sections also, the categories proposed by others are refuted : p. 51, Under Dravya, Tamas as a distinct Dravya is refuted : ननु तमो नाम द्रव्यान्तरमस्ति, तदपि निरूपणीयमिति चेत्, न । Under the Guṇa Padārtha, in the section on Pramāṇas, additional Pramāṇas like Arthāpatti are refuted.

## QUOTATIONS FROM MĀNAMANOHARA

From a cursory perusal of the manuscript, I have been able to verify in the work the existence of some of the passages quoted by other writers. Thus taking the quotations in the order in which Mr. E.P. Radhakrishnan has collected them (see JOR, Madras, XIII, pp. 240-262) :

1. The Anumāna quoted in the Sarvadars'ana saṁgraha 'अनित्यः शब्दः, इन्द्रियविशेषगुणत्वात् चक्षूरूपवत् (see JOR, XIII, p. 240) is found on p. 125 of the manuscript of the Mānamanohara.

2. In the portion dealing with Tamas, the Mānamanohara quotes 'Nātha :' ननु तमो नाम द्रव्यान्तरमस्ति, तदपि निरूपणीयमिति चेत्, न । प्रमाणाभावात । 'नीलं तमः' इति प्रतीतिः प्रमाणमिति चेत्, न । नीलबुद्ध्यसिद्धेः । उक्तं च नाथेनापि 'अप्रतीत (तौ) चैव प्रतीतिभ्रयो (भ्रमो) द (ऽयं?) मन्दानाम' इति । कथं तर्हि नीलपदप्रयोग इति चेत्, सिताभावे उपचारात् । असितं नीलमिति लौकिकप्रयोगः । Pp. 51-52, M.M.

This passage has been quoted by Pratyaksvarūpa in his Nayanaprasādinī (p. 29) on the Citsukhī (see JOR, XIII, p. 242 where Mr. E. P. Radhakrishnan has identified the 'Nātha' as S'ālikanātha).

3. Nayanaprasādinī, p. 18 (JOR, XIII, p. 244): The Anumāna of Mānamanoharakāra 'ज्ञानं प्रत्यक्षवेद्यं, वस्तुत्वाद्, घटवत्' can be traced to p. 81 of the manuscript of the Mānamanohara; the text is not free from gaps here in the manuscript.

4. Nay. Pra. p. 21 (JOR, XIII, p. 245): the Anumāna 'विवादाध्यासितं बोधाधारजन्यम् etc.' can be found on pp. 28-29 of the manuscript of Mānamanohara.

5. Citsukhī, p. 22. (JOR, XIII, p. 245): 'न हि द्रष्टु: दृष्टे: विपरिलोपो विद्यते etc.' The passage is on pp. 33-34 of the manuscript of the Mānamanohara.

6. 'ज्ञानशब्दश्च ज्ञायतेऽस्मिन्निति अधिकरणवचन:' quoted in the Nay. Pra. p. 24, (JOR, XIII, p. 246) is on p. 42 of the manuscript of Mānamanohara.

7. Nay. Pra. p. 169 (JOR, XIII, Pp. 253-4): 'न च भेदानवस्था बाधिका . . . . न च अनिर्वचनीयत्वं भेदस्य, तत्र प्रमाणाभावात् ।' This is to be found in the manuscript of the Mānamanohara on pp. 35-36. There are slight differences in the words as they occur in the manuscript of the Mānamanohara; as for instance, compare the lines

सोऽयं पिण्याकयाचनार्थं गतस्य पिशाचिन: तैलंदातृत्वाभ्युपगम इव निर्मूल: । MS. of M.M.

सोऽयं पिण्याकयाचनार्थं गतस्य पाचिन: खारिकातैलदातृत्वाभ्युपगम इव ।
as quoted in the Nay. Pra.

### Quotations in Mānamanohara

There are only a few names quoted in the Mānamanohara:

p. 4. Bauddha.
p. 27. Bhāṣyakāra, also on pp. 102.



p. 27, Vyomas'iva.
p. 45. Vārttikakāramis'ra (two Anuṣṭubhs from Kumārila's S'lokavārttika, Citrākṣepavāda, S'ls. 40, 41).
p. 51. Nātha (S'ālikanātha).
p. 80. Prabhākara.
p. 98. Pras'astapāda.
p. 148. Prābhākaras and Bhāṭṭas.

### Personal Details about Vādi Vāgīs'vara

Like all classic Naiyāyikas and Vais'eṣikas, Vādi Vāgīs'vara is also a staunch S'aiva. This could be seen from the verse at the end of the Dravya section of the Mānamanohara quoted above. The s'loka at the end of the work also shows his S'aiva faith:

नमस्त्रिपथगाक्रान्तजटाजूटाय शंभवे ।
नमस्ते जगदुत्पत्तिस्थितिसंभवध्यायिने(?) ॥[1]

Besides, we also know from the work that he was the son of Vāgīs'varācārya. We find in the beginning of the work:

वागीश्वराचार्यसुतेन वादिवागीश्वरेण क्रियते गभी(र:) ।
क-नुगर्जत्प्रतिवादिगर्वप्रशान्तये मानमनोहरोऽयम् ॥
p. 1 of the manuscript of M.M.

Both father and son seem to have been known only by their title, and that an identical one.

### Probable Date of Vādi Vāgīs'vara

As has been pointed out by Mr. E. P. Radhakrishnan, we have, for the present, to content ourselves with the dates of

[1] Ānandānubhava's dig at him as a 'Vāmamatānusārin' may refer to his Pās'upata faith.

S'ālikanātha and Ānandānubhava as the now known limits of the date of Vādi Vāgīs'vara, C. 750 and C. 1100 A.D.

## NYĀYA LAKṢMĪ VILĀSA, ANOTHER WORK OF VĀDI VĀGĪS'VARA

Meagre though the references to other works are in the Mānamanohara, they are yet valuable in two cases for informing us about another work of Vādi Vāgīs'vara, a work of a similar nature, but perhaps of larger extent, on Nyāya, called the Nyāyalakṣmīvilāsa.

1. Pp. 49-50 मनसः सर्वगतत्वाभ्युपगमे कालातिरिक्तत्वस्य साधयितुमशक्यत्वेन धार्मिक(धर्मि)ग्राहकप्रमाणविरोधाश्रयासिद्धिसमाक्रान्तत्वादिति **न्यायलक्ष्मीविलासे** विस्तृतमस्माभिः ।

p. 114 :—स्मर्यमाणेऽपि देवकुले देवदत्ताभावसंविदोऽभ्युपगमात् । विस्तृतं **न्यायलक्ष्मीविलास** इत्युपरम्यते ।

No manuscript of this Nyāyalakṣmīvilāsa has yet been known, nor does this seem to be mentioned in any other work.



**नागरिकः**—किमिदं राजमन्दिरं तव धर्मशाला । अत्र हि—

नोंकारः पवते न गीतिरटति स्वाहेति न श्रूयते
न न्यायव्यवहारतारवचसः सङ्घीभवन्ति द्विजाः ।
नात्युच्चैः पृषदाज्यहोमसुरभिर्धूम्या जरीजृम्भते
मुक्त्वा पञ्चजनाः स्वपन्ति परितो न स्त्री कुमारो न च ॥ ३ ॥

पाठान्तरम् ।) यत्र धर्मकार्याणि प्रचलन्ति अथवा यात्रिकाणां तादात्विकनिवाससौकर्यादिकमस्ति सा धर्मशाला । किमिदमिति । राजगृहं प्रविशन् धर्मशालां गच्छामीति किमसंबद्धं प्रलपसीति यावत् । तथा भ्रान्त्या समागत इति चेत्, तादृशभ्रमजनकेषु कार्येषु न किञ्चिदप्यस्मिन् सदने समवलोक्यत इति विशदयति अत्र हीति ।

**नोंकार** इति । ओंकारः-प्रणवोच्चारणम् । न पवते-न पुनाति । पूञ् शोधने इति धातोर्निष्पन्नोऽयं शब्दः । इदं गृहमिति शेषः । अत्र गीतिः-सामगानमिति यावत् । नाटति-न प्रचलति । (नोंकारः प्लवते न गाति नटति इति पाठो न साधुः ।) स्वाहेति तदाख्यो देवहविर्दानशब्दः । न श्रूयते । न्यायव्यवहारः-धर्मनीतिसंवादः, तस्मिन् तारं उच्चध्वनियुक्तं वचः येषां ते । अथ वा न्यायव्यवहारः-तर्कशास्त्रसंवादः, तस्मिन् तारवचसः, द्विजाः-विप्राः । न सङ्घीभवन्ति-गोष्ठीबन्धरूपेण न संमिलन्ति । पृषदाज्यं-दधिबिन्दुमिश्रितं घृतम् । तस्य होमः, तेन सुरभिः-शोभनगन्धविशिष्टा । "पृषदाज्यं सदध्याज्ये" इत्यमरः । "तस्माद्यज्ञात् सर्वहुतः संभृतं पृषदाज्यम" इति हूयमानयज्ञाग्नेः पृषदाज्येन संभृतत्वं श्रुतिसंप्रतिपन्नम् । तादृशी धूम्या धूमसंहतिः । अत्युच्चैः-अत्युन्नतत्वेन । नोज्जृम्भते-नभस उपरि नोद्गच्छति । पञ्चजनाः-मनुजाः । भुक्त्वा । यात्रामाचरतां जनानां धर्मशालासु भोजनदानं सामान्यतः क्रियते । परितः-समन्ततः । न स्वपन्ति-न निद्रामाचरन्ति । तथा स्त्री च, कुमारः-बालकश्च । न स्वपितीति योज्यम् । न च स्त्रियः न वा बालकाश्च भुक्त्वात्र स्वपन्तीति भावः ।

**पुरुषः**—अस्त्विदं राजमन्दिरं तथापि सुप्रवेशमस्मादृशामिति श्रुतमस्ति ।

**नागरिकः**—सुप्रवेशमिति कस्मात् त्वया श्रुतम् ।

**पुरुषः**—आर्यमिश्रेभ्य एव ।

**नागरिकः**—हुम्, किमस्माभिरिदं कथितम् ।

**पुरुषः**—नहि नहि, अन्यजनैः ।

**नागरिकः**—कैस्ते कथितम् । यदिदं परिचितजनस्यापि राजशासनमन्तरेण दुष्प्रवेशम्, किं पुनरपरिचितस्य ते ।

**किङ्करः**—विसंस्थुलेवास्य वचनव्यक्तिः । गृहीत इव चोरस्तरलतारकविलोचनः पश्यन्नयं वक्तुं न शक्तः प्रत्युत्तरम् । ततश्चार इव लक्ष्यते ।

धर्मशालासु प्राक्कालिकासु वेदाध्ययनादीनि विविधानि कर्माणि सामान्यतः प्रवर्तेरन्; तेषु न ह्येकमपि गृहेऽस्मिन् प्रवर्तमानं प्रदृश्यते; सत्येवं कथं ते धर्मशालाभ्रान्तिरत्र समुत्पन्नेति पुरुषमनुयुङ्क्ते नागरिकः ॥ ३ ॥

अस्त्विति । सुप्रवेशं-सर्वेषामपि निराक्षेपं यथा तथा प्रवेशार्हम् । श्रुतमस्ति-आकर्णितमित्यर्थः । आर्यमिश्रेभ्यः-सज्जनेभ्य एव; अन्यत्र युष्मभ्यमेव इति च हुम इति साक्षेपपरिप्रश्ने । (हुम् इति स्थाने हन्त इति पाठान्तरम् ।) आर्यमिश्रेभ्य इत्यस्य युष्मभ्यमित्यर्थं मनसि निधाय किमस्माभिरिदं कथितमिति नागरिक आक्षिपति । तादृशेनैवाशयेन शाकुन्तले "ननु आर्यमिश्रैः प्रथममेवाज्ञप्तम्" इति प्रयुक्तमास्ते । "आर्यमिश्रान् विज्ञापयामि" इति विक्रमोर्वशीयेऽपि ।

नहीति । नहि नहि-युष्माभिर्नैव कथितमित्यर्थः । कैस्ते इति । (कैरिति स्थाने कैरन्यजनैरिति पाठान्तरम् ।) राजशासनं-राजाज्ञा । राजगृहे राज्ञ आज्ञां विना न कस्यचिदपि प्रवेशः सुकरः; विशिष्य विद्वेषिजनैः समन्तात् नगराक्रमणादिरूपे समुपनते सङ्कटे संप्रति स सुतरामपरिचितस्य दुष्कर इति भावः । विसंस्थुलेति । वचनस्य-भाषणस्य, व्यक्तिः-स्वरूपम्; भाषणरीतिरिति यावत् ।



**नागरिकः**—तर्हि शिक्षयतु भवानिमम् ।

**किङ्करः**—अरे, कथय तथ्यम् । मृषावादिनस्तव वैदिकता राजशासनस्य न प्रतिरोधिनी । (इति कशामुद्यच्छति ।)

**पुरुषः**—मा ताडय । तथ्यं वदामि ।

**नागरिकः**—यदि तथ्यं वदसि तदा विज्ञानमन्त्रिणं दर्शयित्वा संभावयिष्यामि ।

**किङ्करः**—प्रतीहार्या धारणया सह प्रासादमधिरूढो मन्त्री । तत्संनिधौ त्वमपि नेष्यसे ।

**पुरुषः**—(स्वगतम्) तथा चेन्मम दुर्लभमेव जीवितम् । (प्रकाशम्, भीतिमभिनीय) अभयं मे दीयताम् यदि तथ्यमेव श्रोतव्यम् । (इति प्रणमति ।)

**नागरिकः**—दत्ताभयोऽसि । कथयात्मानम् ।

**पुरुषः**—(उत्थाय प्राञ्जलिः) हृद्रुदोऽस्मि । विसृज मां दायया ।

**नागरिकः**—चार एवायम्, वैदिकवेषमवलम्ब्यागतो दत्ताभयश्च ।

विसंस्थुलेव-असंबद्धेव । किमप्यसंबद्धं प्रलपतीवेति यावत् । मध्ये मध्ये प्रतिहतेव इति वा । चोरस्य गृहीतस्य तरलतारकविलोकनत्वमपि सहजमेव । (तरलतारकविलोचनं इति क्रियाविशेषणत्वेनापि पाठान्तरमस्ति ।) चारः-गूढपुरुषः । तर्हीति । चारपुरुष इति यद्यवगतं तर्हि यथानीति शिक्षामर्हत्ययमिति भावः । वैदिकता-शुद्धविप्रस्येव वैदिकवेषधारणम् । मृषावादिनः-असत्यवादिनः । तव । राजशासनस्य-राजदण्डस्येत्यर्थः । न प्रतिरोधिनी-न विरोधिनी । मृषावादिन इति दण्डस्य हेतुः । यद्यपि त्वं वैदिकब्राह्मणवेषं धत्से तथापि "अदण्ड्यत्वेऽपि विप्राणां युक्तया दण्डनिपातनम्" इति प्रमाणानुरोधेन मृषावादित्वात् दण्ड्य एव त्वमिति

**किङ्करः**—अतः किं कर्तव्यम् ।

**नागरिकः**—'श्रुतमिहत्यं राजकार्यं कस्मैचिदपि न कथय' इति शपथं गृहीत्वा पुराद्बहिर्विसृज्यताम् । अथवा किमनेन वराकेण कथनीयम् । दत्ताभयोऽयमिति मन्त्रिणे निवेद्य कथञ्चिन्मोचयितव्यः ।

**किङ्करः**—तथा करोमि । (इति निष्कान्तः ।)

(नेपथ्ये कुक्कुटध्वनिः ।)

**नागरिकः**—(आकर्ण्य) कथं रजनीविरामः ।

(पुनर्नेपथ्ये)

**वैतालिकः**—

पत्यावस्तं व्रजति विगलच्चञ्चरीकाञ्जनाश्रुं
त्रासान्मीलद्दलदृशमितो रागमर्कः करेण ।
द्रागालिङ्गेदपि कुमुदिनीमित्यपन्यायशङ्की
कूकूशब्दं विसृजति जवात् कुक्कुटः पूर्वमेव ॥ ४ ॥

तात्पर्यम् । दत्ताभयः- अभयदानेन कशाभिघातादिदण्डनेभ्यो रक्षितोऽसीति भावः । कथयात्मानं-कस्त्वमिति ब्रूहि । (कस्त्वं कथयेति पाठान्तरम् ।) अतः-दत्ताभयत्वहेतोः । (अत इति स्थाने तर्हीति पाठान्तरम् ।) श्रुतमिति । (श्रुतमिहत्यमिति वाक्यस्य स्थाने 'सर्वमिदं राजकार्यं त्वया कस्मैचिदपि न कथनीयम्' इति पाठान्तरमस्ति ।) किमनेन वराकेण कथनीयं-क्षुद्रेणामुना शपथरूपेण किं वक्तव्यम् । मन्त्रिणे निवेद्य-सर्वथा प्रभवते सचिवाय विज्ञाप्य ।

**आकर्ण्येति** । रजनीविरामः-व्युष्टा निशा । **वैतालिक इति** । निशान्ते राज्ञां बोधकारकः स्तुतिपाठको वैतालिकः । विविधो मङ्गलगीतिवाद्यादिकृतस्तालशब्दः तेन व्यवहरतीति वैतालिक इति तस्य व्युत्पत्तिः । "वैतालिको बोधकरः" इत्यमरः । वैतालिकानां तत्तत्समयेषु बोधकरत्वस्तुतिपाठकत्वादीनि नियतानि कार्याणीति "वैतालिकाः स्फुटपदप्रकटार्थमुच्चैर्भोगावलीः कलगिरोऽवसरेषु पेठुः" इति पद्येन माघश्च वर्णयति । (स. ५.) ।

**पत्याविति** प्रभातकालं वर्णयति । पत्यौ-नायके, चन्द्रमसीति यावत् । अस्तं व्रजति सति-अस्तमिते सति; मृते सतीत्यपि गम्यते । विगलन्ति-परिस्रवन्ति, चञ्चरीकाः-भ्रमरा एव, अञ्जनाश्रूणि-अञ्जनमिश्रितानि नेत्राम्बूनि यस्यास्ताम् । कृष्णवर्णानां भ्रमराणां अञ्जनकलुषितनेत्राम्बुबिन्दुभिः सादृश्यमत्रोत्प्रेक्ष्यते । त्रासात्-वक्ष्यमाणहेतुजनितभयात् । मीलन्ति-निमीलनं प्राप्नुवन्ति, दलानि-कुसुमपत्राण्येव दृशः यस्यास्ताम् । तथाविधां कुमुदिनीं-कैरवणीन्; तन्नाम्नीं युवतिमपीति ध्वन्यते । अर्कः-सूर्यः; तदाख्यः कामुकश्चेति गम्यते । रागं-प्रातस्सन्ध्यासमुचितं आरुण्यम्; अन्यत्रानुरागं च । इतः प्राप्तः । करेण-किरणव्यूहेन; अन्यत्र हस्तेन । द्राक्-रागान्धत्वात् त्वरितमनालोच्यैव । अप्यालिङ्गेत्-अप्याश्लिष्येत् । अपीति शङ्कायाम् । इति अपन्यायशङ्की-नीतिविरुद्धः सङ्कटः समुपनमेदित्याशङ्कमान इत्यर्थः । कुक्कुटः । पूर्वमेव-तादृशधर्मविरुद्धस्य कार्यस्य संभवात् प्रागेव । 'प्रक्षालनाद्धि पङ्कस्य' इति नीत्या दोषोत्पत्तेः पूर्वमेव तत्परिहारोपायावलम्बनं समीचीनमिति मत्वेवेति भावः । जवात्-यावच्छक्यं झटित्येव । कूकूशब्दं-तद्विधं कुक्कुटस्य कण्ठस्वरम्; अन्यत्र तादृशम् आक्रोशशब्दम् । अन्याय्यदर्शनसमये कूकूशब्दोच्चारणं आक्रोशवशात् सहजमेव लोके । विसृजति-उच्चरति । अनेन वर्णनेन पौरकार्यान्निवृत्तमनोवृत्तेर्जीवराजस्य परमेश्वरध्यानावहितचित्तत्वम्, तत्समयमवलोक्य छिद्रान्वेषिणः शत्रुवर्गस्य रोगानीकरूपस्य जीवपुराक्रमणोद्यमः, तथा रोगानीकैर्भविष्यदभियोगस्य निवारणाय निपुणमतिना तत्पूर्वमेव समुचितोपायचिन्तनादिकं चेति वक्ष्यमाणः कथासन्दर्भः सूच्यते ॥ ४ ॥

**द्वितीयो वैतालिकः—**

राग मुखेन दरदर्शिततारकेण
मां व्यञ्जतीमपि समेत्य करेण गाढम् ।
आलिङ्गिता कुमुदिनीति रुषापराद्रिं
यातां निशां द्रुतमनुव्रजतीव चन्द्रः ॥ ५ ॥

चन्द्रास्तमयपूर्वकं सूर्योदयमभिवर्ण्य पुनः सूर्योदयपूर्वकं चन्द्रास्तमयं च वर्णयति **रागं मुखेनेति** । चन्द्रः पुरुषः । निशा चन्द्रानुरक्ता कामिनी । चन्द्रस्तु निशां अनादृत्य कुमिदिनीनाम्नीं वल्लभामपरां प्रीत्या परिष्वजते । तदसहमाना निशा पाश्चात्यपर्वतशिखरमारुह्य तिरोधत्ते । अनन्तरम् अनुतापात् भयाद्वा चन्द्रो द्रुतपदं तामेव निशामनुव्रजति । इत्युक्ते निशया सह चन्द्रोऽपि तदानीमन्तरधात् इति भावगर्भितं विषयं वर्णयति पद्यमिदम् । दरदर्शिते-ईषदुन्मीलिते, तारके-कनीनिके यस्मिंस्तेन । मुखेन-वदनेन । निशापक्षे दरदर्शिताः-ईषत्प्रकाशिताः, तारकाः-नक्षत्राणि यस्मिंस्तेन । मुखेन-निशामुखेन ; सायंसमयेनेति यावत् । सायन्तने तारकाणां दृश्यादृश्यत्वेन प्रायः समुद्भवात् तासां दरदर्शितत्वम् । रागं-अनुरागम् । निशापक्षे सन्ध्यारागमिति यावत् । व्यञ्जतीमपि-स्फुटं सूचयन्तीमपि । चन्द्रः-तदाख्यो नायकः, चन्द्रमाश्च । समेत्य-सम्यग्गत्वा ; सप्रेमबहुमानमभ्यत्येति भावः । कुमुदिनी-तदभिधा कामिनी ; कैरवणी च । करेण-हस्तेन ; किरणव्यूहेन च । गाढं-अशिथिलबन्धं यथा तथा । आलिङ्गिता-आश्लिष्टा । (निशामुखसमये निर्वृत्तस्य विषयस्य निशावसानावसरे वर्ण्यमानत्वात् 'आलिङ्गयते' इति दृश्यमानात् पाठान्तरादपि भूतार्थद्योतकः 'आलिङ्गिता' इति पाठः साधीयान् इति स एवास्माभिरादृतः ।) इति रुषा । अपराद्रिं-अस्तगिरिम् । यातां-अधिगताम् । निशां-तदाख्यां वनिताम् ; रात्रिं च । द्रुतं-उद्वेगोत्पन्नत्वरातिशयवशादित्यर्थः । अनुव्रजतीव-तामनुसृत्य धावतीवेति यावत् ॥ ५ ॥



अपि च—

प्रातर्जातमिति द्रुतं प्रशिथिलं बध्वा दुकूलं दृढं
धम्मिल्लं च्युतमाल्यमप्युपवनान्निर्गत्वरीरित्वरीः ।
आकृष्यांशुकपल्लवे कठिनयोरालिङ्ग्य वक्षोजयो-
राघ्रायाननपङ्कजे च कथमप्युज्झन्त्यहो कामिनः ॥ ६ ॥

**नागरिकः**—तदधुना राजकार्ये चावहितस्तिष्ठामि ।

(इति निष्क्रान्तः ।)

। **शुद्धविष्कम्भः** ।

**प्रातरिति** । प्रातर्जातं-उदयकालः संप्राप्त इति । प्रशिथिलं-रात्रौ यथेच्छविहारेण नीवीमोक्षादिना सुतरां विलुलितम् । दुकूलं-क्षौमम् । द्रुतं-त्वरितं यथा तथा । दृढं बध्वा । च्युतमाल्यं-पूर्वं निधुवनादिसंभ्रमवशात् विशिथिलं माल्यं यस्मात् तम् । धम्मिल्लं-केशपाशमपि । द्रुतं बध्वा । उपवनात्-क्रीडोद्यानात् । निर्गत्वरीः-बहिर्गन्तुं यतमानाः । 'गत्वरश्च' इति क्वरबन्तो निपातः ; 'टिड्ढाणञ्' इत्यादिना ततो ङीप् । इत्वरी-कुलटाः कामिनीः । कामिनः-तासु बद्धरागा विलासिनः । अंशुकपल्लवे-तासां अतिमृदुले दुकूलाञ्चल इति यावत् । आकृष्य-वाल्लभ्यवशात् बलवदादाय । कठिनयोः-तारुण्यवशाद्दृढयोः । वक्षोजयोः । आलिङ्ग्य । आननपङ्कजे-तासाम् अरविन्दसुन्दरे वदने च । आघ्राय-चुम्बनादिकं कृत्वा । कथमपि-सुतरामधिगतमनोवैक्लव्यं यथा तथेति भावः । उज्झन्ति-गृहगमनाय विसृजन्ति । अहो इति चित्तसन्तापे ॥ ६ ॥

**तदिति** । तत्-प्रभातप्रायत्वात् रजन्या इत्यर्थः । राजकार्ये-राजकीये तत्तत्कर्मणि । **शुद्धविष्कम्भ** इति पूर्वोक्तलक्षणविशिष्टं वस्तुसङ्घटनोपयोगिनम् अर्थोपक्षेपकं प्रस्तूय कविः कथान्तरमारभते ।

(ततः प्रविशति प्रासादाधिरूढः प्रतीहार्या धारणया दर्शितमार्गो मन्त्री ।)

**मन्त्री**—संप्रति हि—

सोपानानि हिरण्मयानि परितः प्रत्युप्तरत्नान्यहं
पादाभ्यां समतीत्य किङ्करगणालम्बी स्वयं पाणिना ।
भित्तिष्वालिखितैर्वृतं खगमृगस्त्रीपुंसवृक्षाचलै-
रारूक्षं निटिलाक्षशैलधवलं प्रासादमभ्रंलिहम् ॥ ७ ॥

(विचिन्त्य स्वगतम्) अहो दुरन्तता राजधर्माणाम् । तथा हि—

---

मन्त्री महाराजस्य सौधम् अनुप्रविशन् लौकिकन्यायमनुरुध्य तदेव वर्णयति **सोपानानीति** । अहम् । संप्रति हीति पूर्वोक्तौ शब्दौ इहानुषज्येते । पाणिना-स्वकीयेन हस्तेन । स्वयम् । किङ्करगणं-सेवकसमूहम् आलम्बत इति-किङ्करगणालम्बी । परितः-बहुत्र । प्रत्युप्तरत्नानि-विविधरत्नखचितानि । हिरण्मयानि-स्वर्णमयानि । हिरण्मयानीति हिरण्यस्य विकार इत्यर्थे दाण्डिनायनादिसूत्रेण निपातः । सोपानानि । पादाभ्यां समतीत्य-राज्यनिर्वहणभारेण दुर्भरेण समाकुलितचित्तत्वात् स्वपदाभ्यां सोपानैः संचरणमपि महते श्रमायेति सूचयति पादाभ्यामित्येतत् । भित्तिषु । आलिखितैः-चित्रे विन्यस्तैः । खग-मृग स्त्री-पुंस-वृक्षाचलैः-तद्रूपैश्चित्रैः । वृतं-व्याप्तम् । तथा निटिलाक्षस्य-शङ्करस्य, शैलः-कैलासपर्वतः, तद्वत् धवलं-रजतवदतीव शुक्लम् । अभ्रंलिहं-अभ्रंकषम्, अत्युन्नतमिति भावः । अभ्रं लेढीत्यभ्रंलिहः; 'वहाभ्रे लिह' इति खश्प्रत्ययः; 'अरुर्द्विषजन्तस्य मुमिति' मुमागमः । प्रासादं-महाराजस्य सौधम् । आरूक्षं-अधिरूढवानस्मि ॥ ७ ॥

**विचिन्त्येति** । राजधर्माणां-राज्ञा नियमेन निर्वर्तनीयानां कार्याणाम् । दुरन्तता-निरवधिकता । दुरन्तत्वमेव तथा हीति दृढीकृत्य विवृणोति ।



| स | रि | ग | म | प | ध | नि |
|---|---|---|---|---|---|---|
| १ | ० | ० | ० | ० | ० | ० |
| | १ | २ | ६ | २४ | १२० | ७२० |
| | | ४ | १२ | ४८ | २४० | १४४० |
| | | | १८ | ७२ | ३६० | २१६० |
| | | | | ९६ | ४८० | २८८० |
| | | | | | ६०० | ३६०० |
| | | | | | | ४३२० |

इति खण्डमेरुः

**स्वरान्मूलक्रमस्यान्त्यात्पूर्वं यावतिथः स्वरः ॥ ६६ ॥**
**उद्दिष्टान्त्यस्तावतिथे कोष्ठे ऽधो लोष्टकं क्षिपेत् ।**
**लोष्टचालनमन्त्यात्स्यात्त्यक्त्वा लब्धं क्रमो भवेत् ॥ ६७ ॥**
**लोष्टाक्रान्ताङ्कसंयोगादुद्दिष्टस्य मितिर्भवेत् ।**

षष्ट्यधिकान्येकविंशतिः शतानि । चतुर्थकोष्ठके चतुर्गुणान्यशीत्यधिकान्यष्टाविंशतिः शतानि । तदधः पञ्चमकोष्ठके पञ्चगुणानि षट्त्रिंशच्छतानि । अधः षष्ठकोष्ठे षड्गुणानि विंशत्यधिकानि त्रिचत्वारिंशच्छतानि । एवंविधो ऽयं खण्डमेरुर्ज्ञातव्यः ॥ ६५, ६५- ॥

(क०) अस्मिन्खण्डमेरावुद्दिष्टनष्टयोर्बोधोपायं दर्शयति—**स्वरान्नित्यादिना** । स्वरूपमुक्त्वा कतमो ऽयमिति संख्याविषयत्वेन यः पृच्छ्यते स उद्दिष्टस्वरूपत्वादुद्दिष्टसंज्ञकस्तानः । उद्दिष्टान्त्यः स्वरो मूलक्रमस्य मूर्च्छनाप्रथमस्वरमारभ्य प्रवृत्तस्योत्तरमन्द्रायां सरिगमेति चतुःस्वरक्रमस्य तावदन्त्यात्स्वरान्मध्यमात्पूर्वं पृष्ठतो मगसरीत्युद्दिष्टतानस्यान्त्य ऋषभो यावतिथ इति विचार्यमाणस्तृतीयो भवति । अधस्तावतिथे तृतीये कोष्ठे द्वादशाङ्काङ्किते 'लोष्टचालनमन्त्यात्स्यात्' इति नियमेनोर्ध्वाधःस्थितपङ्क्तिषु चतुर्थ-

पङ्क्तौ बिन्दुकोष्ठस्थितं लोष्टकं क्षिपेत्। अनन्तरं लब्धं कोष्ठस्थाङ्कप्रापकत्वेन चरितार्थमृषभं त्यक्त्वा शिष्टानां स्वराणां सगमेति क्रमो भवेत्। तदोद्दिष्टे ऽपि लब्धत्यागान्मगसेत्युद्दिष्टो भवेत्। पुनरप्युद्दिष्टान्त्यः षड्जः पूर्वोक्तरीत्या तृतीयो यतस्तेन तृतीयपङ्क्तिबिन्दुस्थितं लोष्टकमधस्तृतीये चतुरङ्काङ्किते क्षिपेत्। तदा षड्जे लब्धे तमपि त्यक्त्वा गमेति क्रमः स्यात्। मगेत्युद्दिष्टो ऽपि स्यात्। पुनरप्युद्दिष्टान्त्यस्य गांधारस्योक्तरीत्या द्वितीयत्वाद्द्वितीयपङ्क्तिबिन्दुस्थितं लोष्टकमधो द्वितीये कोष्ठ एकाङ्काङ्किते क्षिपेत्। ततो मूलक्रमोद्दिष्टयोरवशिष्टस्य मध्यमस्यैकत्वात्प्रथमपङ्क्तेरधः कोष्ठाभावाच्च मौलिकाङ्कस्थितो लोष्टो न चलति। यत्र पुनर्मूलक्रम उद्दिष्टताने च स्वराणामन्त्यत्वादिना साम्यं तत्रापि न लोष्टचालनम्। एवं च सति 'लोष्टाक्रान्ताङ्कसंयोगादुद्दिष्टस्य मितिर्भवेत्' इति प्रकृतस्य मगसरीत्यस्याष्टादशत्वं प्रमितं भवति। एवं सर्वतानेष्वपि द्रष्टव्यम् ॥ -६६—६७- ॥

(सु०) एवं नष्टोद्दिष्टपरिज्ञानोपायं खण्डमेरुमुक्त्वोद्दिष्टपरिज्ञानमाह— **स्वरादिति**। मूलक्रमस्यान्त्यात्स्वरादुद्दिष्टस्यान्त्यः स्वरः पूर्वं गणने सति यावतिथो यावत्संख्यापूरणस्तावतिथे तावत्संख्यापूरणे ऽधः कोष्ठके लोष्टकं क्षिपेत्स्थापयेत्। इदं लोष्टचालनं कस्मात्प्रभृति कर्तव्यमित्यपेक्षायामाह—**लोष्टचालनमन्त्यात्स्यादिति**। अन्त्यादिति ल्यब्लोपे पञ्चमी। अन्त्यमारभ्य लोष्टचालनं स्यात्। एवं लोष्टचालने कृते लब्धं लब्धसंज्ञकं स्वरं त्यक्त्वा लुप्त्वा तेन हीनः क्रमो भवेदिति कर्तव्य इत्यर्थः। तत्रापि क्रमे मूलक्रमस्यान्त्यादित्यादिपूर्वोक्तप्रकारः कर्तव्यः। एवं कृते येषु येष्वङ्केषु लोष्टकानि यान्ति तेषामङ्कानां संयोगादुद्दिष्टस्य मानं भवति। तत्र च त्रिस्वरकूटतानपरिज्ञाने त्रिकोष्ठक एव खण्डमेरुः। चतुःस्वरपरिज्ञाने चतुःकोष्ठकः। पञ्चस्वरपरिज्ञाने पञ्चकोष्ठकः। षट्स्वरपरिज्ञाने षट्कोष्ठकः। सप्तस्वरपरिज्ञाने सप्तकोष्ठक इति ज्ञातव्यम्।



स्वरप्रमाणान्येव लोष्टकानि देयानि। दृष्टान्तार्थमुद्दिष्टपरिज्ञानप्रकारो दर्श्यते। नष्टोद्दिष्टप्रश्ने सरिगमेति क्रमो लेख्यः। मगरिसेत्युद्दिष्टम्। तत्रोद्दिष्टस्यान्त्यः षड्जो मूलक्रमस्यान्त्यान्मध्यमात्पूर्वगणने सति चतुर्थः। तस्माच्चतुर्थकोष्ठकशून्यस्थं लोष्टकमधश्चतुर्थकोष्ठके ऽष्टादशाङ्कस्थाने क्षिपेत्। उद्दिष्टे मूलक्रमे च षड्जो लोप्यः। तत उद्दिष्टान्त्य ऋषभो मूलक्रमस्यान्त्यान्मध्यमात्तृतीयः। तस्मात्तृतीयकोष्ठशून्यस्थं लोष्टकमधस्तृतीयकोष्ठके चतुरङ्कस्थाने क्षिपेत्। ऋषभो लोप्यः। तत उद्दिष्टान्त्यो गांधारो मूलक्रमस्यान्त्यान्मध्यमाद् द्वितीयः। तस्माद् द्वितीयकोष्ठस्थं लोष्टकमधो द्वितीयकोष्ठक एकाङ्कस्थाने क्षिपेत्। तत उद्दिष्टान्त्यो मूलक्रमस्यान्त्यात्प्रथम एव। तत्र लोष्टाभावाच्चालनं नास्ति। एषामङ्कानां संयोगे सति चतुर्विंशतिसंख्या लभ्यते। तस्मान्मगरिसेति चतुर्विंशतितमो भेदः सिद्धो भवति। एवं सप्तस्वरप्रस्तारे मगसरिधनिपेति किंसंख्याको भेद इति पृच्छायां सरिगमपधनीति मूलक्रमः स्थापनीयः। उद्दिष्टान्त्यः पञ्चमो मूलक्रमस्यान्त्यान्निषादात्तृतीयः। ततश्च सप्तमपङ्क्तौ शून्यादधस्तृतीयकोष्ठके चत्वारिंशदुत्तरचतुर्दशशतस्थाने लोष्टकः स्थाप्यः। पञ्चम उभयत्रापि लोप्यः। तत उद्दिष्टान्त्यो निषादो मूलक्रमस्यान्त्यान्निषादात्प्रथम एव। ततश्चालनं नास्ति। षष्ठपङ्क्तौ शून्यस्थान एव लोष्टकावस्थितिः। तथैवोद्दिष्टे मूलक्रमे च निषादो लोप्यः। तत उद्दिष्टान्त्यो धैवतो मूलक्रमस्यान्त्याद्धैवतात्प्रथम एव। ततश्चालन नास्ति। ततश्च पञ्चमकोष्ठे शून्यस्थान एव लोष्टकावस्थितिः। मूलक्रम उद्दिष्टे च पूर्ववद्धैवतो लोप्यः। तत उद्दिष्टान्त्य ऋषभो मूलक्रमस्यान्त्यान्मध्यमात्तृतीयः। ततश्च चतुर्थपङ्क्तौ शून्याधस्तृतीयकोष्ठके द्वादशाङ्कस्थाने लोष्टकः स्थाप्यः। मूलक्रम उद्दिष्टे च ऋषभो लोप्यः। ततश्चोद्दिष्टान्त्यः षड्जो मूलक्रमस्यान्त्यान्मध्यमात्तृतीयः। ततस्तृतीयकोष्ठस्थचतुर्थपङ्क्तौ शून्यादधस्तृतीयकोष्ठके चतुरङ्कस्थाने स्थाप्यः। उद्दिष्टे मूलक्रमे च षड्जो लोप्यः। तत उद्दिष्टान्त्यो गांधारो मूलक्रमस्यान्त्यान्मध्यमाद् द्वितीयः। ततश्च द्वितीयपङ्क्तौ शून्यादध एकाङ्कस्थाने लोष्टकः स्थापनीयः। मूलक्रम उद्दिष्टे च गांधारो लोप्यः। ततश्च मध्यमस्यैक्याल्लोष्टचालनं नास्ति। लोष्टाक्रान्तानामङ्कानां संयोगे चाष्टापञ्चाशदधिकानि चतुर्दश शतानि भवन्ति। तावत्संख्याको मगसरिधनिपेत्येवं भेदो बोध्यः। एवमेव षट्स्वरादिष्वप्युद्दिष्टपरिज्ञानप्रकार ऊह्यः ॥ -६६—६७- ॥

**यैरङ्कैर्नष्टसंख्या स्यान्मौलैकाङ्कसमन्वितैः ॥ ६८ ॥**
**तेषु लोष्टं क्षिपेन्मूले[1] लोष्टस्थानमितं भवेत् ।**
**नष्टतानस्वरस्थानं ततो यावतिथे पदे ॥ ६९ ॥**

(क०) एतावतिथ इति संख्याविशेषमुक्त्वा किंरूप इति स्वरूपं विषयीकृत्य यः पृच्छ्यते सो ऽप्रतीयमानरूपत्वान्नष्ट इत्युच्यते । नष्टसंख्या नष्टतानसंख्या । उत्तरमन्द्रायां चतुःस्वरक्रमे तावदष्टादशस्तान इत्युक्त्वा मौलैकाङ्कसमन्वितैः, तिर्यक्पङ्क्तिष्वाद्या सप्तकोष्ठिका पङ्क्तिर्मूलम्, तत्र भवो मौलः, स चासावेकाङ्कश्च, तत्राद्यकोष्ठस्थित इति यावत्; तेन समन्वितैः; यैरङ्कैर्भिन्नपङ्क्तिकोष्ठस्थितैः, चतुर्थपङ्क्तौ द्वादशाङ्केन तृतीयपङ्क्तौ चतुरङ्केण द्वितीयपङ्क्तावेकाङ्केन चैतैर्मिलितैरष्टादशसंख्या स्यात्, तेष्वङ्केषु लोष्टं प्रत्येकं क्षिपेत् । नष्टतानस्वरस्थानं नष्टतानस्वरस्य प्रापकं स्थानम्, चालितलोष्टाक्रान्तकोष्ठ इत्यर्थः । मूले तिर्यगाद्यपङ्क्तौ, लोष्टस्थानमितम्, लोष्टस्थानं बिन्दुकोष्ठस्तेन मितम् । बिन्दुकोष्ठेन सह परिगणितमित्यर्थः । अन्यथा स्वकोष्ठकात्कोष्ठसंख्यागुणमित्यत्रोक्तनियमो ऽत्रापि प्रसरेदित्येवमुक्तम् । ततो ऽनन्तरम्, अधः क्रमाद्यावतिथे पदे लोष्टो ऽस्ति क्रमान्तिमस्वरात्पूर्वस्तावतिथः स्वरो भवेदिति । प्रकृते ऽष्टादशे ताने ऽन्त्यलोष्टस्य तृतीयकोष्ठस्थितत्वात्क्रमान्तिमस्वरात्पूर्वस्तृतीय ऋषभो नष्टतानान्तिमत्वेन लभ्यते । लब्धत्यागादि पूर्ववदित्यतिदेशः । तदुद्दिष्टोक्तप्रकारेण कर्तव्यमित्यर्थः । तथा च कृते सति, ऋषभं त्यक्त्वा सगमेति क्रमो भवति । तद्वदुपान्त्यलोष्टस्यापि तृतीयकोष्ठस्थितत्वात्क्रमान्तिमस्वरात्पूर्वस्तृतीयः षड्जो नष्टोपान्त्यत्वेन लभ्यते । ततो ऽपि गमेति क्रमो द्वितीयलोष्टस्य द्वितीयकोष्ठस्थितत्वात्क्रमान्तिमाद् द्वितीयो गांधारो नष्टद्वितीयत्वेन लभ्यते । ततः पारि-

[1] क्षिपेन्मौलं.



**अधःक्रमादस्ति लोष्टः स्वरस्तावतिथो भवेत् ।**
**क्रमान्तिमस्वरात्पूर्वो लब्धत्यागादि पूर्ववत् ॥ ७० ॥**

शेष्यान्मध्यमस्तानपूरकत्वेन नष्टादिमो लभ्यते । तदा मगसरीति नष्टतानरूपं स्यात् । किं च यत्र यत्रान्ते मध्ये वा लोष्टचालनं नास्ति तत्र तत्र मूलक्रमान्त्यादिः स्वरो नष्टो ऽपि तादृशो लभ्यत इत्यवगन्तव्यम् ॥-६८—७०॥

(सु०) नष्टपरिज्ञानप्रकारं कथयति—**यैरङ्कैरि**ति । नष्टसंख्या यैरङ्कैरेकीभूतैर्भवेत्प्रथमपङ्क्तिप्रथमकोष्ठस्थमौलैकाङ्कसहितैः, तेषु कोष्ठाङ्केषु लोष्टकं क्षिपेत् । मौलं सर्वासां पङ्क्तीनां शून्यसंयुक्तप्रथमकोष्ठस्थमिति लोष्टविशेषणम् । एकस्यां पङ्क्तौ कोष्ठद्वये लोष्टकं न स्थापयेदित्याह—**लोष्टस्थानमि**ति । नष्टतानस्वराणां स्थानं लोष्टस्थानमितं लोष्टकस्थानप्रमाणकम् । यावन्ति लोष्टस्थानानि तावन्त्येव स्वरस्थानानि । ततश्च प्रतिपङ्क्त्येकैकस्मिन्कोष्ठके लोष्टकं स्थापयित्वा प्रथमपङ्क्तिस्थैकाङ्केन समं नष्टसंख्या पूरणीया । एवं लोष्टकेषु स्थापितेषु किं वर्तत इत्यपेक्षायामाह—**तत** इति । ततो ऽनन्तरं यावतिथे पदे कोष्ठके ऽधःक्रमादधोगणने शून्यस्थानाल्लोष्टकं तिष्ठति क्रमस्यान्तिमस्वरात्तावत्संख्याकः स्वरो बोद्धव्यः । **लब्धत्यागादि पूर्ववदि**ति । यः स्वरो लब्धः स लोप्यः । आदिशब्देन सप्तस्वरनष्टविचारः सप्तकोष्ठपङ्क्तिषु, षट्स्वरनष्टविचारः षट्कोष्ठपङ्क्तिषु, पञ्चस्वरनष्टविचारः पञ्चकोष्ठपङ्क्तिष्वित्यादि बोद्धव्यम् । अयमत्र परिज्ञानक्रमः—सहस्रतमो भेदः सप्तस्वरप्रस्तारे कीदृगिति प्रश्ने, सप्तम्यां पङ्क्तौ शून्यादधो द्वितीयकोष्ठके सविंशतिकसप्तशतस्थाने लोष्टकः स्थाप्यः । षष्ठपङ्क्तौ शून्यादधस्तृतीयकोष्ठके चत्वारिंशदधिकशतद्वयस्थाने लोष्टकः स्थापनीयः । पञ्चमपङ्क्तौ शून्यादधो द्वितीयकोष्ठके चतुर्विंशत्यङ्कस्थाने लोष्टकं स्थापयेत् । चतुर्थपङ्क्तौ तृतीयकोष्ठके द्वादशाङ्कस्थाने लोष्टकं स्थापयेत् । तृतीयपङ्क्तौ शून्यादधो द्वितीयकोष्ठके द्व्यङ्कस्थाने लोष्टकं स्थापयेत् । द्वितीयपङ्क्तौ शून्यादधो द्वितीयकोष्ठक एकाङ्कस्थाने लोष्टकं स्थापयेत् । एतैरङ्कैर्मौलिकाङ्कसमन्वितैः सहस्रसंख्या पूर्यते । ततः सप्तमपङ्क्तौ द्वितीयकोष्ठके लोष्टकस्तिष्ठतीति मूलक्रमस्यान्त्यान्निषादाद् द्वितीयो

तानस्वरमितोर्ध्वाधःपङ्क्तिगान्त्याङ्कमिश्रणात् ।
एकस्वरादितानानां संख्या संजायते क्रमात् ॥ ७१ ॥
अथात्र शुद्धतानानां नामानि व्याहरामहे ।
अग्निष्टोमो ऽत्यग्निष्टोमो वाजपेयश्च षोडशी ॥ ७२ ॥
पुण्डरीको ऽश्वमेधश्च राजसूयस्ततः परः ।
इति स्युः षड्जहीनानां सप्त नामान्यनुक्रमात् ॥ ७३ ॥
स्विष्टकृद्बहुसौवर्णो गोसवश्च महाव्रतः ।
विश्वजिद्ब्रह्मयज्ञश्च प्राजापत्यस्तु सप्तमः ॥ ७४ ॥

धैवतो नष्टस्य सप्तमस्वरत्वेन लेख्यः । मूलक्रमे धैवतो लोप्यः । ततः षष्ठपङ्क्तौ तृतीयकोष्ठके लोष्टकस्तिष्ठतीति मूलक्रमस्यान्त्यान्निषादात्तृतीयो मध्यमो नष्टस्य षष्ठस्वरत्वेन लेख्यः । मूलक्रमे मध्यमो लोप्यः । ततः पञ्चमपङ्क्तौ लोष्टकस्य द्वितीयकोष्ठावस्थितत्वान्मूलक्रमान्त्यान्निषादाद् द्वितीयः पञ्चमो नष्टस्य पञ्चमस्वरत्वेन लेख्यः । मूलक्रमे पञ्चमो लोप्यः । ततश्चतुर्थपङ्क्तौ तृतीयकोष्ठके द्वादशाङ्कस्थाने लोष्टकस्तिष्ठतीति मूलक्रमस्यान्त्यान्निषादात्तृतीय ऋषभो नष्टस्य चतुर्थस्वरत्वेन लेख्यः । मूलक्रम ऋषभो लोप्यः । ततस्तृतीयपङ्क्तौ द्वितीयकोष्ठके लोष्टकावस्थानान्मूलक्रमस्यान्त्यान्निषादाद्गांधारो नष्टस्य तृतीयस्वरत्वेन लेख्यः । मूलक्रमे गांधारो लोप्यः । ततो द्वितीयपङ्क्तावपि द्वितीयकोष्ठके लोष्टकावस्थितेर्मूलक्रमस्यान्त्यान्निषादाद् द्वितीयः षड्ज एव नष्टतानद्वितीयत्वेन लेख्यः । मूलक्रमे षड्जो लोप्यः । ततश्चावशिष्टो निषादो नष्टस्याद्यस्वरत्वेन लेख्यः । एवं च निसगरिपमधेति सप्तस्वरेषु सहस्रतमो भेदो लभ्यते । एवं षट्स्वरादिषु ज्ञातव्यम् ॥ -६८–७० ॥

(क०) अत्र खण्डमेरावपि तानसंख्याज्ञानोपायमाह—**तानस्वरेति** । तानस्वरमितोर्ध्वाधःपङ्क्तिगान्त्याङ्कमिश्रणात् , तानस्यैकस्वरादिष्वन्यतमस्य स्वरा यावन्तस्तैर्मितास्तत्संख्यापरिच्छिन्नाः, तत्समसंख्याका इत्यर्थः ; या ऊर्ध्वाधःपङ्क्तयस्ता गच्छन्तीत्यूर्ध्वाधःपङ्क्तिगाः, त एवान्त्याङ्कास्तेषां यथा-



क्रमादृषभहीनानां तानानामभिधा इमाः ।
अश्वक्रान्तो रथक्रान्तो विष्णुक्रान्तस्ततः परः ॥ ७५ ॥
सूर्यक्रान्तो गजक्रान्तो वलभिन्नागपक्षकः ।
इति पञ्चमहीनानां संज्ञाः सप्त क्रमान्मताः ॥ ७६ ॥
चातुर्मास्यो ऽथ संस्थाऽऽख्यः शस्त्रश्चोक्थश्चतुर्थकः ।
सौत्रामणी तथा चित्रा सप्तमस्तूद्भिदाह्वयः ॥ ७७ ॥
संज्ञा निषादहीनानां षाडवानामिमाः क्रमात् ।

इति षाड्जग्रामिकाष्टाविंशतितानानामानि ।

सावित्री चार्धसावित्री सर्वतोभद्रसंज्ञकः ॥ ७८ ॥
आदित्यानामयनश्च गवामयननामकः ।
सर्पाणामयनः षष्ठः सप्तमः कौणपायनः ।
नामानि षड्जहीनानां तानानामिति मेनिरे ॥ ७९ ॥
अग्निचिद् द्वादशाहश्चोपांशुः सोमाभिधस्ततः ।
अश्वप्रतिग्रहो बर्हिरथाभ्युदयसंज्ञकः ॥ ८० ॥
ऋषभेण विहीनानामिति नामानि मन्वते ।
सर्वस्वदक्षिणो दीक्षा सोमाख्यः समिदाह्वयः ॥ ८१ ॥
स्वाहाकारस्तनूनपात्ततो गोदोहनो मतः ।
इति गांधारहीनानां क्रमात्संज्ञाः प्रचक्षते ॥ ८२ ॥

इति माध्यमग्रामिकैकविंशतिषाडवताननामानि ।

संभवं द्वित्र्यादीनां मिश्रणात् । एकस्वरादितानानां संख्या पूर्वोक्ता, एकस्वरस्यैको द्विस्वरस्य द्वौ त्रिस्वरस्य षट् चतुःस्वरस्य चतुर्विंशतिरित्यादिरूपा ।

**इडा पुरुषमेधश्च श्येनो वज्र इषुस्ततः ।**
**अङ्गिराः कङ्क इत्येताः सपहीनाभिधाः क्रमात् ॥ ८३ ॥**
**ज्योतिष्टोमस्ततो दर्शो नान्द्याख्यः पौर्णमासकः ।**
**अश्वप्रतिग्रहो रात्रिः सौभरः सप्तमः स्मृतः ॥ ८४ ॥**
**एता निषादगांधारहीनानामभिधाः क्रमात् ।**
**सौभाग्यकृच्च कारीरी शान्तिकृत्पुष्टिकृत्तथा ॥ ८५ ॥**
**वैनतेयोच्चाटनौ च वशीकरणसंज्ञकः ।**
**पञ्चमर्षभहीनानां तानानामभिधा इमाः ॥ ८६ ॥**

इति षाड्जग्रामिकैकविंशत्यौडुवताननामानि ।

**त्रैलोक्यमोहनो वीरः कंदर्पबलशातनः ॥ ८७ ॥**
**शङ्खचूडो गजच्छायो रौद्राख्यो विष्णुविक्रमः ।**
**तानानां रिधहीनानां नामान्येतान्यनुक्रमात् ॥ ८८ ॥**
**भैरवः कामदाख्यश्चावभृथोऽष्टकपालकः ।**
**स्विष्टकृच्च वषट्कारो मोक्षदः सप्तमो मतः ॥ ८९ ॥**
**संज्ञा निषादगांधारहीनानामिति संमताः ।**

इति माध्यमग्रामिकचतुर्दशौडुवताननामानि ।

क्रमात्, द्व्यङ्कमिश्रणे द्विस्वरतानसंख्या त्र्यङ्कमिश्रणे त्रिस्वरतानसंख्येत्यादिः क्रमस्तस्मात् । कूटतानोपयोगित्वेन खण्डमेरुं निरूप्य प्रसङ्गाच्छुद्धतानानामदृष्टफलसंबन्धं च कथयिष्यंस्तेषां यज्ञानामभिधेयत्वं वक्तुमुपक्रमते— **अथात्रेत्यादिना** । शुद्धतानानां यज्ञफलसंबन्धे किं प्रमाणमित्यत आह—



**यद्यज्ञनामा यस्तानस्तस्य तत्फलमिष्यते ॥ ९० ॥**
**गान्धर्वे मूर्च्छनास्तानाः श्रेयसे श्रुतिचोदिताः ।**
**गाने स्थानस्य लाभेन ते कूटाश्चोपयोगिनः ॥ ९१ ॥**

**गान्धर्वे** इति । गान्धर्वं वक्ष्यमाणलक्षणो गीतविशेषस्तत्र । **मूर्च्छनास्ताना** इति । तानाः शुद्धतानाः । ते च शुद्धा इति प्रकरणाल्लभ्यते । तत्साहचर्यान्मूर्च्छना अपि शुद्धा एव विवक्षिताः । श्रेयसे ऽदृष्टफलाय । **श्रुतिचोदिता** इति । श्रुतिशब्देन तदनुगृहीताः स्मृतयो ऽप्युपलक्ष्यन्ते ; ताभिश्चोदिताः । तद्यथा—

‘उत्तरमन्द्राऽनुगता गायेत्तिस्रो मुदा युक्तः ।
गांधारा रक्षोघ्नीत्यौद्गात्रे मूर्च्छना विहिताः ॥
आग्निष्टोमिकतानेन गीतं साम शृणोति यः ।
स सर्वपातकैर्मुक्तो लोकाञ्जयति दुर्जयान् ।
दक्षप्रोक्तं पठेद्यस्तु वर्णयञ्शुद्धषड्जया ।
प्रत्यहं संध्ययोः स्तोत्रं नाकलोकं स गच्छति ॥
आग्निष्टोमिकतानेन यैर्नरैः स्तूयते शिवः ।
ते भुक्त्वा विपुलान्भोगाञ्शिवसायुज्यमाप्नुयुः ॥’

इति । कूटतानानां तु केवलं दृष्टफलत्वेनोपयोगमाह—**गान** इति । गानं च वक्ष्यमाणलक्षणं तस्मिन् । स्थानस्य तत्तन्मूर्च्छनावशेन सारितानां स्वराणामाधारश्रुतेर्लाभेन परिज्ञानेन ॥ ७१–९१ ॥

(सु०) खण्डमेरुणैव लाघवेन संख्यापरिज्ञानमाह—**तानस्वरेति** । तानस्वरप्रमिता या ऊर्ध्वाधःपङ्क्तयः, तद्गता ये ऽन्त्याङ्काः, तेषां मिश्रणादैक्येनैकस्वरादितानानां संख्या संजायते । पङ्क्तिद्वयान्त्याङ्कमिश्रणाद् द्विस्वरसंख्या द्वौ । पङ्क्तित्रयान्त्याङ्कमिश्रणात्त्रिस्वरसंख्या षट् । पङ्क्तिचतुष्टयान्त्याङ्कमिश्रणाच्चतुःस्वरसंख्या चतुर्विंशतिः । पङ्क्तिपञ्चकान्त्याङ्कमिश्रणात्पञ्चस्वरसंख्या विंशत्युत्तरं शतम् । पङ्क्तिषट्कान्त्याङ्कमिश्रणात् षट्स्वरसंख्या सप्त शतानि विंशत्युत्तराणि । सर्वासामन्त्याङ्कमेलनेन सप्तस्वरसंख्या पञ्च सहस्राणि चत्वारिंशदुत्तराणि ॥ तानानां नामानि कथयितुं प्रतिजानीते—**अथात्रेति** । षाड्जग्रामिकषड्जहीनषाडवताननामानि कथयति—**अग्निष्टोम** इति । षाड्जग्रामिकर्षभहीनषाडवताननामानि कथयति—**स्विष्टकृ**दित्यादि । षाड्जग्रामिकपञ्चमहीनषाडवताननामानि कथयति—**अश्वक्रान्त** इति । षाड्जग्रामिकनिषादहीनषाडवताननामानि कथयति—**चातुर्मास्य** इति । इति षाड्जग्रामिकाष्टाविंशतिषाडवताननामानि ॥ माध्यमग्रामिकषड्जहीनषाडवताननामानि कथयति—**सावित्रीत्यादि** । माध्यमग्रामिकर्षभहीनषाडवताननामानि कथयति—**अग्निचि**दिति । माध्यमग्रामिकगांधारहीनषाडवताननामानि कथयति—**सर्वस्वदक्षिणे**त्यादि । इति माध्यमग्रामिकैकविंशतिषाडवताननामानि ॥ षाड्जग्रामिकषड्जपञ्चमहीनौडुवताननामानि कथयति—**इडा पुरुषमेधश्चे**त्यादि । षाड्जग्रामिकनिषादगांधारहीनौडुवताननामानि कथयति—**ज्योतिष्टोम** इत्यादि । षाड्जग्रामिकपञ्चमर्षभहीनौडुवताननामानि कथयति—**सौभाग्यकृ**दित्यादि । इति षाड्जग्रामिकैकविंशत्यौडुवताननामानि ॥ माध्यमग्रामिकधैवतर्षभहीनौडुवताननामानि कथयति—**त्रैलोक्यमोहन** इत्यादि । माध्यमग्रामिकनिषादगांधारहीनौडुवताननामानि कथयति—**भैरव** इति । इति माध्यमग्रामिकचतुर्दशौडुवताननामानि ॥ ताननामप्रयोजनमाह—**यज्ञे**ति । यस्य तानस्य यस्याग्निष्टोमादेर्नाम तस्य तानस्य सम्यक्प्रयोगे तस्य यज्ञस्य फलमिष्यते मन्यते पूर्वाचार्यैः । मूर्च्छनातानानां प्रयोजनमाह—**गान्धर्वे** इति । मूर्च्छनास्तानाश्च गान्धर्वे मार्गगाने श्रुतिचोदिताः श्रुत्या विहिताः । श्रेयसे ऽभ्युदयाय निःश्रेयसार्थम् । ततश्च शुद्धमूर्च्छनातानादिप्रयोगस्य धर्मत्वमपि सूच्यते, 'यतो ऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' इत्यङ्गीकारात् । **गान** इति । गाने देशीगाने ते शुद्धमूर्च्छनास्तानाः कूटतानाश्च स्थानस्य लाभेन रञ्जकस्थायविशेषलाभेन चोपयोगिनो



# अथ पञ्चमं साधारणप्रकरणम्

**साधारणं भवेद् द्वेधा स्वरजातिविशेषणात् ।**
**स्वरसाधारणं तत्र चतुर्धा परिकीर्तितम् ॥ १ ॥**
**काकल्यन्तरषड्जैश्च मध्यमेन विशेषणात् ।**
**साधारणः काकली हि भवेत्षड्जनिषादयोः ॥ २ ॥**
**साधारण्यमतस्तस्य यत्तत्साधारणं विदुः ।**

भवन्ति । अथ वा मन्द्रमध्यताराख्यस्थानप्राप्तय उपयोगिनो भवन्ति । संगीतसमयसारे ऽप्युक्तम्—'ननु तानानां यज्ञानां च कथमेकत्र व्यवहारः ? उच्यते—एकस्मिन्नपि तान उच्चारिते ऽग्निष्टोमादियागानामेकैकस्य फलोपलब्धेर्गायकानां यज्ञस्तानादेव सिध्यति' इति । अतो नासंगतम् ॥ ७१–९१ ॥

**इति प्रथमे स्वरगताध्याये चतुर्थं ग्राममूर्च्छनाक्रमशुद्धतानकूटतानप्रकरणम् ॥ ४ ॥**

---

(क०) गीते विकृतस्वरप्रयोगेण वैचित्रीं क्वचिद्गानसाम्यं च दर्शयितुं साधारणमवधारयति—**साधारणमित्यादिना** । **स्वरजातिविशेषणादिति** । स्वरसाधारणं जातिसाधारणमित्येवमित्यर्थः । तत्र तयोर्मध्ये स्वरसाधारणं चतुर्धा । काकल्यन्तरषड्जैश्च मध्यमेन विशेषणादिति । काकलिसाधारणमन्तरसाधारणं षड्जसाधारणं मध्यमसाधारणमित्येवमित्यर्थः ॥ अनेकाश्रयत्वेन लोकसिद्धं साधारणशब्दार्थं प्रकृते योजयति—**साधारणः काकलीत्यादिना** । हि यस्मात्कारणात्काकली विकृतश्चतुःश्रुतिको निषादः षड्जनिषादयोः शुद्धयोः साधारणो भवेत्तदुभयश्रुतिसंबन्धित्वेन, अतः कारणात्तस्य काकलिनो यत्साधारण्यं तत्साधारणं विदुः । तदेव साधारण्यं साधारणमिति पदेनापि विदुरित्यर्थः । धर्मपरत्वेन साधारणमिति नपुंसक-

**अन्तरस्यापि गमयोरेवं साधारणं मतम् ॥ ३ ॥**
**प्रयोज्यौ षड्जमुच्चार्य काकलीधैवतौ क्रमात् ।**
**एवं मध्यममुच्चार्य प्रयुञ्जीतान्तरर्षभौ ॥ ४ ॥**
**षड्जकाकलिनौ यद्वोच्चार्य षड्जं पुनर्व्रजेत् ।**
**तत्परान्यतमं चैवं मध्यमं चान्तरस्वरम् ॥ ५ ॥**
**प्रयुज्य मध्यमो ग्राह्यस्तत्परान्यतमो ऽथ वा ।**
**अल्पप्रयोगः सर्वत्र काकली चान्तरः स्वरः ॥ ६ ॥**

निर्देशः । अतः 'साधारणं भवेद्द्वेधा'इत्यादिषु साधारणपदस्य साधारण्यपदपर्यायत्वमवसेयं माधुर्ये मधुरमिति प्रयोगवत् ॥ १–२- ॥

(सु०) इदानीं साधारणलक्षणं कथयति—**साधारणमिति** । तत्र स्वरजात्यन्यतरत्वमेव साधारणसामान्यलक्षणमिति मन्वानो विशेषणद्वयमेव विभज्य निरूपयति—साधारणं द्वेधा द्विप्रकारं भवेत्स्वरजात्योर्विशेषणात् । ततश्चैवं स्वरसाधारणमेकं जातिसाधारणमिति । तत्र स्वरसाधारणस्य भेदानाह—**स्वरसाधारणमिति** । स्वरसाधारणं चतुर्धा चतुःप्रकारं काकलिसाधारणमन्तरसाधारणं षड्जसाधारणं मध्यमसाधारणं चेति । वक्ष्यमाणलक्षणस्य साधारण्यस्य कथं समानशब्दपर्यायशब्दवाच्यत्वम् ? अत आह—**साधारण** इति । काकली स्वरः षड्जनिषादयोः साधारणस्तुल्यावस्थितिर्भवति, निषादस्य षड्जस्य च श्रुतिद्वयग्रहणात् । अतः कारणात्तस्य काकलिन उभयोर्निषादषड्जयोर्यत्साधारण्यं तत्साधारणं विदुः संगीतज्ञाः । साधारणशब्दाद्भावे ष्यञ्प्रत्यये साधारणस्य भावः साधारण्यमिति ॥ १–२- ॥

(क०) **अन्तरस्यापीति** । अन्तरस्य विकृतत्वेन चतुःश्रुतिकस्य गांधारस्यापि, एवमुक्तप्रकारेणोभयाश्रयत्वेन गमयोः शुद्धयोः श्रुतिसंबन्धित्वेन साधारणं साधारण्यं मतमिष्टम् । स्वरसाधारणविशेषधर्मत्वेन काकल्य-



**निषादो यदि षड्जस्य श्रुतिमाद्यां समाश्रयेत् ।**
**ऋषभस्त्वन्तिमां प्रोक्तं षड्जसाधारणं तदा ॥ ७ ॥**
**मध्यमस्यापि गपयोरेवं साधारणं मतम् ।**
**साधारणं मध्यमस्य मध्यमग्रामगं ध्रुवम् ॥ ८ ॥**

न्तरयोरुपात्तयोस्तत्संबन्धवशादुद्देशक्रममुल्लङ्घ्यापि तयोः प्रयोगं दर्शयति—**प्रयोज्यावित्यादिना** । **काकलीधैवताविति** । अत्र काकलीति स्त्रीलिङ्गनिर्देशः । **तत्परान्यतममिति** । तस्मात्षड्जात्परेषु स्वरेष्वन्यतमम्, संनिहितः परो यदि लोप्यः स्यात्तदा तं विहाय तत्संनिहितमेव परमित्यर्थः । काकलिप्रयोगे ऽभिहितं प्रकारमन्तरप्रयोगे ऽप्यतिदिशति—**एवं मध्यममिति** ॥ -३—६ ॥

(सु०) काकल्युक्तं साधारणशब्दप्रवृत्तिप्रकारमन्तरे ऽप्यतिदिशति—**अन्तरस्यापीति** । अन्तरः स्वरो हि गांधारमध्यमयोः साधारणः, गांधारस्य मध्यमस्य च श्रुतिद्वयग्रहणात् । तस्यान्तरस्य गांधारमध्यमयोर्यत्साधारणत्वं तत्साधारणमित्यर्थः । काकल्यन्तरयोः प्रयोगनियममाह—**प्रयोज्याविति** । षड्जमुच्चार्य काकलिधैवतौ प्रयोक्तव्यौ । क्रमादित्यवरोहक्रमात् । ततश्च पूर्वं काकली पश्चाद्धैवतः प्रयोक्तव्यः । एवं मध्यममुच्चार्यान्तरर्षभाववरोहक्रमेण प्रयोक्तव्यौ । एतयोर्विकल्पेनान्यथाप्रयोगनियमं कथयति—**षड्जकाकलिनाविति** । षड्जं काकलिनं चोच्चार्य ततः पुनः षड्जं व्रजेदुच्चारयेत् । तत्परान्यतमं च, तस्मात्षड्जात्परे ये, ऋषभगांधारमध्यमपञ्चमधैवतास्तेष्वन्यतममेकमुच्चारयेत । एवं मध्यममन्तरस्वरं च प्रयोज्योच्चार्य पुनरपि मध्यमो ग्राह्यः । तस्मान्मध्यमात्परे ये पञ्चमधैवतनिषादषड्जर्षभास्तेष्वन्यतमश्च ग्राह्यः । **अल्पप्रयोग** इति । काकल्यन्तरः स्वरश्च सर्वत्र जातिरागादावल्पप्रयोगः ॥ -३–६ ॥

(क०) एवं काकलिसाधारणमन्तरसाधारणं च सप्रयोगमुक्त्वा षड्जमध्यमसाधारणे लक्षयति—**निषादो यदीत्यादिना** । स्वरसाधारण-

**साधारणे कैशिके ते केशाग्रवदणुत्वतः ।**
**ते एव कैश्चिदुच्येते ग्रामसाधारणे बुधैः ॥ ९ ॥**
**एकग्रामोद्भवास्वेकांशासु जातिषु यद्भवेत् ।**
**समानं गानमार्यास्तज्जातिसाधारणं जगुः ॥ १० ॥**
**जातिसाधारणं केचिद्रागानेव प्रचक्षते ।**

चतुष्टयस्यापि ग्रामद्वये प्रसक्तौ विकृतत्वे ऽपि स्वराणां पञ्चश्रुतित्वमनिष्टमिति मत्वा मध्यमसाधारणं मध्यम एव नियमयति—**साधारणं मध्यमस्येति** ॥ षड्जमध्यमसाधारणयोर्व्यपदेशान्तरे सप्रवृत्तिनिमित्तं दर्शयति—**साधारणे** इति । ते साधारणे षड्जमध्यमसाधारणे । केशाग्रवदणुत्वतः, चतुःश्रुतिकस्य च्युतत्वेन द्विश्रुतिकत्वापत्त्या ऽल्पत्वात्कैशिके इत्युच्येते । ते एव षड्जमध्यमसाधारणे एव ग्रामप्रतिनियतत्वात्कैश्चिद् बुधैर्ग्रामसाधारणे इत्युच्येते इत्यर्थः ॥ जातिसाधारणं लक्षयति—**एकग्रामेति** । **जातिसाधारणमिति** । जात्योर्वा जातिषु वा वर्णसाम्येन गानस्य यत्साधारणं तदेव तथोक्तम् ॥ ७—१०- ॥

(सु०) काकलिसाधारणलक्षणमन्तरसाधारणलक्षणं च काकल्यन्तरस्वरलक्षणेनैवोक्तं मूर्च्छनाप्रकरणे 'श्रुतिद्वयं चेत्षड्जस्य' इत्यादिना । अतः षड्जसाधारणं मध्यमसाधारणं च लक्षयति—**निषाद** इति । निषादो यदि षड्जस्याद्यां श्रुतिं समाश्रयति, ऋषभश्चान्तिमां श्रुतिं तदा षड्जसाधारणम् । एवं गांधारो यदा मध्यमस्याद्यां श्रुतिं समाश्रयति पञ्चमश्चान्तिमां श्रुतिं तदा मध्यमसाधारणम् । षड्जसाधारणे निषादस्त्रिश्रुतिर्ऋषभश्चतुःश्रुतिः । मध्यमसाधारणे गांधारस्त्रिश्रुतिः पञ्चमश्चतुःश्रुतिः ॥ ७, ७- ॥ साधारणे ग्रामयोर्नियमयति—**साधारणमिति** ।



## अथ षष्ठं वर्णालंकारप्रकरणम्

**गानक्रियोच्यते वर्णः स चतुर्धा निरूपितः ।**
**स्थाय्यारोह्यवरोही च संचारीत्यथ लक्षणम् ॥ १ ॥**
**स्थित्वा स्थित्वा प्रयोगः स्यादेकस्यैव स्वरस्य यः ।**
**स्थायी वर्णः स विज्ञेयः परावन्वर्थनामकौ ॥ २ ॥**
**एतत्संमिश्रणाद्वर्णः संचारी परिकीर्तितः ।**

मध्यमसाधारणं मध्यमग्राम एव । साधारणयोर्मध्ये मध्यमग्रामे मध्यमसाधारणमेव । ततश्च षड्जग्राम एव षड्जसाधारणमिति गम्यते । ते द्वे साधारणे कैशिके इत्युच्येते । केशाग्रवदणुत्वत इति कैशिकशब्दस्य प्रवृत्तिनिमित्तं दर्शितम् । ते एव षड्जमध्यमसाधारणे कैश्चिदाचार्यैर्ग्रामसाधारणे इत्युच्येते । जातिसाधारणं लक्षयति—एकग्रामेति । समानग्रामोद्भवास्वेकांशास्वरासु जातिषु यत्समानं गानं भवेत्तदार्या मान्या आचार्या भरतादयो जातिसाधारणमवादिषुः । मतभेदेनान्यथा जातिसाधारणं लक्षयति—जातीति । केचिद्रागा एव शुद्धकैशिकमध्यमादयो जातिसाधारणमित्याहुः ॥ ७–१०- ॥

**इति प्रथमे स्वरगताध्याये पञ्चमं साधारणप्रकरणम् ॥ ५ ॥**

(क०) जातिसाधारणनिरूपणे गानसंबन्धित्वेन प्रसक्तं वर्णं सप्रभेदं लक्षयति—**गानक्रियेति** । गानक्रियाया वर्णत्वं स्वरपदादेर्वर्णनाद्विस्तारकरणात् । **एकस्यैवेति** । एकैकस्येति वा । तत्रादौ 'सासासा रीरीरी' इत्येवमादिप्रयोगः । द्वितीये 'सारीगामा' इत्येवमादिरूपः । **परावन्वर्थनामकाविति** । परावारोह्यवरोहिणावन्वर्थनामकौ । 'सरिगमपधनि' इत्यारोहादारोही । 'निधपमगरिस' इत्यवरोहादवरोहीत्येवम् । एतत्संमिश्रणात्,

**विशिष्टं वर्णसंदर्भमलंकारं प्रचक्षते ॥ ३ ॥**

एतेषां स्थाय्यादीनां त्रयाणां वर्णानाम् ‘सारी सारीगा सनिधा सारीगा’ इत्येवं यथायोगं मिश्रणात्संचारी वर्णः परिकीर्तितः। यत्र गानक्रियायां यस्य वर्णस्य बाहुल्यं दृश्यते तत्र तेन व्यपदेशः कर्तव्य इति मन्तव्यम् ॥ १–२· ॥

(सु०) वर्णं लक्षयति—**गानक्रियेति**। स्वराणां वक्ष्यमाणप्रकारेण गानक्रिया गानकरणम्, उच्चारणमिति यावत्। सा वर्णशब्देनोच्यते। स च वर्णश्चतुर्धा भवति—स्थाय्यारोह्यवरोही संचारी चेति। तत्र स्थायिवर्णलक्षणमाह—**स्थित्वा स्थित्वेति**। यत्रैकस्यैव स्वरस्य स्थित्वा स्थित्वा विलम्ब्य विलम्ब्य प्रयोग उच्चारणं स स्थायिवर्णो विज्ञेयः। यथा षड्जस्य ‘सासासासा’, मध्यमस्य ‘मामामामा’ इति। परावारोहिवर्णावरोहिवर्णौ, अन्वर्थनामकौ, अर्थमनुगतमन्वर्थं नाम ययोस्तावन्वर्थनामकौ। नामार्थ एव तयोर्लक्षणम्—यत्र स्वराणामारोहः स आरोही वर्णः, यत्रावरोहः सोऽवरोही वर्ण इति। एतेषां त्रयाणां संमिश्रणात्परस्परलक्षणसंचरणात्संचारी वर्ण उक्तः। मतङ्गेन त्वेवं संचारिवर्णलक्षणमुक्तम्—

“यत्र ताने संचरन्ति स्वरा अन्त्यान्त्यसंहिताः।
एकैकशो द्विशो वा स संचारी वर्ण उच्यते ॥

यथा मालवकैशिके—‘सा सा स नि म म नि म प नि रि रि पा पनीपानिध’ एवमादि ॥” १–२· ॥

(क०) उक्तवर्णग्रथनविशेषरूपमलंकारं प्रतिवर्णं सविभागं लक्षयति—**विशिष्टं वर्णसंदर्भमित्यादिना**। वर्णसंदर्भोऽलंकार इत्येतावत्युक्ते वर्णविशेषे संचारिणि व्यभिचारः स्यात्; स मा भूदिति विशिष्टमिति विशेषणम्। वैशिष्ट्यं च नियतकलाऽऽदियुक्तत्वम्। इह प्रसन्नादिप्रभृतीनामलंकारत्वं गीतिरेतैरलंक्रियत इति करणव्युत्पत्त्या, यथा लोके हारादि-



अष्टावात्मगुणा अथ स ब्रह्मणः सायुज्यं सालोक्यं च गच्छति[1]” इति। एवं सति बाह्यद्रव्यार्जनवत् संप्रीणनेषु प्रधानतमानाममानित्वादिगुणानां सदाचार्यसेवा-सत्सम्भाषणादिभिर्ज्ञानवृद्धिहेतुभिः न्यायतः प्रवृत्तैः[2] सम्यगुपार्जनमपि पूर्वसिद्धपरिपूर्णबाह्यपूजोपकरणस्य उपादानकोटौ[3] निवेशनीयम्। बाह्यद्रव्याभाव इव गुणाभावेऽपि महाभारताद्युक्ताष्टादशचण्डालषड्वृषलसंज्ञितहेयगुणयोगेन अनन्तरभावीज्यानर्हत्वप्रसङ्गात्। अत एव हि तन्निर्बन्धः[4] क्रियते—“श्रुतादन्यत्र सन्तुष्टस्तत्रैव च कुतूहली” इति। तस्मात् समाराधनोपयुक्तं[5] बाह्यमान्तरं च सर्वं यथार्हमुपाददीत। इति व्याख्यातमुपादानम्।

सव्यं पादं प्रसार्य श्रितदुरितहरं दक्षिणं कुञ्चयित्वा
जानुन्याधाय सव्येतरभुजमपरं[6] नागभोगे निधाय।
पश्चाद्बाहुद्वयेन प्रतिभटशमने धारयन् शङ्खचक्रे
देवीभूषादिजुष्टो नवजलदनिभः पातु दिव्यः परो नः[7] ॥

[1] यस्य तु खलु इत्यारभ्य अनूद्यमानो गौतमसूत्रभागः क, ख, ङ, च, छ, झ कोशेषु न दृश्यते.

[2] प्रवृत्तैः इति पदं घ, ङ, छ कोशेष्वेव विद्यते.

[3] उपादानकाले—घ, ङ, च, छ.

[4] अत एव श्रुतिनिर्बन्धः—क, ग, च; अत एव हि श्रुतिनिर्बन्धः—ख; अत एव हि श्रुतेर्निर्बन्धः—ङ, छ.

[5] समाराधनोपकरणं—क, ख, ग, च, झ.

[6] सव्येतरमितरभुजं—क, ख, ग, च, झ.

[7] जुष्टो जनयतु जगतां शर्म वैकुण्ठनाथः इति सङ्कल्पसूर्योदये पाठः.

**इज्याव्याख्यानप्रतिज्ञा ।**

अथेदानीं मन्त्रसिद्धान्तोपास्यपररूपविषयां भोगार्चनमयीम् इज्यां भाष्यकारप्रणीतनित्यग्रन्थविवरणमुखेन व्याख्यास्यामः।

मन्त्रसिद्धान्ते परिवारभेदस्तु गुणीभूत[1]मूर्त्यन्तरयोर्वैकल्पिकः ।

तत्र प्रथममधिकारिविशेषे वृत्त-वर्तिष्यमाणयोः संगतिं दर्शयन् ,

"कर्मारम्भेण मन्त्रेण प्राप्तं कालमनुस्मरेत् ।
इज्यामेवाभिसन्दध्यात् सा योनिः सर्वकर्मणाम्" ॥

इति प्रशंसितम्, चिकीर्षितग्रन्थविषयभूतम्, अहोरात्रकृत्ये प्रधानांशं दर्शयति—'अथ परमैकान्तिनो भगवदाराधनप्रयोगं वक्ष्ये' इति[2] ।

**नित्यग्रन्थस्थस्य अथशब्दस्य विवरणम् ।**

अथशब्दस्य प्रसिद्धिप्रकर्षसिद्धानन्तर्ये संभवति, अर्थान्तरतात्पर्यपरिग्रहोऽनुपपन्न इति भाष्यादिषु स्थापितम् । अथ गद्यैः[3] यथावत् प्रपत्तिप्रतिपादनानन्तरम्, तत एव तन्निष्ठाधिकारिविशेषसिद्धिसमनन्तरं वा[4] । "यथावस्थितस्वरूप-रूप-गुण-विभूति-लीलोपकरणविस्तारमनुसन्धाय तमेव शरणमुपगच्छेदखिलेत्यादिना" इति वक्ष्यमाणानुसाराच्च, अत्र तथाविधशरणागतिविषयगद्यग्रन्थस्य[5] पूर्ववृत्तत्वं विवक्षितमिति ज्ञायते । न च तत्र 'अखिलजगदाधार' इत्यादिवक्ष्यमाणमात्रपङ्क्तिर्विवक्षिता । तस्याः प्रपत्तिकरणत्वादर्शनात्, यथावस्थितस्वरूप-रूप-गुण-विभूत्यादीनां च गद्य एव

[1] गुणभूत—ङ, च.
[2] वक्ष्य इत्यादि—क, ख, ग, च, झ.
[3] गद्ये—क, ख, ग, झ.
[4] वा शब्दः क, ख, ग, झ कोशेषु नास्ति.
[5] विषयग्रन्थस्य—क, च, झ.



प्रपञ्चनात्, "अनन्यशरणस्त्वत्पादारविन्दयुगलं शरणमहं प्रपद्ये" इति च तत्र कण्ठोक्तेः । तस्माद्यथोक्त एवात्र[1] अथशब्दार्थः ।

**परमैकान्तिशब्दार्थः ।**

परमश्चासौ एकान्तश्चेति परमैकान्तः । सोऽस्यास्तीति परमैकान्ती । एकत्र अन्तो निश्चयः प्राप्यतया प्रापकतया च । तदुभयं संभूय परमैकान्तः । परमश्चासौ एकान्ती च इति वा समासः । तत्राप्यनन्योपायत्वानन्यप्रयोजनत्वयोः समुच्चयात् पारम्यम् । अनन्योपायत्वं च अनन्यदेवताकत्वपर्यन्तम् । यथोक्तम्—

"चतुर्विधा मम जना भक्ता एव हि ते श्रुताः ।
तेषामेकान्तिनः श्रेष्ठास्ते चैवानन्यदेवताः ॥" इति ।

अनन्यप्रयोजनत्वं च आत्मानुभवानन्दनैरपेक्ष्यपर्यन्तम् । तदप्युक्तम्—

"ये तु शिष्टास्त्रयो भक्ताः फलकामा हि ते मताः ।
सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक् ॥" इति ।

एतेन तुल्यन्यायतया भगवदनुभवानन्देऽपि[2] फलित्वाभिप्रायो निरस्तः । मुक्तानन्दस्यापि सार्वभौमान्तःपुरशुकक्षीरास्वादनसुखवत् स्वतन्त्रेण परेणैव स्वप्रीत्यर्थमुपपादितत्वात् । एवंविधं च परमैकान्तित्वं मन्त्रसिद्धान्तादिनिष्ठेष्वपि संभवतीति पूर्वाधिकारे स्थापितम् । दृश्यते च सदाचार्यसकाशाद्यथावस्थितगद्यत्रयादिश्राविणामिदानीमपि तत्संभवः । तत्र हि यथावत्पारावर्यनिश्चयादन्यभक्त्युन्मूलनेन अनन्यदेवताकत्वादिकं च[3] सिद्ध्यति । तां चावस्थां स्वयमेवाह भगवान्[4]—

[1] अत्र इति पदं क, ख, ग, झ कोशेषु नास्ति.
[2] एतेन भगवदानन्देऽपि—क, ख, ग, झ.
[3] च इति पदं घ कोशे न दृश्यते.
[4] आह च स्वयमेव भगवान्—क, ख, ग, झ.

इत्यादिभिरनर्हतापादकानि सर्वाणि[1] तत्र तत्र द्रष्टव्यानि । संगृहीतं च समाराधनोपयुक्तसर्वद्रव्यसाधारण्येन वङ्गिवंशेश्वरैः—

"निषेधाविषयीभावादृते नैवापरो गुणः ।
प्रीतिहेतुः परेशस्य स्वार्चनाङ्गेषु वस्तुषु ॥" इति ।

आराधकस्यापि हि अर्चनाङ्गवस्तुत्वमविशिष्टम् । यथा च प्रशस्तजातिष्वेव तुलस्यादिपत्र-पद्मादिपुष्प-रम्भादिफल-गङ्गातोयादिषु तैस्तैरुपहतिनिमित्तैर्निषेधविषयता, एवमाराधकेऽपि यतःकुतश्चिदुपघातात् आप्रायश्चित्तादनर्हतया निषेधविषयत्वं भवति । अन्यथा 'नाविरतो दुश्चरितात्' इत्यादिश्रुतिकोपप्रसङ्गात् । उपहतिविषयस्पृष्टबिम्बादिषु च प्रायश्चित्तविधानात् । ब्रह्मविदोऽपि ह्युत्तराघाश्लेषवचनं प्रामादिकविषयं[2]मिति स्थापितं भाष्यादिषु । "सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्" इत्यादिभिश्च सूत्रैरयमर्थः सिद्धः । अपि च राजवदुपचारो ह्यत्र विधीयते । राजोपचारवृत्तिश्चापचारपरिहारप्रधाना, तद्वदिहापि । यथा च गुणवति राजनि सेवकानां सापराधानामपि क्षामणमात्रेण निरपराधता तथेहापीति तल्लाभः[3] । इदमपि संगृहीतम्—

"अज्ञानादथवा ज्ञानादपराधेषु सत्स्वपि ।
प्रायश्चित्तं क्षमस्वेति प्रार्थनैकैव केवलम्" ॥ इति ।

यत्त्वनन्तरमुक्तम्—

"अर्चनादिष्वनर्हत्वान्न कश्चिन्नापराध्यति ।
अतोऽनङ्गीकृताशेषकर्तृदोषविमर्शया ॥
कृपयैवास्य देवस्य सर्वोऽप्यर्हति तत्क्रियाम्" ॥ इति—

[1] सर्वाणि—क, ख, ग, च, झ कोशेषु नास्ति.
[2] प्रामादिकादिविषयं—घ.
[3] इति लाभः—घ, ङ, छ.



एतदपि क्षामणयोग्यताख्यापकम् । अन्यथा क्षमस्वेति प्रार्थनाविधानानुपपत्तेः[1] । न चैतावता कृतापराधेन[2] निर्भयेन भवितव्यम् ।

"प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इति न्यायात् ।

**अकर्मण्यतापादका दोषाः ।**

अत्र चाकर्मण्यताहेतूनपराधानेवमाह[3] भगवान्—

"शृणु सुन्दरि तत्त्वेन आहारस्य विनिर्णयम् ।
आहारो यस्त्वनाहारस्तच्छृणुष्व वसुन्धरे ॥
भोजनं यस्तु भुञ्जीत मम योगाय माधवि ।
अशुभं कर्म कृत्वापि पुरुषो धर्मसंश्रितम् ॥
आहारं चैव कर्मण्यमुपयुञ्जीत नित्यशः ।
[4]सर्वेषां च ततः कर्म प्रवृत्तेः प्राणधारणम् ॥
अकर्मण्यानि वक्ष्यामि यैर्न तुष्यामि संप्रति ।
राजान्नं च न भोक्तव्यं मम भक्तैः कदाचन ॥
राजान्नेन तु भुक्तेन त्वपराधो महान् भवेत् ।
द्वात्रिंशदपराधांस्तु न सेवेत मम प्रिये ॥
भोज्यान्नपानाहारेषु ये मया परिकीर्तिताः ।
दन्तकाष्ठमखादित्वा यस्तु मामुपसर्पति ॥
द्वितीयमपराधं तु धर्मवित्त प्रवर्तते ।
गत्वा मैथुनसङ्गं तु यस्तु मां स्पृशते नरः ॥

[1] प्रार्थनानुपपत्तेः—क, ख, ग, झ.
[2] कृतापराधेन—क, ख, ग, च, झ कोशेषु नास्ति.
[3] अपराधानाह—क, ख, ग, च, झ.
[4] सर्वे चात्रैव कर्मण्या व्रीहयः शाल्यस्तथा । इति वराहपुराणपाठः

तृतीयमपराधं तु कल्पयामि वसुन्धरे ।
दृष्ट्वा तु मृतकं देवी यस्तु मामुपसर्पति ॥
चतुर्थमपराधं तु न क्षमामि वसुन्धरे ।
स्पृष्ट्वा[1] रजस्वलां नारीं यस्तु मामुपसर्पति ॥
पञ्चमं त्वपराधं च दृष्ट्वा वै न क्षमाम्यहम् ।
स्पृष्ट्वा तु मृतकं चैव संस्कारं मृतकस्य वै ॥
अपराधमिमं षष्ठं न क्षमामि वसुन्धरे ।
ममार्चनविधौ काले वातं मुञ्चति निर्घृणः ॥
सप्तमश्चापराधोऽयं मम देवि न रोचते ।
ममैवार्चनकाले तु पुरीषं यस्तु मुञ्चति ॥
अष्टमश्चापराधोऽयं ममात्र तु न रोचते ।
मदीयार्चनकाले तु यो हि वाचा प्रभाषते ॥
नवमं चापराधं तु न क्षमामि वसुन्धरे ।
यस्तु नीलेन वस्त्रेण प्रावृतो मां प्रपश्यति ॥
दशमश्चापराधोऽयं मम देवि न रोचते ।
परिधायैकवस्त्रं च यस्तु वै मां प्रपद्यते[2] ॥
एकादशापराधस्तु मम विप्रियकारणम् ।
क्रुद्धस्तु यश्च कर्माणि कुरुते कर्मकारकः ॥
द्वादशं चापराधं तु कल्पयामि वसुन्धरे ।
अकर्मण्यानि पुष्पाणि यस्तु मामुपकल्पयेत् ॥
त्रयोदशापराधं तु न क्षमामि वसुन्धरे ।
यस्तु रक्तेन वस्त्रेण कौसुम्भेनाधिगच्छति ॥

[1] दृष्ट्वा—क, ख, ग, च, झ.
[2] प्रपश्यति—क, ख, ग, च, झ.



चतुर्दशापराधं तु न क्षमामि वसुन्धरे ।
अन्धकारे तु मां देवि यः स्पृशेत(त्तु) कदाचन ॥
पञ्चदशापराधं तं कल्पयामि वसुन्धरे ।
यस्तु कृष्णेन वस्त्रेण मम कर्माणि कारयेत् ॥
षोडशं चापराधं तं कल्पयामि न संशयः ।
वासः समवधून्वन् वै यस्तु मय्युपकल्पयेत् ॥
सप्तदशापराधं तं कल्पयामि वसुन्धरे ।
श्वानं स्पृष्ट्वा ममान्यद्वा यो दद्यान्मम माधवि ॥
अष्टादशापराधं तं कल्पयामि न संशयः ।
वाराहं यस्तु मांसं वै भक्षयित्वा प्रपद्यते ॥
एकोनविंशापराधं प्रतिजानामि माधवि ।
जालपादं[1] समश्नन् वै यस्तु मामुपसर्पति ॥
अपराधं विंशतिमं[2] कल्पयामि वसुन्धरे ।
स्पृष्ट्वा वै दीपकं यस्तु मोहात् स्पृशति माधवि ॥
एकविंशापराधं तं कल्पयामि वसुन्धरे ।
श्मशानं यस्तु वै गत्वा मम चैवाभिगच्छति ॥
द्वाविंशमपराधं तु तमहं चोपकल्पये ।
पिण्याकं भक्षयित्वा तु मम चैवोपचंक्रमेत्[3] ॥
त्रयोविंशापराधं तं नरो मम च कल्पयेत् ।
मज्जनानवजानन् यो मां तु पश्यति माधवि ॥
चतुर्विंशापराधं तं कल्पयामि वसुन्धरे ।
एकहस्तप्रणामं च यः करोति च भामिनि ॥

[1] जालघातं—क, ङ, च.
[2] विंशमिमं इति चेत् सम्यक् .
[3] च कोशादन्यत्र उपचक्रमेत् इति पाठः

पञ्चविंशापराधं तं न क्षमामि वसुन्धरे ।
परप्रापणकेनैव यस्तु मामभिगच्छति ॥
सप्तविंशापराधं तं न क्षमामि वसुन्धरे ।
नवाग्रं ये तु व्रीहीणामदत्वापीह भुञ्जते ॥
अष्टाविंशापराधं तं कल्पयामि वसुन्धरे ।
अदत्वा सुमनो यो वै धूपं मे दातुमिच्छति ॥
एकोनत्रिंशापराधं कल्पयामि वसुन्धरे ।
सोपानत्कस्तु यो मर्त्यो मामेवमुपसर्पति ॥
अपराधमिमं त्रिंशं कल्पयामि वसुन्धरे ।
भेरीमताडयित्वा तु यस्तु मां प्रतिबोधति ॥
एकत्रिंशापराधं तु कल्पयामि वसुन्धरे ।
अजीर्णरसमाविष्टो यस्तु मामुपसर्पति ।
महापराधं तद्विद्याद्द्वात्रिंशमिह चोत्तमम्" ॥ इति ।

एवमेतान्यन्यानि चानर्हतानिमित्तानि परिहरतः, संभवे च सानुतापं यथोचितं प्रायश्चित्तमनुतिष्ठत इह समाराधनाधिकारित्वम् ।

जात्यादिनिबन्धनोऽप्यधिकारविशेषः ।

एवं जात्यादिनिबन्धनाधिकारविशेषोऽपि शास्त्रेषु श्रूयते । यथोक्तं श्रीसात्त्वते---

"अष्टाङ्गयोगसिद्धानां हृद्यागनिरतात्मनाम् ।
योगिनामधिकारः स्यादेकस्मिन् हृदयेशये ॥
व्यामिश्रयागमुक्तानां विप्राणां वेदवेदिनाम्[1] ।
समन्त्रे तु चतुर्व्यूहे त्वधिकारो[2] न चान्यथा ॥

[1] वेदवादिनाम्—ख, ङ, छ.
[2] मन्त्रे तु चातुर्व्यूहे तु अधिकारो—क, ख, ग, च, झ.



त्रयाणां क्षत्रियादीनां प्रपन्नानां च तत्त्वतः ।
अमन्त्रमधिकारस्तु चातुर्व्यूहक्रियाक्रमे ॥
सक्रिये मन्त्रचक्रे तु वैभवेऽपि विवेकिनाम् ।
ममतासन्निरस्तानां स्वकर्मनिरतात्मनाम् ॥
कर्मवाङ्मनसैः सम्यग्भक्तानां परमेश्वरे ।
चतुर्णामधिकारो वै वृत्ते[1] दीक्षाक्रमे सति ॥
एवं संप्रतिपन्नानां मन्त्रपूर्वं यथास्थितम् ।
विधानमेकमूर्तीयं समाकर्णय साम्प्रतम् ॥" इति ।

जयादिषु चाप्तादिभेदो द्रष्टव्यः । सर्वेषामन्ततो भगवत्प्राप्तिः समानाविकलानामपि भागवतानाम् * * * * * * *

**[अत्र सर्वेष्वादर्शकोशेषु ग्रन्थांशो लुप्तो विलोक्यते[2] ।]**

स्वाध्यायविधिः ।

अथ स्वाध्यायं व्याख्यास्यामः । चतुर्थे काले संप्राप्ते स्वावगतवेदवाक्यार्थव्यक्तीकरणाय विदितसकलवेद-तदर्थानां स्वयोगमहिमसाक्षात्कृतपरावरतत्त्वयाथात्म्यानां मनु-पराशर-पाराशर्य-शुक-शौनकादीनां महर्षीणां प्रबन्धान्[3] श्रवण-मनन-जपादिभिरभ्यसेत् । तदिदमुक्तं व्यासेन तत्कालकृत्यम्—"इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्" इति । दक्षेण तु "इतिहासपुराणाभ्यां षष्ठं सप्तममभ्यसेत्" इति । एवम् "भुक्त्वोपस्थाय चादित्यं पुराणानि सदा पठेत्"

[1] प्राप्ते—क, च, झ.
[2] कियान् ग्रन्थांशो लुप्त इति न ज्ञायते.
[3] 'महर्षीणां प्रबन्धान्' इति स्थाने 'वेदोपबृंहणानि' इति पदं—क, ख, ग, च, झ कोशेषु दृश्यते.

इत्यादिकं च द्रष्टव्यम्। उपबृंहणनिरपेक्षस्य उपबृंहणीयवेदभागजप एव युक्तः। तत्रापि साक्षाद्भगवत्प्रतिपादक एव भागो जप्य इति श्रीशाण्डिल्यस्मृत्यादिषूक्तम्। संग्रहरुचीनां महामन्त्रसक्तानां च सर्वसारभूतव्यापकमन्त्रजपोपदेशः।

जपादिकालेऽपि गुर्वादिषु मौनवर्जनं सर्वत्रोक्तम्। आह चैवं बोधायनः—

**स्वाध्यायमध्ये गुर्वादिपुरस्कारः।**

"जपमध्ये गुरुर्वापि वैष्णवो यः समागतः।
संभाषणादिपूजां तु तस्य कृत्वानुमान्य च॥
अनुश्राव्य ततः कुर्याज्जपशेषं समाहितः"।
"सर्वस्य प्रभवो यस्माद्विष्णुपादाश्रया नराः॥
तन्मूलतः क्रियाः सर्वाः सफलास्तु भवन्ति हि॥" इति।

तत्र मौनमन्त्रार्थचिन्तनादयो नियमास्तत्र तत्र ग्राह्याः। शिष्य-गुरु-सब्रह्मचारिभिः श्रेयोऽर्थिभिरनसूयुभिः वीतरागैः सह वादः, "बोधयन्तः परस्परम्" इत्युक्तसंवादोऽपि तत्त्वनिर्णयफलत्वाविशेषात् इतिहास-पुराणादिवत् स्वाध्यायकाल एव प्रवर्तनीयः। स्मरन्ति चाभिगमनान्तःपातिनि पूर्वयामस्वाध्याये—"जपेदध्यापयेच्छिष्यान् धारयेच्च विचारयेत्" इति। "विचारोऽभ्यसनं जपः" इति च[1]। उक्तं चानुयागविधानानन्तरं श्रीसात्त्वते "समाचम्य पुनर्यायात् प्रयतो भगवद्गृहम्" इत्युक्त्वा,

[1] च कोशादन्यत्र च कारो न विद्यते.



"मनोबुद्ध्यभिमानेन सह न्यस्य धरातले।
कूर्मवच्चतुरःपादान् शिरस्तत्रैव पञ्चमम्[1]॥"

इत्यष्टाङ्गप्रणामं[2] च विधाय,

अष्टाङ्गेन नमस्कृत्य ह्युपविश्याग्रतो हरेः[3]।
आगमाध्ययनं कुर्यात् तद्वाक्यार्थविचारणम्[4]॥" इति।

तदिह भगवत्प्रीणन-स्वचित्तरञ्जकेतिहास-पुराण-स्तोत्र-निगमान्तद्वय-व्यापकमन्त्रादीनां श्रवण-मनन-प्रवचन-जपादयो वाद-संवादादयश्च यौगिकज्ञानप्रदीपस्नेहायमानाः,

"पारुष्यमनृतं चैव पैशुन्यं चैव सर्वशः।
अनिबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्॥"

इत्यादिनिदर्शितविविधवाचिकपापोदयप्रतिबन्धिनश्च सर्वे व्यापारा यथासम्भवं संभूय पृथग्भूय वा स्वाध्यायीभवन्ति। शमाद्युपयुक्तशब्दशीलनं कुर्यादिति स्वाध्यायसारः। उक्तं हि महाभारते—

"यच्छ्रुतं न विरागाय न धर्माय न शान्तये।
सुबद्धमपि शब्देन काकवाशितमेव तत्॥" इति।

शब्दशास्त्राभिरतस्य मोक्षः" इत्यादि च[5]।

[1] कूर्मवदित्युत्तरार्धं घ, ङ, छ कोशेषु नास्ति.
[2] इत्यादिना साष्टाङ्गप्रणामं—घ, ङ, छ.
[3] विभोः—घ, ङ, छ.
[4] विचारणात—ङ, छ.
[5] इति च—क, ख, ग, च.

**सायंसन्ध्यादिकम्।**

अथ लोहितायति भास्करे यथासूत्रं सायंसन्ध्योपासनम्, सायंहोमः, पुनर्यथाशक्ति भगवदभिगमनं[1] हविर्निवेदनपूर्वकं भोजनम्। केनचिन्निमित्तेन विलुप्ते भोजने प्राणाग्निहोत्रमन्त्रजपः, ततश्च रात्रियोग्यस्वाध्यायो योगश्चेति क्रमः। तत्र प्रमाणानि—

"उभे सन्ध्ये भगवानभिगन्तव्यः"
"नानिवेद्य हरेः किञ्चित् समश्नीयात्तु पावनम्"
"सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम्।
नान्तरा भोजनं कुर्यादग्निहोत्रसमो विधिः॥"
"प्राणाग्निहोत्रमन्त्रांश्च विलुप्ते भोजने जपेत्।"
"प्रदोषपश्चिमौ यामौ वेदाभ्यासेन यापयेत्।
तत्पूर्वापररात्रेषु युञ्जानः" इत्यादीनि॥

**महाप्रदोषे मौनाचरणम्।**

[2]अनन्यप्रयोजनाधिकर्तव्यः पूर्वयामस्वाध्यायश्च त्रयोदश्यां प्रदोषाख्यकाले[3] वर्जनीयः। यथा संगृहीतं कालविधाने—

"विषुवायनद्वितयपञ्चदशीप्रथमाष्टमीषु कलिनाथतिथौ।
रजनीमुखे च मदनाधिपतेर्विधिराह नाध्ययनकर्म नृणाम्॥"
इति।

स्मृत्यर्णवे चैतदुपात्तम्—

"मितसन्ध्यस्त्रयोदश्यां संस्मरन्[4]नात्मनो हितम्।
अह्नोऽष्टांशेन संयुक्तं रात्र्यर्धं मौनमाचरेत्॥" इति।

[1] भगवदभिगमनं—क, ख, ग, च, झ.
[2] अनन्यप्रयोजनाधिकारिकर्तव्यपूर्वयाम—क, च, झ.
[3] कालांशे—घ.
[4] त्रयोदश्यामस्मरन्—क, ख, ग, झ; त्रयोदश्याश्च स्मरन्—घ. (अत्र घ. ङ. कोशयोः पाठौ अस्पष्टाक्षरा सुतरां संदिग्धौ च.)



एवं तत्कालनियतसावित्रीहोमादिव्यतिरिक्तदशायां प्रदोषाख्यकाले मौनविधानात् मन्त्रजपादिकमपि वर्जनीयम्। यथोक्तं कृष्णमन्त्रकल्पे—"जपेन्न सन्ध्याकालेषु प्रदोषेष्वशुभेषु च" इति। विषुवायनादिषु तु स्वाध्यायजपमात्रं निषिद्ध्यते, मन्त्रजपादिकं तु विधीयते। उक्तं चाष्टाक्षरजपस्य नित्यत्वं बोधायनेन—

"एवं गुरोः[1] समारभ्य मन्त्रानुष्ठानमाचरेत्।
अष्टाक्षरं जपेद्विद्वान्नित्यमष्टसहस्रकम्॥
अजप्त्वाष्टाक्षरं मन्त्रं नाहमश्नामि किंचन।
यावज्जीवं जपामीति पश्चादहरहर्जपेत्॥
अष्टाक्षरजपो यस्य नित्यो नैमित्तिकोऽपि वा।
काम्यो वापि भवेत्तस्य नित्या देवार्चना[2] स्मृता"॥ इति।

न चात्र मौनविधिकाले भगवद्धर्मविच्छेदः। तदानीं यथाविधि मौनानुष्ठानस्यैव[3] भगवत्सेवारूपत्वात् प्रवृत्तिविषया निवृत्तिविषया वा भगवदाज्ञैव सर्वदानुवर्तनीया इत्यच्छिद्रानुष्ठानसिद्धिः। यद्यपि च अतत्क्रियस्य प्रदोषे हरिदर्शनादिकं प्रतिषिध्यते तच्चानुपालितं परमैकान्तिभिर्भाष्यकारादिभिः, तथापि स्वगृहार्चायां[4] तत्क्रियत्वात्[5] तदनुज्ञा। उक्तं चैवं बोधायनीये पुराणसारसमुच्चये—

[1] गुरुः—घ.
[2] नित्यदेवार्चना—क, ख, च, झ.
[3] यथाविहितमौनानुष्ठानस्यैव—क, ख, ङ, च, छ, झ. (अयमेव पाठो यथाशब्दविहीनो ग कोशेऽपि दृश्यते.)
[4] स्वगृहार्चायाः इत्यत्र स्वशब्दः घ, ङ, छ कोशेषु न दृश्यते.
[5] तत्क्रियत्वात् इति बहुषु कोशेषु पाठः; क, झ कोशयोः परं तत्क्रियात्वात् इति वर्तते.

"आस्थानस्थः सदा सेव्यो विमानस्थस्तु कालतः ।
स्वगृहे सर्वदा सेव्यो मध्यरात्रं विना प्रभुः" ॥ इति ।

मध्यरात्रेऽप्युपरागादिनिमित्तविशेषसम्भवे स्नानादिपूर्वकभगवत्सेवाजपादिकमवश्यकर्तव्यतया विधीयत इति न विरोधः ।

**स्वाध्याय-योगयोः अनुयागात् पूर्वमेव समाहृत्यानुष्ठानम् ।**

एतौ च स्वाध्याय-योगौ आह्निकानुयागात् पूर्वमेव केषुचित् संहिताविशेषेषु समाहृत्योपदिश्येते । यथा संगृहीतं नारायणमुनिभिः—

"पुनः प्रणम्य देवेशमह्नो भागे तुरीयके ।
द्विषडष्टषडर्णादिमन्त्रेषु स्वानुसंहितम् ॥
विशेषेण जपेन्मन्त्रमष्टोत्तरसहस्रकम् ।
अष्टोत्तरशतं वापि यथाशक्ति दशावरम् ॥
गुर्वादींश्च नमस्कृत्य बीजशक्त्यादिकं तथा ।
मन्त्रनाथं प्रणम्येशमापादादवलोकयन्[1] ॥
जप्त्वा च सुचिरं योगमास्थाय प्रणमेद्धरिम् ।
स्वधाम नीत्वा देवेशं[2] प्रह्वः सपरिवारकम् ॥
तत्रार्घ्यादिभिरभ्यर्च्य रक्षां कृत्वास्त्रनायकैः ।
पुनः पुनः प्रणम्याथ होमाद्यं संविधाय च ।
अनुयागं ततः कृत्वा कृतकृत्यो भवेन्नरः" ॥ इति ।

[1] आपादादवलोकयन् इत्यारभ्य स्वधाम नीत्वा देवेशं इति यावत् ख, ग कोशयोः विसृष्टम्.

[2] स्वधा मनसा देवेशं इति क कोशे ङ कोशस्य शुद्धिपत्रिकायां च दृश्यते.



अयमेव क्रमो विस्तरेणोक्तस्तद्गुरुभिर्वङ्गिवंशेश्वरैः । तथाहि—

"प्राप्तमहश्चतुर्थांशं स्वाध्यायार्थमुदीरितम् ।
विज्ञाप्य विष्णवे तस्मै लब्धानुज्ञस्ततोऽपि च ॥
बाह्यार्थादखिलाच्चेतः समाहृत्येन्द्रियैः सह ।
जपन्नष्टाक्षरं मन्त्रं प्राणायामपुरःसरम् ।
प्रयतः परया भक्त्या पूर्वमेव समाहितः ॥
कराङ्गुलिशरीरेषु न्यासान् कृत्वा यथोदितान् ।
गुरुं मन्त्रमृषिं छन्दो देवताश्च[1] यथाक्रमम् ॥
शक्तिं बीजं च शिरसा प्रणमेदेवमादृतः[2] ।
इदं गुरुभ्यः सर्वेभ्यः[3] क्रियते शिरसा नमः ॥
मन्त्रज्ञानप्रदातृभ्यस्तद्गुरुभ्योऽपि सांप्रतम् ।
नमस्ते मन्त्रराजाय नमस्तेऽष्टाक्षरात्मने ॥
नमस्ते चेतनाधार परब्रह्माभिधायिने ।
स्थित्वान्तर्हृदये सर्वानात्मनः संनियच्छते ॥
ऋषयेऽष्टाक्षरस्यान्तर्यामिने हरये नमः ।
अष्टाक्षरमहामन्त्रवर्णसंख्याभिमानिनीम्[4] ॥
छन्दश्च देवीं गायत्रीं शिरसा प्रणमाम्यहम् ।
मन्त्रशक्तिः स्थिता यस्मिन्नाश्रितेष्टार्थदायिनि[5] ॥

[1] ऋषिच्छन्दोदेवताश्च—छ.

[2] प्रणमेद्देवमादितः—क, झ., प्रणमेदेवमादितः—ख, ग; प्रणमेद्देवमादृतः—च.

[3] गुरुभ्यः पूर्वेभ्यः—क, च, झ.

[4] संख्याभिधायिनीम्—क, ख, च, झ; मुद्रितकारिकापाठश्च.

[5] इष्टार्थसाधिनि—ख, ग; इष्टार्थदायिनी—च कोशे कारिकायामपि.

पदं नारायणायेति शक्तिं तां प्रणतोऽस्म्यहम्[1] ।
अकारादुत्थितं बीजं वासुदेवाभिधायिनः[2] ॥
तद्बीजमस्य प्रभवं प्रणवं प्रणतोऽस्म्यहम् ।
[3]मन्त्रस्य देवतां चापि परमात्मानमव्ययम् ॥
नारायणं परं ब्रह्म नतोऽस्मि शिरसा हरिम् ।
प्रणम्य चैवं गुर्वादीन् गन्धाद्यैरभिपूज्य च ॥
अनिशं भगवद्बिम्बमापीठादवलोकयन्[4] ।
जपेदष्टाक्षरं मन्त्रं तदर्थमनुचिन्तयन् ॥
अष्टोत्तरसहस्रं वा शतं वा दश वोत्सुकः ।
जपान्ते मनसा ध्यात्वा यथोक्ताकृतिमच्युतम् ॥
सपत्नीकं सानुयात्रं सद्वारपगणेश्वरम् ।
कृत्वैवं मनसा योगं सुचिरं हृष्टमानसः ॥
उत्थाय च ततो योगाद्दण्डवत् प्रणिपत्य च ।
स्तुत्वा च बहुभिः स्तोत्रैः कृत्वा चापि प्रदक्षिणम् ॥
स्थित्वाग्रे देवदेवस्य कृत्वा मूर्ध्नि स्वमञ्जलिम्[5] ।
ततः स्वस्मै प्रपन्नाय[6] दत्ते तेनाभये सति ॥

[1] प्रणमाम्यहम्—कारिकापाठः

[2] वासुदेवाभिधायिनम्—ङ, छ; कारिकायामपि.

[3] 'मन्त्रस्य देवतां' इत्यारभ्य 'शिरसा हरिम्' इति यावत् एकः श्लोकः 'मन्त्र शक्तिः' इत्यस्य श्लोकस्य पूर्वं क, ख, ग, च, झ कोशेषु पठ्यते.

[4] अवलोकयेत्—क, ख, ग, च, झ; कारिकायामपि.

[5] 'स्वमञ्जलिम्' इत्यनन्तरं 'जितन्त इति मन्त्रेण तं देवं शरणं व्रजेत्' इति कारिकायां श्लोकार्धम् अधिकं दृश्यते.

[6] तस्मै प्रसन्नाय—क, ख, ग, ङ, च, छ, झ; स्वस्मै प्रसन्नाय—घ; स्वस्मै प्रपन्नाय इति तु कारिकापाठः



निर्भयः सर्वभूतेभ्यो भवेन्निर्वृतमानसः ।
कर्मण्यवसिते तस्मिन् दुर्लभे दुष्करेऽपि च ॥
अर्घ्यं दत्वा यथापूर्वं स्वमात्मानं[1] निवेद्य च ।
स्वनिवेदनमन्त्रेण दासशिष्यात्मजात्मनः ॥
सादरः स्वेन[2] शिरसा भक्तिनिघ्नः[3] परात्मने ।
निदध्यात् स्वं च कर्तृत्वं तस्मिन्नेव परात्मनि ॥
क्षामयेच्चापराधान् स्वान् ज्ञानाज्ञानोपपादितान् ।
असह्यानपि सह्यांश्च[4] क्रियमाणानहर्निशम् ॥
अज्ञानतोऽप्यशक्त्या[5] वा आलस्याद्दुष्टभावतः ।
कृतापराधं कृपया क्षन्तुमर्हसि मां विभो ॥
अज्ञानादथवा ज्ञानादशुभं यत् कृतं मया ।
क्षन्तव्यं तदशेषेण दास्येन च गृहाण माम् ॥
उपचारापदेशेन कृतानहरहर्मया ।
अपचारानिमान् सर्वान् क्षमस्व पुरुषोत्तम ॥
शिरसा प्रार्थितेनैवं प्रसन्नेन परात्मना ।
क्षान्तसर्वापचारेण करुणामृतवर्षिणा ॥

[1] स्वं चात्मानं—क, ख, ग, घ, ङ, च, झ.

[2] स्वोदकं स्वेन—क, ख, च, झ; सोदकं स्वेन—ग, ङ, छ; स्वोकरं स्येन—घ; अत्र 'सादरः स्वेन' इति कारिकापाठ आदृतः.

[3] भक्तिनिष्ठः—क, ख, च, झ; भक्तियुक्तः—ङ, छ; भक्तिनिघ्नपरात्मने—कारिकापाठः.

[4] असह्यानविषह्यांश्च—क, ख, घ, च, झ; असङ्ख्यानपि सङ्ख्यांश्च—ग; असङ्ख्यानविषह्यांश्च—कारिका.

[5] अशक्त्या वाप्यालस्यात्—क, च, झ.

वात्सल्यौदार्यसौशील्याद्यनन्तगुणराशिना[1] ॥
अशरण्यशरण्येन कृपया परया स्वया ।
सस्मितालोकमधुरमाहूयाद्भुतया गिरा ॥
दत्तं तत्पदयोर्युग्मं स्वयमेव स्वमूर्धनि ।
वहंस्तच्चरणस्पर्शनिहताशेषकल्मषः ॥
आसित्वा सुचिरं तस्य पुरतः परया मुदा ।
समुत्थाय ततस्तस्मै भूयो भूयः प्रणम्य च ॥
स्मारयित्वा स्वकं धाम तद्यानाय प्रणम्य च ।
दत्वाथ पादुकायुग्मं तत्र देवं समानयेत्[2] ॥
सपत्नीकं सानुयात्रं सद्वारपगणेश्वरम् ।
ततस्तदर्हविन्यासं सूपधानं स्वलंकृतम् ॥
अनन्तभोगशयनमधिरूढे परात्मनि ।
आसीनयोस्तथा[3] देव्योर्देवपार्श्वे यथायथम् ॥
आसीनेषु यथाभागं सेनान्यादिषु सर्वतः ।
अथार्घ्यपाद्याचमनताम्बूलादि यथोचितम् ॥
देवाय देवीयुक्ताय सानुगाय निवेद्य च ।
प्रणम्य दण्डवद्भूम्यां भूयो भूयः पुरो हरेः ॥
अनुयागादिकं चाथ चिकीर्षन्नाह्निकं विधिम् ।
दत्तानुज्ञः परेणापि गमनायात्मनो बहिः ॥
निर्गन्तुकामो निक्षिप्य देवं दौवारिकादिषु ।
सभयः सानुतापश्च चण्डादीन् द्वारपालकान् ॥

[1] गुणशलिना—घ, ङ, छ.
[2] समापयेत्—घ, ङ, छ.
[3] तदा—क, ख, ग, च, झ.



कुमुदादीन् गणेशांश्च चक्रादीन्यायुधान्यपि ।
गरुडं च विशेषेण शेषं शेषाशनं तथा ॥
प्रणम्य स्मारयेद्देवं सस्नेहादरसाध्वसम्[1] ।
निक्षिपन् जीवितमिव न्यस्यन्निव महानिधिम् ॥
निधित्सन्निव चक्षुः स्वमर्पयन्निव कल्पकम् ।
सर्वे भवन्तः सगणाः सन्नद्धाः सर्वदिक्ष्वपि ॥
सावधानाश्च तिष्ठन्तु निक्षिपामि भवत्स्वहम् ।
मम नाथं मम गुरुं पितरं मातरं च मे ॥
हरिं श्रियं भुवं चापि तान् पालयत सर्वतः ।
यथानिक्षिप्तरूपं मे सन्दर्शयत सर्वदा ॥
भवतः शरणं गत्वा व्रजामि गतसाध्वसः ।
इति विज्ञाप्य तान् पश्चात् प्रार्थयेत हरिं गिरा ॥
ननु देव त्वमेवैकः सस्थावरचरं जगत् ।
ब्रह्मादिस्थावरान्तं च परिपासि बिभर्षि च ॥
संहरिष्यसि चाप्यन्ते रूपैः स्वैः स्वैर्यथेप्सितैः ।
केन त्वं पाल्यसे देव केन वा त्वं विहिंस्यसे[2] ॥
अतस्त्वमेव त्वां देव्यौ चण्डादीन् पालकानपि ।
मां च मामकमप्येतत्सर्वं गृहमशेषतः ॥
पालयित्वा स्वसङ्कल्पमात्रेण मधुसूदन ।
त्वां मया त्वयि निक्षिप्तं विश्वस्तेनार्थिकल्पक ॥
आगताय यथाकालं सर्वं मे दातुमर्हसि ।

[1] साध्वसः—क, ख, च, झ.
[2] विहन्यसे—क, च, झ.

इति विज्ञाप्य पुरतो दण्डवत् प्रणिपत्य च ॥
होमं पितृक्रियां पश्चादनुयागादिकं च यत् ।
सर्वमावेद्य तेनैव नियुक्तस्तच्चिकीर्षया ॥
वीक्षमाणस्तमेवैनं चक्षुषा स्निग्धपक्ष्मणा ।
मूर्ध्नि न्यस्ताञ्जलिपुटो विनिष्क्रम्य शनैः शनैः ॥
बध्वा कवाटयुगलं रक्षां कृत्वा प्रणम्य च ।
होमाद्यमनुयागान्तं वैधं कर्म समाचरेत् ॥" इति ॥

एवमष्टाङ्गयजनमध्ये स्वाध्याय-योगयोः समाहृत्योपदेशात् तत्तद्देश-कालावस्था-भेदेन यथाक्रमानुष्ठानाशक्तौ इज्यादेरपि यथोचितकालान्तरे समाहरणं रहस्याम्नायादिषु प्रपञ्चितमिहाविरुद्धमिति सूचितम् । स्वाध्याय-योगयोश्च यथावसरं मात्रया सर्वत्रानुप्रवेशः प्रागेव दर्शित इति व्याख्यातः स्वाध्यायः ॥

योगविधिः ।

अथ योगं व्याख्यास्यामः । तत्र, अनन्यप्रयोजनाधिकर्तव्यो योग-विशेषः 'ईदृशः परमात्मायम्' इत्यादिना श्रीशाण्डिल्यस्मृत्युक्तः प्रागेव दर्शितः । श्रीसात्वताद्युपदिष्ट-योगप्रकाराणामविरोधश्च सम्यक् समर्थितः । तत्र भगवान् पराशर-स्त्वेवमाह[1]—

"आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः ।
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥" इति ।

[1] तत्र पराशरस्त्वेवमाह भगवान्—क, ख, ग, ङ.



अयमेव त्वनन्यप्रयोजनस्य योगः । क्षुद्रयोगान्तराणि तु सिद्ध्यन्तरार्थान्येव योगशास्त्रेषु पठ्यन्ते । यद्यप्यनन्यप्रयोजनस्यापि तत्र तत्रोक्तन्यासविद्या-भेदात्, स्वनिष्ठाविषयतत्तत्संहितोक्तप्रक्रियाभेदाच्च अनुसन्धेयरूप-गुण-विभू-त्यादिकं नाना भवति । तथापि स्वरूपनिरूपकानन्दत्वादिपञ्चकनिरूपित-स्वरूपे सर्वशेषिणि परस्मिन् ब्रह्मणि श्रीमति पुरुषोत्तमे तत्तद्विद्योदित-रूपादिविशेषविशिष्टे मनोवृत्तिनैरन्तर्यरूपत्वं योगस्याविशिष्टम् । अत एव,

"पृथग्भूतेषु दृष्टेषु चतुर्ष्वाश्रमकर्मसु ।
समाधौ योगमेवैकं शाण्डिल्यः समभुक्तवान् ॥"

इति महाभारतवचनं सुसङ्गतं[1] भवति ।

योगे अनुसन्धेया विषयाः ।

अत्र तु भाष्यकाराद्युक्तनित्य-गद्य-स्तोत्रादिषु यथानुसन्धानमुक्तं तथैव तत्सम्प्रदायनिष्ठैरनुसन्धेयम् । श्रीवैकुण्ठगद्ये तु[2] अनन्यगतेः प्रपत्तिमेवा-पवर्गोपायं विधाय, तस्यैव क्षुधितस्यारोगस्य क्षीरान्न-भोजनादिवत्[3] स्वयम्प्रयोजनतयैव ध्यानयोगविशेषः तदनुबन्ध्यनुसन्धानविशेषाश्च प्रपञ्चिताः । तथा हि—"स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदम्" इत्यारभ्य "स्वामि-त्वेन सुहृत्त्वेन गुरुत्वेन च परिगृह्य" इत्यन्तेन प्राप्य-प्रापकभूतशरण्याध्य-वसायमुक्त्वा, अनन्तरम् "ऐकान्तिकात्यन्तिकपरिचर्यैकमनोरथः" इति पुरुषार्थविशेषलिप्साया अनन्यप्रयोजनतां प्रतिपाद्य, "तत्प्राप्तये च तत्पा-दाम्बुजद्वयप्रपत्तेरन्यन्न मे कल्पकोटिसहस्रेणापि साधनमस्तीति मन्वानः" इत्यनन्योपायतानुसन्धानमभिधाय, "तस्यैव भगवतः" इत्यादिना "महा

[1] वचनमपि सङ्गतं—घ.
[2] तु शब्दः क, ख, ग, ङ कोशेषु नास्ति.
[3] क्षीरान्नभोजनवत्—क, ख, ग, च, ङ.

विभूतेः श्रीमतः" इत्यन्तेन शरण्यत्वाद्युपयुक्ताकारानभिधाय, "चरणारविन्दयुगलमनन्यात्मसंजीवनेन तद्गतसर्वभावेन शरणमनुव्रजेत्" इति शरणवरणमेव मोक्षोपायत्वेन[1] विधाय, "ततश्च प्रत्यहमात्मोज्जीवनायैवमनुस्मरेत्" इति स्वतन्त्रप्रपत्तिनिष्ठस्यैव प्रत्यहं [2]प्राणरक्षणार्थभोजनादिन्यायेन आत्मोज्जीवनार्थमनुस्मरणविशेषं विधाय, विस्तरेण प्राप्यान्तर्गतं परमपदं वर्णयित्वा, "महति दिव्ययोगपर्यङ्केऽनन्तभोगिनि श्रीमद्वैकुण्ठैश्वर्यादिदिव्यलोकमात्मकान्त्या विश्वमाप्याययन्त्या शेष-शेषाशनादिकं[3] सर्वं परिजनं भगवतस्तत्तदवस्थोचितपरिचर्यायामाज्ञापयन्त्या शील-रूप-गुण-विलासादिभिरात्मानुरूपया श्रिया सहासीनम्" इत्यादिना "भगवन्तं नारायणं ध्यानयोगेन दृष्ट्वा" इत्यन्तेन परिपूर्णध्यानमुक्त्वा, पुनः "भगवतः" इत्यारभ्य "भगवत्परिचर्यायामाशां वर्धयित्वा" इत्यन्ते "मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत्", "कदा द्रक्ष्यति मां पतिः" इत्यादिवत् पुरुषार्थप्राप्तिमनोरथप्रकारान् प्रतिपाद्य, तयैवाशया तत्प्रसादोपबृंहितया भगवदभिगमनं दूरात् सपरिवारस्य भगवतो नारायणस्य 'समस्तपरिवाराय' इत्यादिना मन्त्रेण प्रणम्य, उत्थाय पुनः पुनः प्रणामं चाभिधाय, [4]अनन्तरमेवमनुसन्धानमुक्तम्—"अत्यन्तसाध्वस-विनयावनतो भूत्वा भगवत्पार्षदगणनायकैर्द्वारपालकैः कृपया स्नेहगर्भया दृशावलोकितः सम्यगभिवन्दितस्तैस्तैरेवानुमतो भगवन्तमुपेत्य श्रीमता मूलमन्त्रेण मामैकान्तिकात्यन्तिकपरिचर्याकरणाय परिगृह्णीष्वेति याचमानः प्रणम्य, आत्मानं भगवते निवेदयेत्। ततो भगवता अमर्यादशीलवता[5] अतिप्रेमान्वितेनावलोकनेन सर्वदेश-सर्वकाल-सर्वावस्थोचितात्यन्तशेषभावाय स्वीकृतोऽनुज्ञातश्च अत्यन्तसाध्वसविनयावनतः किंकुर्वाणः कृताञ्जलिपुटो भगवन्तमुपासीत। ततश्चानुभूयमानभावविशेषो निरतिशयप्रीत्या अन्यत् किंचित् कर्तुं द्रष्टुं स्मर्तुमशक्तः पुनरपि शेषभावमेव याचमानो भगवन्तमेवाविच्छिन्नस्रोतोरूपेण अवलोकनेनावलोकयन्नासीत। ततो भगवता स्वयमेवात्मसंजीवनेनावलोकनेनावलोक्य सस्मितमाहूय समस्तक्लेशापहं निरतिशयसुखावहमात्मीयं श्रीमत्पादारविन्दयुगलं शिरसि कृतं ध्यात्वा अमृतसागरान्तर्निमग्नसर्वावयवः सुखमासीत" इति।

[1] मोक्षोपायत्वेनापि—घ.

[2] प्राणरक्षणार्थं इति घ कोशादन्यत्र पाठः.

[3] शेष-शेषाशनादिकं इति गद्यत्रयपाठः; शेष-शेषाशनादि इति तु सर्वत्रान्यत्र पाठः.

[4] अनन्तरमेव—क, झ.

[5] अमर्यादाशीलवता—क, ख, ग, च, छ, झ.



अपि चात्र द्वयव्याख्यानरूपे गद्यत्रये निर्वेदभूयस्तया कैङ्कर्यत्वरातिशयाच्च प्राभातिकेऽभिगमने मितगद्यानुसन्धानमुचितम्। बृहद्गद्यं तु समाराधनकाले विशेषतोऽनुसन्धेयानां स्वरूप-रूप-गुण-विभूति-देवी-भूषणायुध-परिजन-परिच्छद-द्वारपाल-पार्षदादीनां यथावदनुसन्धानहेतुतया[1] "यथावस्थित-स्वरूप-रूप-गुण-विभूति-लीलोपकरणविस्तारमनुसन्धाय तमेव शरणमुपगच्छेत् अखिलेत्यादिना" इति समाराधनस्यादौ[2] अन्ते च भाष्यकारैरेव विनियुक्तम्। श्रीवैकुण्ठगद्यं तु,

**योगे गद्यत्रयस्य प्रत्येकमुपयोगविशेषः।**

"यामुनार्यसुधाम्भोधिमवगाह्य यथामति।
आदाय भक्तियोगाख्यं रत्नं सन्दर्शयाम्यहम्॥"

इति प्रारम्भात्, पश्चादपि 'ध्यानयोगेन दृष्ट्वा' इत्यभिधानात्, फलरूपविलक्षणानुसन्धानभेदानां विधानात्, "अविच्छिन्नस्रोतोरूपेणावलोकनेनावलोकयन् आसीत" इति कण्ठोक्तेश्च, योगार्थकल्पिते काले[3] विशेषतोऽनु-

[1] अनुसन्धेयतया—क, ख, ग, झ.

[2] समाराधनादौ इति घ कोशादन्यत्र पाठः.

[3] योगार्थसङ्कल्पकाले—क, ख, ग, च, झ.

सन्धेयमिति भाष्यकाराशयः प्रतीयते । न च 'भक्तियोगाख्यं रत्नम्'[4] इति प्रारम्भात् उपायभूतभक्तिविषयोऽयं प्रबन्ध इति भ्रमितव्यम् । अनन्यगतिकस्य प्रपत्तेरेवात्रोपायत्वेनोपदेशात्, उपायभूते फलभूते चानुसन्धानविशेषे भक्तियोगशब्दप्रवृत्त्यविरोधाच्च । ततः सिद्धोपायैरप्ययं योगः स्वकाले निवेशनीयः । योगकालानियमादैकाग्र्यानुरूपे कालान्तरेऽपि[1] कदाचिद्भवति । यामिन्यां भगवद्ध्यानस्य तु पावनत्वातिशयः स्मर्यते—

**प्रपन्नानामपि योगानुष्ठानम् ।**

"उपपातकयुक्तोऽपि महापातकवानपि ।
यामिन्याः पादमेकं तु ब्रह्मध्यानं समाचरेत्" ॥ इति ।

**योगस्य पञ्चप्रकारभगवद्रूपविषयत्वम् ।**

ततश्च—

परस्मिन् व्यूहाख्ये विभवनिवहेऽर्चावतरणे
तथान्तर्यन्तर्यप्य[2]जहदधिकारादिनियमाः ।
निरुद्धय स्वं चित्तं निरवधिमहानन्दजलधौ
निरस्तान्यापेक्षा नयत सफलं कालमखिलम् ॥

एषु च[3] परव्यूहप्रभृतिषु चित्तालम्बनेषु प्रपत्त्येकनिष्ठा नाथमुनिप्रभृतयः सुलभतमत्वेन परिपूर्णत्वाविशेषाच्च समाहितचित्तानामप्यनुसन्धेयमर्चावतारमेव चेतसः शुभाश्रयमालम्बन्त[4] । तत्र यद्यपि शीघ्रसाक्षात्कारहेतुभूतो

[1] अनुरूपकालान्तरे—क, ख, ग, च, झ.
[2] तथाप्यन्तर्यन्तर्यजहत्—क, ख, ग, झ.
[3] चकारः क, ख, ग, झ कोशेषु नास्ति ; ग कोशे एषु इति स्थाने येषु इति पाठः.
[4] आलम्बन्ते—च.



**योगे प्रपन्नस्य अर्चावतारानुसन्धानं मुख्यम् ।**

मन्त्रविशेष उच्छिन्नसम्प्रदाय इति वृद्धा विदामासुः तथापि स्वावगतैर्मन्त्रविशेषैरमन्त्रकं वा यथासम्भवं यथासम्प्रदायं तदनुसन्धानमस्याप्यवर्जनीयमेव[1] । "सर्वातिशायि षाड्गुण्यं संस्थितं मन्त्रबिम्बयोः" इत्यादिना तस्य पूर्णत्वं सिद्धम् । श्रीवैखानसेऽपि तदनुसन्धानस्यैव मुख्यत्वं प्रतिपादितम् । यथोक्तं क्रियाधिकारे—

"मानसी होमपूजा च बेरपूजेति सा त्रिधा"

REGISTRAR
3 MAR 1942

इत्युपक्रम्य[2]—

"यथोपयोगशक्यत्वात् कर्तुं पुष्पादिपूजनम् ।
चक्षुषः प्रीतिकरणान्मनसोऽपि तथैव च[3] ॥
प्रीत्या संजायते भक्तिर्भक्तस्य सुलभो हरिः ।
तस्मात्त्रयाणामेतेषां बेरपूजा विशिष्यते" ॥ इति ।

आह च भगवान् शौनकः—

"सुरूपां प्रतिमां विष्णोः प्रसन्नवदनेक्षणाम् ।
कृत्वात्मनः प्रीतिकरीं सुवर्णरजतादिभिः ॥
तामर्चयेत्तां प्रणमेत्तां यजेत्तां विचिन्तयेत् ।
विशत्यपास्तदोषस्तु तामेव ब्रह्मरूपिणीम्" ॥ इति ।

[1] तदनुसन्धानमप्यवर्जनीयमेव—क, ङ, च, छ, झ ; तथानुसन्धानमप्यवर्जनीयमेव—ख ; तदनुमत्यापि वर्जनीयमेव—ग.
[2] इति प्रक्रम्य—घ, ङ, छ.
[3] मनसो हृदयस्य च—इति घ कोशादन्यत्र पाठः.

अतो यत्र क्वचित् भगवद्रूपे यथाशक्ति[1] निरन्तरानुसन्धानं नाथमुनिप्रभृतिवत् सिद्धोपायैरपि निर्वेशनीयम्[2] ॥

एवं तु सात्त्वतोक्तः सन्ध्यादिनिद्रान्तकर्मसंग्रहः—

**सात्त्वतायुक्तं सायंसन्ध्यादिकम् ।**

"प्राप्तेऽथ सन्ध्यासमये स्नात्वाधोजघनावधि[3] ।
क्षालयित्वा ततः कुर्याद्वाससां परिवर्तनम् ॥
अर्चयित्वार्घ्यपुष्पाद्यैर्देवमग्निं यजेत्तथा ।
यथाशक्ति जपं कुर्यादासाद्य शयनं ततः ॥
समाधाय बहिर्देवं निरालम्बपदे स्थितम्[5] ।
अप्रमत्तेन[6] वै तावदनिरुद्धेन चेतसा ।
सह तेनैव वै निद्रा यावदभ्येति सांप्रतम्" ॥ इति ।

पाद्मे त्वेवमुक्तम्—

"ततः पश्चिमसन्ध्यायां प्राप्तायां तत्र चोदितम् ।
जपहोमादिकं सर्वं कृत्वा परमपूरुषम् ॥
अर्चयित्वा यथान्यायं यथापूर्वमशेषतः ।

[1] यथाशक्ति—क, ख, ग, झ कोशेषु नास्ति; अतः क्वचित् भगवद्रूपनिरन्तरानुसन्धानं—ख.

[2] निवेशनीयम्—क, ख, ग, झ.

[3] स्नात्वा वा जघनावधि—इति घ कोशादन्यत्र पाठः; स्नात्वा च जघनावधि इति ख कोशे.

[4] अर्घ्यपूजाद्यैः—क, ख, ग, झ.

[5] स्थितः—ङ, च, छ.

[6] अप्रयत्नेन—ग, घ, ङ, छ.



भुक्त्वा संविश्य शयने समुत्थाय महानिशि ॥
आचम्य प्रयतो भूत्वा ध्यात्वा परमपूरुषम् ।
योगासने समासीनो युञ्जीतात्मानमात्मनि ॥
यथोक्तेन प्रकारेण यथाशक्ति चतुर्मुख ।
संहारक्रममाश्रित्य तत्त्वान्यात्मनि संहरेत् ॥
आत्मानं चापि हृत्पद्मे परमात्मनि विष्ठिते ।
संहरेदुत्थितो योगात् स्वापं क्लेशापहं व्रजेत् ।
इत्येष कथितो ब्रह्मन् योगकालश्च पञ्चमः" ॥ इति ।

**योगस्य यथाशक्त्यनुष्ठेयत्वम् ।**

न चैतन्निरन्तरभगवदनुसन्धानं सनकादिसाद्ध्यमस्मदादिभिर्दुःशकमिति मत्वोदासितव्यम् । यथारोग्यं भोजनवत् यथाशक्ति तदास्वादस्यापरित्याज्यत्वात् । उक्तं च[1] श्रीमत्प्रह्लादेन—

"आयासः स्मरणे कोऽस्य स्मृतो यच्छति शोभनम् ।
पापक्षयश्च भवति स्मरतां तमहर्निशम्" ॥ इति ।

अतो यथा वा[2]—

"द्रष्टुमिच्छामि ते रूपमैश्वरं परमेश्वर ।
मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम्" ॥

इत्येतावद्वादिनोऽर्जुनस्य भगवान् विश्वरूपं स्वात्मानं दर्शयामास; एवमत्रापि स्वानुभवसापेक्षान्[3] यथामनोरथं परमोदारो भगवानेव स्वात्मानमनुभाव-

[1] च शब्दो घ कोशे नास्ति.

[2] वा शब्दः घ, ङ, छ कोशेषु नास्ति.

[3] स्वानुभवसापेक्षाणां—ङ, च, छ; घ कोशोऽत्र शिथिलः.

यति। अतो निर्यत्नलब्धेन भगवदनुभवानन्दसन्दोहेन कृतार्थोऽस्मीति मन्यमानः करण-कलेबरानुगुण्यावधि सुखमासीनो विविधव्यापारायस्तस्य[1] करिष्यमाणयोगोपकरणभूतस्य करणवर्गस्य विश्रान्तये स्वयमुपनमन्तीं निद्रां न निवारयेत्। 'युक्तस्वप्नावबोधस्य' इति स्मरणात्। निद्रैव तदा कैङ्कर्यम्। सुषुप्तौ च "तदभावो नाडीषु तच्छ्रुतेरात्मनि च" इति शारीरकसूत्रोक्तेन प्रासादखट्वापर्यङ्कन्यायेन[2] नाडीपुरीतद्ब्रह्मसु[3] स्वात्मनः शयनमनुसन्धाय, लक्ष्मीपरिष्वङ्गव्यञ्जकेन माधवशब्देन भगवन्तं संकीर्तयन्, "यथा प्रियया संपरिष्वक्तः" इत्यारभ्य, "प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्" इत्याम्नातप्रक्रियया[4] परमात्मपरिष्वङ्ग[5]विशेषं च परामृश्य, 'यत्करोषि' इत्यादिप्रस्थानेन निद्रामपि समाराधनत्वेन मन्यमानः, संशुद्धशुष्कपादः, शास्त्रोक्तप्रकारेण समुचिते स्थाने शास्त्रीये शयनीये चोदितदिक्छिराः, शुद्धत्वानम्रत्वादिनियमयुक्तः,[6] श्रीशाण्डिल्यस्मृत्याद्युक्तप्रकारेण स्वाराध्यस्य भगवतश्चरणारविन्दयोर्विन्यस्तशिरस्कः, 'शयनासनयानादौ' इत्यादिविधानात् तमेव माधवं हृदये[7] ध्यायन् तमेव कीर्तयन् सुखं शयीत। यदा यदा च[8] निद्राविच्छेदस्तदा तदा तमेव ध्यायेत्। संकीर्तयेच्च तानि नामानि पुनरानिद्रागमात्। सोऽयं प्रदोषप्रभृति-ब्राह्ममुहूर्तावधि[9] सारस्वत-

**भगवत्कैङ्कर्यरूपनिद्रानुभवप्रकारः।**

[1] व्यापारायत्तस्य—क, ख, ङ, च, छ, झ ; व्यापारायासितस्य—ग.
[2] प्रासादखट्वाङ्गपर्यङ्कन्यायेन—ग ; प्रसादखट्वापर्यङ्कन्यायेन—च.
[3] ब्रह्मणि—ख, ग, घ, ङ, छ.
[4] इत्यादिप्रक्रियया—क, ख, ग, च, झ.
[5] परमात्मनि परिष्वङ्ग—इति घ कोशादन्यत्र पाठः.
[6] शुद्धत्वादिनियमयुक्तः—घ.
[7] हृदयेऽपि—घ.
[8] च शब्दः घ कोशादन्यत्र नास्ति.
[9] मुहूर्तपर्यन्तं—ङ, छ.



स्रोतस[1] इव विश्रमान्तरितस्य योगस्यावसरः। अवसरान्तरेऽप्यैकाग्र्यसम्भवे कर्मान्तरसङ्कोचेन स्वीकार्य इति[2] प्रागेवोक्तम्॥

एवं वर्तमानस्य सर्वः कालोऽप्यवन्ध्यो भवति। सर्वे व्यापाराः कैङ्कर्यरूपा भवन्ति। सर्वोऽप्यानुषङ्गिको भोगः क्रीडाशुकक्षीरास्वादन्यायेन स्वामिभोगशेषभूतो भवतीति, भगवत्कैङ्कर्यैकरतेः परमैकान्तिनोऽनादिमायानिशावसानेऽनन्तमोक्षावसर - प्रारम्भे च प्रत्यूषवदास्थितोऽयमायुःशेषकाल इति स चायमौत्सर्गिकः क्रम उक्तः। अपवादे तु व्युत्क्रमविलोपादिप्रवृत्तिः। तथा हि—उपवासदिवसेष्वेकादश्यादिषु अनुयागस्य लोपो भवति। सप्ताङ्गमेव च[3] तदानीं यजनम्। अत एव चानुयागस्यानियतत्वव्यञ्जनाय भाष्यकाराणां तदनुक्तिः। तदर्थकालश्च[4] तस्मिन् दिवसे स्वाध्याय-योगादिष्वन्यतमेन यथोचितं यापनीयः। कदाचित् द्वादश्यादिषु प्रभाते पारणं भवति। तदर्थं पूर्वं यजने[5] कृतेऽपि स्वकालप्राप्तं मध्यन्दिनयजनं सप्ताङ्गं तिष्ठति। वैशेषिकार्चनेषु बहुषु एकदिवसे क्रमात् संभवत्सु "अङ्गगुणविरोधे च तादर्थ्यात्" इति न्यायेन उपादानादिप्रवृत्तिर्लेशतः प्रतिरुद्ध्यते। तत्र पूर्वदिवसार्जितैर्द्रव्यैः परोपनीतैर्वा तत्तत्क्रियानिष्पत्तिः। यजनं च सर्वस्मिन् कालेऽभ्यनुज्ञातम्। खिन्नवृत्तेरन्यपरस्यातुरस्य कलहाद्युपद्रुतस्य च भोजनात्

**पञ्चकालपरस्य सर्वो व्यापारः कैङ्कर्यरूपः।**

**पञ्चकालानुष्ठानक्रमस्य क्वचित् अपवादः।**

[1] स्रोत इव—क, ख, च, झ.
[2] स्वीकार्यमिति—ख, ग, घ, ङ, छ.
[3] च कारः क, ग, च, झ कोशेषु नास्ति.
[4] तदर्थः कालश्च—घ, ङ, छ.
[5] पूर्वयजने—क, ख, ग, झ.

पूर्वं यदाकदाचिल्लब्धेऽवसरे[1] भवति। अत्यन्ताशक्तौ तु ऋत्विक्-पुत्र-शिष्यादिभिः स्वसमैरन्यैः कार्यते। तत्र त्वयमपवादः स्मर्यते—

"विधुरो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः।
परार्थं कर्म कुर्वाणाः पातयन्ति पतन्ति च" ॥ इति।

ईषच्छक्तौ तु संकुचितयजनम्। एकोपचारमारभ्य तत्तच्छक्त्याद्यनुसारेण सहस्रोपचारान्तविधानात्। 'विषुवायनद्वितयपञ्चदशी' इत्यादिना प्रतिषिद्धेष्ववसरेसु वेदाभ्यासरूपस्वाध्यायो लुप्यते। तदा तत्कालमप्यनन्यपरस्य प्रधानतमो योगः समास्कन्दति। त्रयोदशीनिशामुखे च तस्याप्यपवादं केचिदिच्छन्ति। तदापि सर्वक्रियान्तरनिरोधपूर्वकं मौनव्रतमनुष्ठीयमानं सात्त्विकत्यागप्रक्रियया स्वकीयेन मया स्वप्रीत्यर्थं भगवतैव कार्यत इत्यनुसन्धेयम्। तस्मात् "आलोड्य सर्वशास्त्राणि" इत्यारभ्य "ध्येयो नारायणः सदा" इत्यादिभिरुक्तं भगवदनुस्मरणं सर्वत्र सावकाशम्। अविच्छिन्नस्मृतिसन्ततिरूपत्वादिकं तु मात्रया भज्यते।

**आशौचादिष्वपि भगवत्संकीर्तनादि कार्यम्।**

एवं मृतक-सूतकाद्यप्रायत्यकालेष्वपि प्रयतकर्तव्यशास्त्रीयसर्वकर्मविलोपः। तदानीं तु[2] मौनावसरव्यतिरिक्तः कालः संकीर्तनेन स्मरणेन च यापनीयः। 'सततं कीर्तयन्तो माम्', 'तस्मात् सर्वेषु कालेषु', 'मामनुस्मर' इत्यादेस्तदानीं निरपवादत्वात्। प्रत्युत—

"चक्रायुधस्य नामानि सदा सर्वत्र कीर्तयेत्।
नाशौचं कीर्तने तस्य पवित्रं भगवान् हरिः।
नाशौचं कीर्तने तस्य स्मरणे वापि विद्यते ॥

[1] लब्धावसरे—क, ख, ग, च, झ.
[2] विलोपवत्तदानीं—ख; विलोपास्तदानीं—ग.



अशुचिश्चाप्यनाचारः सर्वावस्थां गतोऽपि[1] वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यान्तरःशुचिः" ॥

इत्यादिभिः कीर्तन-स्मरणयोराशौचकालेऽपि अनुष्ठेयत्वोक्तेः। किंच,[2]

"संकीर्तयेज्जगन्नाथं वेदं वापि समीरयेत्।
ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन्।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम्" ॥

इत्यादिभिः देश-कालावस्थाधिकार्याद्यविशेषेण[3] वेदाभ्यास-ध्यान-यजनार्चन[4]-स्थाने तुल्यफलतया संकीर्तनस्य विहितत्वात्, प्रपन्नाभिमतभगवत्प्रीतेश्च तावतैव सुलभत्वाच्च सर्वदेश-सर्वकालाधिकार्याद्यनुगुणं संकीर्तनमेव कर्मान्तरलोपकाले समुचितम्। विशेषतः कलिधर्मत्वाच्च[5]। कलौ युगे प्रयतस्यापि ह्यन्याशक्तस्य तदेव युक्तम्। यथाह भगवान् शौनकः—'कीर्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत्' इति। अत एवाभिगमनस्य न कदाचिदपि लोपः। अप्रयतस्यापि दूरावस्थितस्य[6] संकीर्तन-प्रणामाञ्जलिबन्ध-भाषास्तोत्र-लौकिकवाक्यमात्रपूर्वकप्रपदनैरपि तत्स्वरूपनिष्पत्तेः।

ननु [7]भागवतस्य सदाचार्यसकाशात् सम्यगधिगतवेदान्तस्य ब्रह्मवित्त्वेन सद्यःशौचविधानादनुवृत्ताशौचासिद्धेः कथं कर्मविलोपः। मैवम्।

[1] सर्वावस्थागतोऽपि—घ, ङ, छ.
[2] किंच इति शब्दो घ कोशे नास्ति.
[3] अधिकार्यादिविशेषेण, घ; अधिकार्यादिविशेषेण विहितवेदाभ्यास—ख, ग; अधिकार्याद्यविशेषेण विहितं वेदाभ्यास—क, झ.
[4] ध्यानजपार्चन—क, ख, ग, घ, च.
[5] कालधर्मत्वाच्च—क, ख, ग.
[6] दूरादवस्थितस्य—घ, ङ, छ.
[7] भागवतसदाचार्य—क, ख, छ, झ; भागवतस्य सदाचार्यस्य—घ.

रहस्याम्नायनिष्ठानामेव तच्छाखागृह्योक्तप्रक्रियया तदभावात्। मन्त्रसिद्धान्तादिनिष्ठानां तु दीक्षितानामपि प्रक्रान्तमहोत्सवाधिकारिष्वेव तन्निषेधः। यद्यपि ब्रह्मवित्त्वमेतेषामविशिष्टं[1] तथापि कृतादिषु त्रिषु[2] युगेषु तेषामपि सद्यःशौचम्।

**ब्रह्मविदामपि आशौचानुष्ठानम्।**

"वृत्तस्वाध्यायसंपन्नस्याघसंकोचनं तथा" इति घटिका[3]व्यवस्थावचनेन कलियुगे वृत्तादिनिमित्ताघसंकोचप्रतिषेधात्। न च वाच्यम्—

"एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः।
त्र्यहात् केवलवेदस्तु निर्गुणो दशभिर्दिनैः" ॥

इत्यादिषूक्तस्याग्निवेदादिनिमित्तस्याघसंकोचस्यायं प्रतिषेधः, नतु ब्रह्मवित्त्वनिमित्तस्येति[4]। मैवम्। यथोक्तब्रह्मविदामपि वृत्तगुणशब्देन ग्रहणसम्भवे संकोचकाभावात्। न च ब्रह्मविच्छब्देन प्रव्रजितग्रहणम्। ब्रह्मविदां प्रव्रजितानां च सद्यश्शौचार्हत्वेन[5] पृथगुपादानात्[6]। तर्हि "सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा" इति सहपठितानां सत्रिप्रभृतीनामपि सत्र-व्रत-ब्रह्मचर्य-दानादिगुण[7]निमित्तम् अघसंकोचनमिति तेषामप्येतत् अन्तिमयुगे

[1] ब्रह्मवित्त्वं तेषामप्यविशिष्टं—क, ख, ग, च, झ; ब्रह्मवित्त्वमेव तेषामविशिष्टं—ङ, छ.

[2] त्रिषु शब्दः क, च, झ कोशेषु नास्ति.

[3] घटिका इति पदं क, ख, ग, झ कोशेषु नास्ति.

[4] इति शब्दः घ, च कोशयोः नास्ति.

[5] सद्यश्शौचानर्हत्वेन—घ, ङ, छ.

[6] पृथगुपादानात्। यथोक्तम् . . . . . . मैवम्। ब्रह्मवेदनादीनामपि—ङ, छ; ब्रह्मवादिनामपि—घ; पृथगुपादानादिति यथोक्तब्रह्मविदामपि—च. अत्र कोशाः पाठतो बहुधा भिद्यन्ते। अस्मिंस्थले—ख, ग, घ, ङ कोशेषु यथोक्त इत्यस्यानन्तरं मैवमित्यस्य पूर्वं च पङ्क्तिलोपसूचकानि चिह्नानि च दृश्यन्ते। अतो वाक्यार्थो नात्र स्पष्टः.

[7] गुण इति पदं क, ख, ग, झ कोशोषु नास्ति.



न स्यादिति चेन्न;[1] अनुष्ठानतस्तद्व्यवस्थापनात्। अद्यापि हि सद्यःशौचं व्रत्यादिषु शिष्टैरनुष्ठीयते। न शारीरकाधिगम[2]सिद्धब्रह्मवेदनवतामपि गृहस्थानां क्वचित् तथानुष्ठानं[3] दृश्यते। अनन्तबाह्यकुदृष्टिसिद्धान्तव्याकुलतत्त्वाध्यवसाये, रागादिदोषान्धकारबहुले, बहुलनिशीथखद्योतकल्पगुणलवेऽपि[4] कलिविलुप्तस्वधर्मवर्गेऽस्मिन् काले ब्रह्मविदामसंभवादेव तथानुष्ठाना[5]दर्शनमिति चेत्, तर्हि कस्येदानीं ब्रह्मविदः सद्यःशौचेन कर्मलोपं परिजिहीर्षसि।

"कलौ कृतयुगं तस्य कलिस्तस्य कृते युगे।
यस्य चेतसि गोविन्दो हृदये यस्य नाच्युतः" ॥

इति न्यायेन यः कश्चिद्यत्रक्वचिद्ब्रह्मविदथापि[6] संभवतीति चेत् सत्यम्। स तावत् व्यासागस्त्य-भृगुपति-विभीषणप्रभृतिभिस्त्वयाप्यदृष्टे क्वचित् प्रदेशे वर्तमानः स्वान्तरात्मसाक्षिकं तथानुतिष्ठतु नाम। तदन्येषां[7] तु भागवतमर्यादां प्रविष्टानां परिपूर्णब्रह्मवित्त्वाभावेऽपि [8]ह्युपनीतावस्थत्वमात्रेण द्विजत्ववत् संस्कार-वेषादियोग[9]मात्रेण भागवतत्वमात्रं सिद्धमिति तावन्मात्रवैशिष्ट्य[10]शालिनां तन्निबन्धनाघसंकोचे प्रमाणं क्वचिन्न पश्यामः। अत एव हि[11]

[1] न इति पदं क, ख, ग, च, झ कोशेषु नास्ति.

[2] शारीराधिगम इति घ कोशादन्यत्र पाठः.

[3] तदनुष्ठानं—क, ख, ग, च, झ.

[4] अपि शब्दः क, ख, ग, च, झ कोशेषु न दृश्यते.

[5] तदनुष्ठानादर्शनं—क, ख, ग, च, झ.

[6] ब्रह्मविदपि—क, ख, ग, च, झ.

[7] अन्येषां—क, ख, ग, च, झ.

[8] हि शब्दः—घ, ङ, छ कोशेषु नास्ति.

[9] संस्कारविशेषादियोग—क, ङ, च, छ, झ.

[10] वैशिष्ट्य—घ कोशादन्यत्र नास्ति.

[11] हि घ कोशे नास्ति.

तेषामपि पौष्करादिषु आशौचमनुमतम् । यत्तु तत्रत्यसंस्कारविशेषवतः कस्यचित् आशौचकालेऽपि मानसयागमात्रमनुमन्यते तत् गायत्रीस्मरणपूर्वकजलाञ्जलिप्रक्षेपन्यायेन नेतव्यम् । विष्ण्वर्चनमपि हि[1] प्रत्यक्षश्रुतिसिद्धं नित्यं चेति प्रागेवोक्तम् । मानसयागमात्राभ्यनुज्ञानेन[2] शेषनिषेधश्च तत्रापि सिद्ध इति ।

तदेवं स्वतः प्राप्तिमपवादप्रकारांश्च[3] यथावदधिगम्यायं धर्मोऽनुष्ठेयः ।

**धर्मानुष्ठानप्रकारस्य दुरूहत्वम् ।**

"एकं यदि भवेच्छास्त्रं ज्ञानं निस्संशयं भवेत् ।
बहुत्वादिह शास्त्राणां ज्ञानतत्त्वं सुदुर्लभम्" ॥

इत्यादिभिर्याथार्थ्येन अतिवितत-गहन-गम्भीर-विविध-विकल्पबहुतरशास्त्रसंक्षोभजनितदिङ्मोहशान्तये सर्वैः सङ्कलनमात्रं[4] त्विह कृतम् । अनेनैव प्रस्थानेन प्रशमितदिङ्मोहैः समर्थैः आप्रभातादनुष्ठेयानि सर्वाणि कर्माणि प्रत्येकं बहुतरेतिकर्तव्यतामुख्यानुकल्पविकल्पापवादादिविधायकतत्तच्छास्त्रेषु यथावदधिगम्यानुष्ठेयानि । हन्त तर्हि दुर्ज्ञाने दुष्करेऽस्मिन् प्रस्थाने को नाम [5]अद्याधिकारी स्यादिति चेत्, मैवं भेतव्यम् ।

**भगवत्पूजनस्य नित्यत्व-सुकरत्वादिकम् ।**

[1] हि शब्दः क, च, झ कोशेषु नास्ति.

[2] मात्रानुज्ञानेन—क, च, झ.

[3] स्वतःप्राप्तिमपवादप्रकारं च—क, ख; स्वतःप्राप्तानपवादप्रकारांश्च—ग; स्वतः प्राप्तमपवादप्रकारं च—च.

[4] शान्तये कलामात्रं—ङ, च, छ; शान्तये सर्वैः सङ्कलन इति पङ्क्तिः घ कोशे "उपनीतावस्थत्वमात्रेण" इति पूर्वनिर्दिष्टवाक्यस्यानन्तरं प्रमादवशाल्लिखिता प्रतिभाति.

[5] अद्य इति शब्दः क, ग, च, झ कोशेषु नास्ति.



"न विष्ण्वाराधनात् पुण्यं विद्यते कर्म वैदिकम् ।
सर्वेषामेव धर्माणामुत्तमो वैष्णवो विधिः" ॥

"नित्यं विष्ण्वर्चनं परम्" इत्यादिभिः सर्वोत्तरत्वेन च[1] नित्यत्वेन च श्रुतेऽस्मिन् धर्मे अष्टवर्षस्य ब्रह्मचर्यधर्म इव यथाकथंचिदनुप्रवेशस्यापि[2] युक्तत्वात्,

"स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ।
न हि कल्याणकृत् कश्चिद्दुर्गतिं तात गच्छति ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते" ॥

इत्यादिन्यायेन[3] भगवतैवाश्रितवत्सलेन शेषपूरणात् । स्मरन्ति च—

"सकृदुच्चरितं[4] येन हरिरित्यक्षरद्वयम् ।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति" ॥
"साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ।
वैकुण्ठनामग्रहणमशेषाघविनाशनम्" ॥
"सकृत् स्मृतोऽपि गोविन्दो नृणां जन्मशतैश्चितम् ।
पापराशिं दहत्याशु तूलराशिमिवानलः" ॥
"हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ।
अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः" ॥
"दुर्गसंसारकान्तारमपारमभिधावताम् ।
एकः कृष्णनमस्कारो मुक्तितीरस्य देशिकः" ॥

[1] च शब्दः क, ख, ग, च, झ कोशेषु नास्ति.

[2] अपि शब्दः क, ख, ग, च, झ कोशेषु नास्ति.

[3] इति न्यायेन—क, ख, च, झ.

[4] सकृदुच्चारितं—घ, ङ, छ.

"एकोऽपि कृष्णे सुकृतप्रणामो दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय" ॥
"उपोषितः पोषितो वा दुष्टो वा[1] प्रणतोऽपि वा ।
प्रसह्य हरते पापं को न सेवेद्धरिं ततः" ॥
"को हि भारो[2] हरेर्नाम्नि जिह्वायाः[3] परिकीर्तने" ।
"आयासः स्मरणे कोऽस्य स्मृतो यच्छति शोभनम् ।
पापक्षयश्च भवति स्मरतां तमहर्निशम्" ॥
"किं त्वया नार्चितो देवः केशवः क्लेशनाशनः ।
उदकेनाप्यलाभे तु द्रव्याणां पूजितः प्रभुः" ॥
"अन्यत्पूर्णादपां कुम्भादन्यत्पादावने जनात् ।
अन्यत्कुशलसंप्रश्नान्न चेच्छति जनार्दनः" ॥
"पत्रेषु पुष्पेषु फलेषु तोयेष्वक्रीतलभ्येषु सदैव सत्सु ।
भक्त्येकलभ्ये पुरुषे पुराणे मुक्त्यै किमर्थं क्रियते न यत्नः" ॥
"पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः" ॥
"अण्वप्युपहृतं भक्तैर्मम तोषाय[4] कल्पते" ॥ इत्यादि ।

उक्तं च नारदीये श्रीमदष्टाक्षरब्रह्मविद्यायां षोडशोपचारोक्त्यनन्तरम्—

"एवमष्टाक्षरेणैव सर्वत्रार्चनकर्मणि ।
उपचारानिमान् कुर्वन् भक्तियुक्तेन चेतसा ॥

[1] दुष्टो वा इति छ कोशादन्यत्र पाठः.
[2] कोऽतिभारः—क, ख, ग, ङ, च, छ, झ.
[3] जिह्वया—क, ख, झ.
[4] मम भोगाय—ख, ग, घ.



तुलसीपद्मपालाशसुवर्णकुसुमैः शुभैः ।
पूजयित्वा जगन्नाथं फलमानन्त्यमश्नुते ॥
गन्धैः पुष्पैः फलैर्मूलैः पत्रैर्वारिभिरेव[1] वा ।
नित्यं भगवतः पूजां यथासम्भवमाचरेत् ॥
समस्तलोकनाथस्य देवदेवस्य शार्ङ्गिणः ।
साक्षाद्भगवतो विष्णोः पूजनं जन्मनः फलम्" इति ।

एतेन भगवत्पूजनस्य नित्यत्वं सुकरत्वं स्वयंप्रयोजनत्वं च व्यक्तमुक्तम् ।

यत्पुनरिदं विकलसमाराधनादौ प्रत्यवायादिकमुच्यते—

**नित्यार्चने वैकल्येऽपि दोषाभावः ।**

"सर्पं दृष्ट्वा यथा कायं[2] कम्पते च मुहुर्मुहुः ।
अमन्त्रमर्चकं दृष्ट्वा तथा भीतो[3] जनार्दनः ॥
गन्धहीने भयोत्पत्तिः पुष्पहीने तु संकुलम् ।
नैवेद्यहीने[4] दुर्भिक्षं मरणं मन्त्रहीनके ॥
अमन्त्रमविधिं चैवमकालं चैव पूजनम् ।
नित्यं राष्ट्रभयं कुर्यात् तद्ग्रामं[5] तु विनश्यति ॥
अमन्त्रेणैव यत्पूज्यं पिशाचासुरवर्धनम् ।
व्याधितस्करदोषौ च अनावृष्टिर्महद्भयम्" ॥

[1] फलैः पत्रैर्धूपैर्वारिभिः—क, च, झ.
[2] दृष्ट्वा नरः कायं—ख, ग, ङ, छ ; दृष्ट्वा महाकायं—घ ; दृष्ट्वा यथा कायी—च.
[3] महाभीतः—घ.
[4] निवेद्यहीने—ख, ग, घ, ङ, छ.
[5] ग्रामस्तु इति चेत् साधुः.

इत्यादि तदेतत् सर्वं राज-राष्ट्रादिसमृद्ध्यर्थ[1]काम्याराधनेषु अन्येष्वपि पूर्णानुष्ठानशक्तस्य संपूर्णद्रव्यस्य लोभादिभिस्तत्तद्धानौ मुख्यकल्पसमर्थस्यानुकल्पेन वृत्तौ च[2] दोषमाह । न तु नित्ये कर्मणि[3] निष्कामस्य यथाशक्तिकरणे । स्मरन्ति च मन्वादयः—

"वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः ।
तद्धि कुर्वन् यथाशक्ति प्राप्नोति परमां गतिम्" ॥ इत्यादि ।

अस्ति चान्यो भगवद्धर्मस्य विशेषः, यमधिकृत्यायं सात्त्वतसंग्रहः—

"सकृत् त्र्यहं च सप्ताहं पक्षं मासमथापि वा ।
यो यजेद्विधिनानेन भक्तिश्रद्धासमन्वितः ॥
सोऽपि यायात् परं स्थानं किं पुनर्योऽत्र संस्थितः[4] ।
यावज्जीवावधि कालं बद्धकक्षो महामतिः" ॥ इति ।

एतदेव संक्षिप्तं नारायणमुनिभिः—

"दिनमेकमपि प्रीतो यः कुर्यान्मतिमान्नरः ।
सुकृती किं पुनर्यावज्जीवमेवं समाचरेत्" ॥ इति ।

उक्तं चाहिर्बुध्न्येन—

"समाराधयतस्त्वेवमेकाहमपि नारद ।
मुक्तिः करे स्थिता[5] तस्य सर्वे कामाश्च किं पुनः" ॥ इति ।

[1] समृद्ध्यर्थं—क, ख, ग, च, झ.
[2] प्रवृत्तौ च—क, ख, ग, च, छ.
[3] नित्यकर्मणि—क, च, झ.
[4] योगसंस्थितः—क, ख, झ.
[5] करस्थिता—क, ख, ग, च, झ.



And as such there occurs the position of souls having bodies in common.

112. And a certain attribute of the elements itself is not special for a sentient soul, since there is seen the opposite. If it be said that it is like number two etc. it is not so, since that too, being similar to body etc. is only a minor term. Even for it the rule is only by association with definite attributes of the sentient soul, and not merely by being produced by that; because in itself there is no difference.

113. Even then, in respect of the explanation of the rule through being produced by that, what is the invalidating factor in the opposite case? If this is asked, the reply is that there is the occasion for the break down of the relation of cause and effect; because for body etc., there is found the production of the attributes only in association with the attributes of the sentient soul.

114. It is thus. Volition is produced in association with desire. Desire etc. are produced in association with cognition. Pleasure etc. are produced in association with them; and so on.

115. If it be said that even in the present context, cognition etc. abiding in the sentient soul can be the regulating factors, it is not so; because prior to body etc. they do not exist. And in that way, the sentient beings are devoid of any excellence, and the elements are common; and thus there is no regulation of enjoyment. By this the Sankhya doctrine is refuted.

116. Indeed it is thus. The Purusha is neither a cause nor an effect and is of the nature of immutable sentience. The Prakriti is the primeval cause, non-sentient and subject to modification. Thence is the creation of Mahat (intellect) and others. Indeed, the sentience in itself cannot be of the nature of being in bondage to objects, since that would occasion the impossibility of beatitude. Nor can the Prakriti in itself be of the nature of belonging to Him; because even then, since it is eternal, there occasions the impossibility of beatitude. Nor can it be through the channel of the sense-organs alone, since there is the occasion for admixture. Nor is it through the opening of the sense-organs and mind; because one, even being a man, who has the conceit of being a boar or a tiger etc. in the state of dream, cannot think of himself as a man. Nor is it through the operation of evolutes as far as egoism; because in the state of deep sleep, though there is the cessation of their operations, there is the continuation of the series of breathing-activity.

117. Therefore, that which persists as the same, having an activity in these states, and depending on which there is the residue of experience, an object which presides over such an internal organ becomes the conditioning factor for the Purusha. And because of the non-cognition of the difference, there is the conceit of being the doer in that Purusha though devoid of activity; and there is the conceit of sentience in that which is non-sentient. In that



is the residue of the activities. The Purusha on the contrary is free from taint like the leaf of a lotus.

118. Apprehension is the activity of the sense-organs. And the activity of the mind is specification. Conceit is the activity of egoism and determination of volition, of the intellect. Indeed that intellect has three parts. The parts are the reflection of the Purusha, the reflection of the object and entering into the activity. Indeed it is of the form "by me is this to be done." Among them, the reflection of the sentient being as "by me" is unreal because of the non-cognition of the difference, like the reflection of the face on the mirror. The reflection of the object as "this," which is a particular modification through the channel of the sense-organs, is real like the dimness of the mirror when one blows his breath on it, also the setting up of activity abiding in these two.

119. Here, knowledge is of the nature of the reflection of the objects on the intellect, which has the nature of such activity. What is called cognition is the relation of the unreal reflection on the Purusha with this (knowledge), like the stain on the face reflected on a (stained) mirror. Then, in this way, the eight dispositions beginning with virtue are only for the intellect, because they are concluded as co-existing with that on a common substratum. And it is not reasonable that the intellect itself is by nature sentient, since it is subject to modification, and because Purusha is immutable and eternal.

120. This has been refuted even before. It is thus:

**What determine (the experience) are the merits (and demerits) of the performer; and to us he himselt is the sentient being. Otherwise there would be non-beatitude; or the non-origination of the world is certain.**

121. Now it has been settled that virtue etc., established as co-existing in the same substratum with volition, are what determine (the experience). And the sentient being is the doer himself, because sentience and volition are experienced as co-existing in a common substratum. This is not an illusion, since there is nothing to sublate.

122. If it be said that what can sublate it is (the probans)—" because it is subject to modification, like a jar etc.", it is not so; for even in the case of being the doer, it is the same. And thus volition too cannot be a natural attribute of the Mahat (intellect).

123. If it be said that since it is experienced, there is no defect, it is equal. If it be said that " being the product of what is insentient " is what sublates because there is identity between the cause and the effect, it is not so, because of non-establishment.

124. Indeed there is no proof for the doer being a product. On the contrary according to the dictum " because birth is not seen for one devoid of attachment " (Ny. Su. 3-1-25), what is established is only beginninglessness. And whatever form is noticed in the effect, if each of them is the nature of the cause,



attachment and others too become necessarily acceptable in the Prakriti. And thus that in itself is the intellect, and is not the Prakriti, since it is endowed with the eight-fold dispositions.

125. If it be said that they exist in it in a subtle form, leaving off their grossness, sentience too can be there in a similar way. Thus too is the probans non-established.

126. It it be said that in such an event there is the occasion for the jar and other things too being sentient because of identity, the occasion for their having attachment etc. is also difficult to avoid. And being subtle is equal.

127. Therefore if from a cause of a particular class an effect of a particular class is found (to be produced), (a cause) of such nature alone can be inferred from (an effect) of such nature, but not that whatever attributes there are in the cause, all such attributes are in the effect, since there is deviation. Thus why should there be this irrelevant topic?

128. And if intellect is eternal, there occurs non-beatitude; for if the Purusha has this adjunct eternally, he cannot remain in his own nature. Now, if it perishes, then there being a beginning since there can be no destruction for what has no beginning, what is the determinant at the stage prior to its production, the Prakriti being uniform? And in this way there is the non-origination of the world.

129. If it be said that since there can be the persistence of the residues of the intellect which was prior

and still prior, (the Prakriti) though uniform can be multifarious, then there is contradiction to the doctrine in so far as there can be persistence for the residues of its attributes even after the retirement of the intellect.

130. If it be said that there is no such defect because of its being subtle, there is occasion for its subsequent operation even after beatitude. If it be said that this cannot be so since there is no competence, then let intellect itself, having the competence, but remaining in a dormant nature, be the Prakriti. There is no need to assume distinct categories corresponding to the terms Prakriti, egoism and mind.

131. Indeed that (intellect) itself, becoming the sphere of such and such statements, are designated by such and such terms, like the breaths in the body; thus scriptural statements also are justified. In this way too is the probans non-established.

132. The non-functioning of the intellect by the cessation of its competence is beatitude. Competence is association with residue. Thence arises the world. When there is absolute difference between the attributes and the substratum, there is incompatibility for immutability. And the difference of the nature of superimposition of incompatible attributes is established through experience, like jar and cloth.

133. And through co-existence in a common substratum there does not arise non-difference too. Indeed that consists in being expressed by the same term, being the sphere of the same cognition, having the same substratum. The relation of the container and



the contained, being the qualified, a mere relation, can be only in difference. And what is reasonable even in difference does not affect non-difference. Thus everything is clear.

134. Let this be so. If there is the existence of an experiencer who is eternal and all-prevading, then all this can be so. Whence is he himself? For it is the elements themselves that are sentient. Elements modified in the form of the body are such, since it is so obtained by concomitance and non-concomitance. But the residues of action and knowledge, confined to particular elements in all cases, can persist, whence there is the regulation of the re-cognition of experience.

135. If it be so said, the reply is—

**Another one cannot remember what yet another one has seen. The element is not the same, since it drops off. There is no transference of the residue. And there is no other course in the case of eternity.**

136. Indeed, sentience is not what abides in the aggregate of the elements; for when that is different day after day, there is occasion for the non-recollection of what was experienced on the previous day and on the still previous one. Nor is it what abides in each of them separately; for in the event of the loss of the hand, foot etc., there is unreasonableness for the recollection of what was experienced by them.

137. Nor is it that just like the residue of the musk in a clothe, the residue in one is transferred to

another through association; for there is occasion for recollection by the baby in the womb of what was experienced by the mother. And regulation through the relation of material cause and its effect is no recourse, because in the alternative of eternality, that is impossible for the ultimate atoms, and because in respect of a part of the whole, what are cut off are not material causes, and because there is destruction of the whole that existed before.

138. Then let there be destruction (of everything) after a moment. And there is no passing over the excellence; on the contary since it is overcome by similarity, it is not even for a moment realised (as a savikalpaka cognition). It is inferred through the perception of the effect, like the excellence of the final (effect). And thus it is only the elements that are produced in such and such ways in which ways the regulation of the re-cognition etc. is also justified.

139. This can be so, when momentariness is established. But that itself has been refuted elsewhere.

140. Further

**Without variety there cannot be that (momentariness). If it is there, inference is impossible. Without that there is no establishment of that. There cannot be (nirvikalpaka) perception without definitive (savikalpaka) knowledge.**

141. When there is the acceptance of the fact that in the matter of production and non-production of what just belongs to a particular class, what



द्विः सकृत्स्पृश्य पत्पाणिद्वन्द्वे च हृदि चोऽर्ध्वतः ।
उत्तरोष्ठे नासिकाक्षिकर्णनाभ्युरसि स्पृशेत् ॥ ४३ ॥
पाण्योः कपोलयुग्मे च मुखे पादद्वयेऽपि च ।

ओम् आपो हि ष्ठा मयोभुवः पादद्वयम्
,, ता न ऊर्जे दधातन-पाणिद्वयम्
,, महे रणाय चक्षसे-हृदयम्
,, यो वश्शिवतमो रसः-उत्तरोष्ठम्
,, तस्य भाजयतेहनः-नासिकाद्वयम्
,, उशतीरिव मातरः-नेत्रद्वयम्
,, तस्मा अरङ्गमामवः-कर्णद्वयम्
,, यस्य क्षयाय जिन्वथ-नाभिम्
,, आपो जनयथा च नः-उरसि
} अद्भिः इमानि उपस्पृशेत्

ओम् भूः अङ्गुष्ठेन पाणिद्वयं कपोलौ च संस्पृशेत्
ओम् भुवः अङ्गुलिभिः मुखं पादद्वयं च ॥
ओ॰ सुवः ,, शिरः अलीकं च ॥
ओम् महः अङ्गुष्ठतर्जनीभ्यां नासाद्वयं वक्त्रं च ॥
ओम् जनः अङ्गुष्ठानामिकाभ्यां नेत्रद्वयम् ॥
ओम् तपः अङ्गुष्ठकनिष्ठिकाभ्यां श्रोत्रद्वयम् ॥
ओ॰ सत्यं अङ्गुष्ठमध्यमाभ्यां भुजद्वयम् ॥
ओम् तत्सवितुर्वरेण्यं-पाणितलेन नाभिं संस्पृशेत्
ओम् भर्गो देवस्य धीमहि ,, हृदयम् ,,
ओम् धियो यो नः प्रचोदयात्-अङ्गुल्यग्रेण मुखं संस्पृशेत्
ओम् ओमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् } अङ्गुल्यग्रेण ललाटं संस्पृशेत्
ओम् परो रजसि सावदोम्-मुकुलिताङ्गुलिभिः मूर्धानं संस्पृशेत्
अथवा
ओम् ओमापो ज्योतीरसोऽमृतं अङ्गुल्यग्रेण ललाटं संस्पृशेत् ॥
ओम् ब्रह्म भूर्भुवस्सुवरोम्-करेण सर्वाण्यङ्गानि ॥
ओम् परो रजसि सावदोम्-मूर्धानं संस्पृशेत् ॥

शिरस्यलीके घ्राणे च वक्त्रे चाक्षिणि घोणयोः ॥ ४४ ॥
श्रोत्रयोरंसयोर्नाभौ हृदि प्राणे ललाटके ।
व्याहृतीभिश्च गायत्र्या शिरसाऽङ्गानि चालभेत् ॥ ४५ ॥
तुर्यपादेन मूर्धानं संस्पृशेत्तु ततः परम् ।
पापक्षयकरं ह्येतत् कुर्यादाचमनं बुधः ॥ ४६ ॥
[1]एवं द्विवारमाचम्य सन्ध्योपासनमाचरेत् ।

[2](ब्रह्मयज्ञाचमनम्)

ब्रह्मयज्ञस्याचमनं वक्ष्यामि श्रुतिसंमतम् ॥ ४७ ॥
ओंकारं पूर्वमुच्चार्य भूरिति व्याहृतिं ततः ।
ऋग्वेदः प्रियतां पश्चात् गायत्र्याः प्रथमं पदम् ॥ ४८ ॥
अं अकारात्मने चैव ह्यच्युताय नमः पदम् ।
स्वाहाशब्दं ततश्चोक्त्वा प्रथमाचमनं चरेत् ॥ ४९ ॥
द्वितीयां व्याहृतिं पश्चात् प्रणवेन समन्विताम् ।
यजुर्वेदः प्रीयतां च देव्या मध्यपदं ततः ॥ ५० ॥
उं उकारात्मने चैव ह्यनन्ताय नमः पदम् ।
स्वाहाशब्दं [3]ततश्चोक्त्वा द्वितीयाचमनं चरेत् ॥ ५१ ॥
तारं सुवः पदं चोक्त्वा सामवेदप्रियां ततः ।
देव्यास्तृतीयपादं तु मं मकारात्मने ततः ॥ ५२ ॥

[1] एतद्द्विवा—अ.
[2] ( )—घ, ङ.
[3] समुच्चार्य—ख, ग, घ, ङ, छ.



गोविन्दाय नमः पश्चात् स्वाहाशब्दं ततो वदेत् ।
These things of man's true freedom belong to fortitude or valour and to generosity. The valorous man hates nobody, is angry with nobody, envies nobody, is displeased with nobody, despises nobody, and is least of all proud. The valorous man considers this in the first place, that everything follows from the necessity of the divine Nature, and that therefore everything which he thinks to be harmful and evil, and further everything which seems to be impious, dreadful, unjust and base, springs from the fact that he himself knows things only in a disturbed, fragmentary and confused manner. And for this reason he strives above all to understand things as they are in themselves, and to remove the impediments to true knowledge, as for example hate, anger, envy, redicule, pride, and such like things. And therefore, as much as he can, he will try, as we have said, *to do well and to rejoice.*

*Actions and Passions* [2]

1. All our strivings or desires follow from the necessity of our nature in such a manner that they can be understood

[1] From Sch. to Pro. 73.

[2] Appendix. The division in paragraphs as well as their numbering are taken from the original.

either through our nature alone as their nearest cause, or in so far as we are a part of Nature which in itself, without other such parts or individuals, cannot be adequately conceived.

2. Desires, which follow from our nature in such a manner that they can be understood through our nature alone, are those which regard the mind in so far as it is conceived as consisting of adequate ideas. All other desires do not regard the mind except in so far as it conceives things inadequately, and in so far as their force and increase are not determined by man's power but by things outside us. Therefore, those first desires are rightly called actions, but these other desires are called passions, for those always show our power, and these on the contrary our impotence and partial knowledge.

3. Our actions, that is those desires which are determined by man's power or reason, are always good, but the others may be good as well as evil.

*Man's greatest happiness is to know himself*

4. In life, therefore, it is of the utmost good to perfect the understanding or reason as much as we can, and in this one thing consists man's greatest happiness or beatitude. For beatitude is nothing else than that acquiescence of the spirit which springs from the intuitive knowledge of God. But to perfect the understanding is also nothing else than to understand God with his attributes and actions, following from the necessity of his Nature. Wherefore the ultimate end of a man guided by reason, that is the highest desire by which he studies to moderate all the other desires, is that by which he is led adequately to know himself and all things which fall within his understanding.



*Let understanding be the Law*

5. Therefore, there is no rational life without understanding, and things are good only in so far as they help men to enjoy the life of the mind determined by understanding. But on the contrary, the things which hinder man from perfecting his reason and enjoying the rational life, these alone we declare to be evil.

6. But because all those things of which man is the efficient cause, or which are entirely in his power, are of necessity good, therefore nothing evil can befall man except from outside causes, namely in so far as he is a part of the whole of Nature, the laws of which human nature is forced to obey, and to which it has to adapt itself in almost an infinite number of ways.

*Intercourse with Others*

7. Neither can it be that man is not a part of Nature and does not follow its common order. But if he dwells amongst other such parts, or individuals, who agree with his Nature, then his power of action is helped and fostered. But if on the contrary amongst such there are those who least agree with his nature, then he will hardly be able, and not without great change of himself, to adapt himself to them.

8. Anything that exists in Nature, which we judge to be evil or apt to hinder our ability to exist and to enjoy a rational life, we are allowed to remove from our path in such a manner as seems safest. And anything on the contrary which he judges good or useful for the preservation of our existence and the enjoyment of a rational life, we are allowed to take for our use and to use for ourselves in every way. And absolutely every one is by the highest right of Nature allowed to do that which he judges conducive to his own good or usefulness.

*Education of man in a rational life*

9. Nothing can agree better with the nature of a thing than other individuals of the same kind. Therefore, there is nothing of greater good to man for the preservation of his existence and the enjoyment of a rational life, than a man who is guided by reason. Further, because amongst single things we know of nothing more excellent than a man who is led by reason, therefore by nothing can anyone show better how much he is worth in skill and talent, than by the education of men in such a way that they live at last by the due reign of reason.

*Men are most dangerous*

10. In so far as men are borne away by envy, or any other passion of hatred against each other, in so far are they opposed to each other, and are consequently to be feared, and the more so, because they are more powerful than any other single thing or individual in Nature.

*Minds are not vanquished by arms*

11. Minds, however, are not vanquished by arms, but by love and generosity and bounty.[1]

*Friendship is the greatest good*

12. It is for men's greatest good to contract friendships and to bind themselves with such bonds as can best make of them all one man, and absolutely to do those things which serve to confirm friendships.

*Evil Carping*

13. But for this, skill and vigilance is required. For men are changeable (since rare are those who live according to the dictates of reason), and mostly envious, and leaning more to revenge than to compassion. To bear with each one according to his character, and to restrain himself, nor to imitate their passions, requires a singular power of mind. But those who on the contrary know only how to carp at men, and to reprove their vices rather than to teach them virtues, and not to strengthen but to strangle man's spirits, those are harmful both to themselves and to all others. Wherefore many, because of too great impatience of mind and false religious zeal, have preferred to live amongst brute nature rather than amongst men; just as boys or youths who are unable to bear with an equal mind the rebukes of their parents, fly to the army, and choose the discomforts of war, and the reign of tyranny rather than the domestic comforts and the paternal admonitions, and suffer whatever burdens are imposed upon them, if only they may revenge themselves upon their parents.

[1] See Par. 17.



*Concord*

14. Though, therefore, men mostly govern all things by desire, yet from their mutual association in a commonwealth or Society follow more advantages than disadvantages. Wherefore it is better to bear their harmful deeds with an equal mind, and to apply zeal to those things which serve the binding together in concord and friendship.

15. The things which engender concord are those which regard justice, equality, and honesty. For men, besides that which is unjust and iniquitous, bear ill also what is held base, or that anyone should despise the accepted customs of the State. To the binding together in love, however, those things are in the first place necessary, which regard religion and piety.

16. Further, concord is wont to be engendered mostly from fear, but then it is without loyalty. Add to it that fear arises from impotence of mind, and therefore does not belong to the use of reason; neither does pity, though it seems to bear on its face the appearance of piety.

*Charity*

17. Men are also vanquished by bounty, especially those who have not wherefrom to produce such things as are necessary for the sustenance of life. But still, to give help to every poor far surpasses man's power and the utility of a private person. For the riches of a private man are by a long way insufficient to supply that help. Besides, the power of one man is too limited than that he can bind all in friendship to himself, wherefore the care of the poor is incumbent on the whole community, and concerns the common good.

18. In the acceptance of benefits and the return of thanks, a wholly different course must be taken.[1]

*Sensual Love*

19. Sensual love, that is the lust to copulate, which arises from the sight of an external form, and absolutely all love which has another cause than freedom of mind changes easily into hate, unless, which is worse, it is a kind of rage, and then discord is fostered rather than concord.

*Matrimony*

20. As regards matrimony, it is certain that it is in accord with reason if the desire to join the bodies is not engendered solely by the external form, but also by the love to beget children and wisely to educate them, and if, besides,

[1] Consult above, "The Free Man". A. A.



the love of both, of man as well as woman, has as its cause not only the external form, but specially freedom of mind.

*Flattery*

21. Further, flattery engenders concord, but by the foul crime of slavery, or perfidy; none are more captured by flattery than the proud, who wish to be the first but are not.

*Self-abasement or Servility*

22. In self-abasement or servility, there is a false appearance of piety and religion. And though abasement is contrary to pride, yet the servile are akin to the proud.

*Shame*

23. Shame also promotes concord in those things which cannot remain hidden. And because shame is a kind of sorrow, it does not arise from the use of reason.

*Other Passions of Sorrow*

24. The remaining passions of sorrow for men are directly opposed to justice, impartiality, honesty, piety, and religion. And though censure seems to carry on its face the appearance of impartiality, yet lawlessness is there where every one is allowed to judge of another's deeds, and to take his or another's right in his own hands.

*Propriety*

25. Propriety, or the desire to please men, when determined by reason, belongs to piety. But if it arises from passion, it is ambition, or the desire by which men, through

false show of piety, generally raise discord and seditions. For, he who wishes to help others by counsel and deeds, so that they may together enjoy the highest good, he will try above all to bind them to himself in love, but not to gain their admiration so that for example a school of thought may be named after him, nor absolutely to give any cause for envy. In common talk, besides, he will take heed not to mention men's vices, and of human impotence he will take care to speak only sparingly, but largely of man's virtue or power, and in what way it may be perfected, so that, not driven by fear or aversion, but wholly by the affects of joy, they may try to live as prescribed by reason.

*The Use of Natural Things*

26. Besides men, there is no other single being in Nature, in whose mind we can take delight, and whom we can bind to us in friendship or any other kind of bond. Therefore, whatever there is in Nature besides men, our reason does not dictate to preserve it for our good, but teaches us, according to its varied uses, to preserve, or adapt it in every way for our good.

*Nourishment*

27. Besides the experience and knowledge which we acquire from observing things outside us, and seeing them change into other forms, the good they can further have for us, regards principally the preservation of our body. And for this reason, those things are specially good which can feed and nourish the body, so that all its parts may be able rightly to perform their functions. For, the fitter the body is, so that it can be affected in manifold ways, and can affect outer things in manifold ways, the fitter the mind is to think and



know. But of such kind there appear to be few things in Nature, wherefore, to nourish the body as it behoves, it is necessary to use many aliments of diverse kinds. For the human body is composed of many parts of diverse nature, which need continuous and varied nourishment, so that the whole body may be equally fit for all the things which follow from its nature, and consequently the mind also may be equally fit to think and know manifold things.

*Money*

28. But to bring these things ahout, the power of one man would hardly suffice, unless men render help to each other. Money has given us a truly compact substitute for all things, wherefore its image is wont greatly to occupy the mind of the common people. For they can scarcely imagine any kind of joy without the accompanying thought of money as the cause.

*The Miser*

29. But this is really a vice only in those who seek money, not from want, nor from necessity, but because they have learned the arts of gain, in which they greatly exult. For the rest, they feed the body only from habit and sparingly, because they count what is spent on its preservation as so much loss of their goods. But those who know the right use of money, and regulate their measure of wealth solely according to their needs, are content with little.

*Excess of Joy*

30. Because those things are good which help the bodily parts to fulfil their duty, and joy exists in that which helps or increases the power of man, in so far as he consists of mind and body, therefore are all those things good which bring joy.

But still, because on the other hand things do not exist and act for the end of giving us joy, and their power to act is not tempered according to our good, and finally, because joy is generally most strongly connected with one special part of the body, therefore the passions of joy, and consequently also the desires which spring from them, if reason and heedfulness are absent, generally go to excess, to which is to be added that, because of our passion, we hold that best which is sweet in the present, and cannot with an equal force of passion in our heart appreciate future things.

*The Superstition of Sorrow*

31. But superstition seems on the one hand to judge that good which gives sorrow, and on the other hand that evil which gives joy. But no being except an envious one, can delight in my impotence and discomfort. For, the greater the joy we experience, the greater the perfection to which we are transported, and consequently the more we partake of the divine Nature. Nor can joy ever be evil when tempered to the right measure of our good. But he, on the other hand, who is led by fear, and does good only to avoid evil, is not guided by reason.

*Acquiescence in Adversity*

32. But human power is very limited, and is infinitely surpassed by the power of external causes, and therefore we have not the absolute power to fit all things that are outside us to our good. Yet those things which happen to us contrary to what is good for us, we shall bear with equanimity if we are conscious that we have done our duty, and that the power we have could not reach so far as to enable us to avoid them. In which, if we clearly and distinctly understand it, that part



of us which belongs to the understanding, that is our better part, will wholly acquiesce, and strive to preserve itself in that acquiescence. For, in so far as we understand that we are not able to desire anything except that which is necessary, and are not able absolutely to acquiesce except in the truth, in so far therefore as we rightly understand this, so far only is our better part striving in concord with the whole of Nature.

*Note.* The last sentence has been mistranslated by all translators known to me (Gebhardt, Stern, Saisset, Hale White, Boyle, Gorter, Meyer, Van Suchtelen, and some others) except the oldest, Glazemaker. Gorter seems to be the only one who felt that something was wrong, and who therefore tried a different solution, which however does not seem satisfactory. I follow Glazemaker's translation. The common rendering is: "In so far as we understand, we are not able to desire anything except what is necessary, and are not able absolutely to acquiesce except in the truth." But, whether we understand it or not, the fact is that "we are not able to desire anything except what is necessary", that is what follows of necessity from our nature. So also "we are not able to acquiesce absolutely except in the truth." If however we understand this, then we will not rebel against Nature and that which follows necessarily from her, but will act as much as we can in unison with her, and so find real freedom and happiness.—A.A.

# DATE OF RĀMATĪRTHA YATI, THE AUTHOR OF A COMMENTARY ON THE SAṄKṢEPAS'ĀRĪRAKA

*Between A.D. 1525 and 1575*

By P. K. Gode, M.A.

Dr. Dasgupta[1] assigns Rāmatīrtha, the author of the *Anvayaprakās'ikā* (a commentary on the *Saṅkṣepas'āriraka* of Sarvajñātmamuni to the "*middle of the Seventeenth Century*" *i.e.* to about 1650 A.D. He states in the same context that Rāmatīrtha's *Anvayaprakās'ikā* shows an acquaintance with Madhusūdana's *Advaitasiddhi*. If this statement

[1] *Vide* p. 56 of *HIP* (History of Indian Philosophy), Vol. II (1932)—" Advaitānanda was a disciple of Rāmatīrtha, author of the *Anvayaprakas'ikā* . . . and a disciple of Kṛṣnatīrtha, a contemporary of Jagannāthās'rama, the teacher of Nṛsiṁhās'rama. Rāmatīrtha's *Anvayaprakās'ikā* shows an acquaintance with Madhusūdana's *Advaitasiddhi*; and he may thus be considered to have lived in the *middle of the seventeenth Century*."

These remarks may be represented as follows:

कृष्णतीर्थ—contemporary of—जगन्नाथाश्रम

| | |
|---|---|
| pupil | |
| रामतीर्थ | |
| pupil | pupil |
| अद्वैतानंद | नृसिंहाश्रम |

On p. 225 Dr. Dasgupta assigns Madhusūdanasarasvatī to " the first half of the Sixteenth Century " (*i.e.* between A.D. 1500 and 1550). *Vide* p. 659 of M. Kriṣṇamāchariar's *Classical Sans. Literature* where Madhusūdana is "*referred to 16—17th Century A.D.*

is correct the date of Rāmatīrtha lies after say about A.D. 1550 as Dr. Dasgupta assigns Madhusūdana Sarasvati to the "*first half of the Sixteenth Century.*"

I propose to prove in this paper that the date "*middle of the Seventeenth Century*" *i.e.* about A.D. 1650 given by Dr. Dasgupta for Rāmatīrtha is not correct as will be seen from the evidence recorded below.

According to Aufrecht[1] Rāmatīrtha, pupil of Kṛṣṇatīrtha, guru of Puruṣottama Mis'ra (*Saṁkṣepas'ārīrakatīkā*) composed the following works :

पदयोजनिका उपदेशसाहस्रीटीका

मानसोल्लासवृत्तान्तविलास, a comm. on Sures'vara's मानसोल्लास to S'aṁkarācārya's दक्षिणामूर्तिस्तोत्र.

वस्तुतत्वप्रकाशटीका

वाक्यार्थदर्पण

विद्वन्मनोरञ्जिनी वेदान्तसारटीका[2]

संक्षेपशारीरकव्याख्या[3]

स्तुतितरंगटीका (?) NW 502

It appears from the above entries that Rāmatīrtha is the author of (1) अन्वयप्रकाशिका mentioned by Dr. Dasgupta and (2) वेदांतसारटीका called विद्वन्मनोरञ्जिनी etc. The B.O.R. Institute MS. of the विद्वन्मनोरञ्जिनी (No. 129 of A 1883-84) ends :—

वेदान्तसारविवृतिं रामतीर्थाभिधो यतिः ।
चक्रे श्रीकृष्णतीर्थश्रीपदपंकजषट्पदः ॥ २ ॥

इति श्री वेदांतसारटीका विद्वन्मनोरंजनी समाप्ता ॥

[1] *CCI*, 514.

[2] *CCI*, 607—वेदान्तसार—"Comm. विद्वन्मनोरञ्जिनी by Rāmatīrtha yati or Rāmānandatīrtha"; many MSS. are noted here.

[3] *CCI*, 20—"अन्वयार्थप्रकाशिका a Comm. on संक्षेपशारीरक by Rāmatīrtha. Hall, p. 191. *NP*. VIII, 40. Proceed. *ASB*. 1869, p. 135."



I have already pointed out that Rāmatīrtha is posterior to about A.D. 1550 if Dr. Dasgupta's statement of Rāmatīrtha's posteriority to Madhusūdana[1] Sarasvatī is correct. The other terminus to the date of Rāmatīrtha is furnished by the date A.D. 1627 of a MS.[2] of the विद्वन्मनोरञ्जनी in the India Office Library, which ends as follows :

ओं संवत् । १६८३ । वर्षे फाल्गुनवदि २ । वाराणस्यां लिखितमिदं पुस्तकं ॥

If this date is correct, A.D. ***1627*** or *Saṁvat 1683* is a reliable terminus to the date of Rāmatīrtha and consequently we may assign Rāmatīrtha to a period (A.D. 1550 to 1627). This result of my investigation proves that Dr. Dasgupta's date for Rāmatīrtha *viz.* "middle of the Seventeenth Century" is not warranted by evidence.

Rāmatīrtha commented on the *Vedāntasāra* of Sadānanda. This work was commented on by another commentator Nṛsiṁhasarasvatī in A.D. 1588 (S'aka 1510)[3] and is therefore earlier than A.D. 1588. Dr. Dasgupta[4] states that Sadānanda was a contemporary of Nṛsiṁhās'rama. I have pointed out elsewhere[5] that Nṛsiṁhās'rama composed works in A.D. 1547 and 1558 and hence the period of his literary activity lies between A.D. 1525 and 1575. Sadānanda must,

[1] *Vide* p. 186 of Manuscript Notes in the *Adyar Library Bulletin*, Vol. V, Pt. 4 (December 1941) where Mr. K. M. K. Sarma assigns माधवसरस्वती the guru of मधुसूदनसरस्वती to "the second half of the fifteenth Century" *i.e.* between A.D. 1450 and 1500. Mr. Sarma rejects the date (A.D. 1540—1647) for मधुसूदन given by Rao Bahadur P. C. Divanji (p. 25 of *Siddhāntabindu*, G. O. S. 64, Baroda).

[2] *Vide* p. 750 of *I.O. MSS. Cata. IV* (1894)—MS. 2354 (1128*b*) foll. 22 etc.

[3] *Vide* Aufrecht, *CCI*, 607.

[4] *History of Indian Philosophy*, Vol. II (1932), p. 55.

[5] *Vide* my paper on "A New Approach to the Date of Bhaṭṭoj Dikṣita" in the *Annals* (Tirupati) 1940, Vol. I, Pt. 2, p. 126.

therefore, be assigned to the period (A.D. 1525 and 1575) and as Rāmatīrtha is the commentator of Sadānanda's work he is more near to A.D. 1550 than A.D. 1650, which is the date of Rāmatīrtha according to Dr. Dasgupta.

In the light of the foregoing discussion we may tentatively record the following chronology for Ramatīrtha and others:

| A. D. | PARTICULARS |
|---|---|
| About 1490—1550 | कृष्णतीर्थ Contemporary of जगन्नाथाश्रम |
| Between 1525—1575 | pupil रामतीर्थ |
| Between 1525—1575 | pupil अद्वैतानंद; pupil नृसिंहाश्रम (A.D. 1547, 1558) |
| Between 1525 & 1575 | pupil सदानंद |
| 1588 | —Nṛsiṁha-Sarasvatī composed his Commentary on Sadānanda's वेदांतसार |
| 1627 | —India Office MS. of Rāmatīrtha's Commentary on the वेदांतसार |

The purpose of the present paper is to shift Rāmatīrtha's date from the "middle of the *Seventeenth* Century" to the middle of the *Sixteenth* Century and consequently it is needless to enter into any more discussion about the dates of other writers in the above table than what has been already recorded in this paper.



आत्मानं परिरक्ष्य दुष्करतपोवृद्धद्विजाराधनै-
दानीयेषु च भक्तिपूर्वमसकृद्देयप्रदानैरपि ।
दण्डं दण्डयितव्यमात्रविषयं कृत्वा धरित्रीतले
राज्ञा धर्मपथे मतिं क्रमयता संरक्षितव्याः प्रजाः ॥ ८ ॥

आत्मानमिति । आत्मानं-स्वशरीरम् । परिरक्ष्य । स्वशरीरपरिपालनं खलु राज्ञः प्रथमो धर्मः, प्रजाक्षेमस्याशेषस्यापि तदायत्तत्वात् । अत एवाचार्यवाग्भटः प्राह—"राजा राजगृहासन्ने प्राणाचार्यं निवेशयेत् । सर्वदा स भवत्येवं सर्वत्र प्रतिजागृविः । अन्नपानं विषाद्रक्षेद्विशेषेण महीपतेः । योगक्षेमौ तदायत्तौ धर्माद्या यन्निबन्धनाः" इति । दुष्कराणि यानि तपांसि तैः वृद्धाः-महान्तः ये द्विजाः-विप्राः तेषां आराधनैः-पूजनैः । असकृदिति द्वितीयपादोक्तः शब्दस्त्वत्राप्यनुषज्यते दानीयेषु च इत्यत्र विद्यमानेन चकारेण । दानीयेषु-दानार्हेषु जनेषु च । असकृत्-पदे पदे । भक्तिपूर्वं यथा तथा । देयप्रदानैः-दानार्हद्रव्याणामर्पणैरपि । (दानप्रदानैरपि इति च पाठान्तरम् ।) दण्डयितव्यमात्रविषयं-दण्डनार्हजनमात्रपर्यवसायिनम् । दण्डं-शिक्षाम् । भ्रान्त्या वा अनवधानेन वा हेत्वन्तरैर्वा यथा निरपराधिनो न शिक्षामनुभवेयुस्तथा जागरूकेण राज्ञा दण्डनीतिः परिपालनीयेति भावः । "दण्ड्यस्यादण्डनान्नित्यमदण्ड्यस्य च दण्डनात् । अतिदण्डाच्च गुणिभिस्त्यज्यते पातकी भवेत्" इति शुक्रनीतिः । कृत्वा । धर्मपथे-शास्त्रैः शिष्टैश्च विहिते धर्ममार्गे । मतिं-स्वबुद्धिम् । क्रमयता-व्यापारयता । राज्ञा-यथोक्तधर्मनिष्ठेन भूमिपालेन । धरित्रीतले-जगति । प्रजाः । संरक्षितव्याः-साधु परिपालनीयाः । प्रथमतः प्रजारक्षणमूलभूतस्य स्वात्मनः संरक्षणम्, ततस्तपोधनानां लोकोज्जीवनोपायोपदेशनिष्णातानां द्विजानामुपचरणम्, दानयोग्यानां दीनजनानां द्रव्यादिवितरणपूर्वकमादरणम्, शिष्टजनपरित्राणपूर्वकं दुष्टजनशिक्षणम् इत्येवं रीत्या सर्वदा धर्म्ये पथि निहितदृष्टिना नृपतिना प्रजानां पालनमस्ति निर्वर्तनीयमिति नितरां राजधर्मनिर्वहणस्य दुरन्ततां विमृश्य चिन्तास्तिमितमना भवति सचिवः ॥ ८ ॥

किं बहुना—

श्वःश्रेयसार्थं यततेऽनिशं यो राज्ञा किलानेन पृथग्विमर्शः ।
स्वस्मिन्नमात्येषु सुहृत्सु राष्ट्रे दुर्गेषु कोशेषु बलेषु कार्यः ॥ ९ ॥

निर्ज्ञातसर्वतन्त्रेषु विगूढामोघमन्त्रेषु मन्त्रिषु विन्यस्तसमस्तकार्यभरस्य तु राज्ञो निश्चिन्ततैव । परं तु तेषां व्याकृष्यन्ते दुरन्तया तत्कार्यचिन्तयानया हृदयानि ।

तस्यैतस्य जीवराजस्य चिन्ताभारमेव क्रोडीकरोति किंबहुनेति । तदेवावस्थान्तरं विवृणोति श्वःश्रेयसार्थमिति । यः-जीवराजः । अनिशं-सर्वदा । श्वःश्रेयसार्थं-आगामिमोक्षरूपश्रेयस्साधनार्थमित्यर्थः । श्वः-आगामि श्रेयः-कल्याणं यस्मिन् तत् श्वःश्रेयसम् इति तद्व्युत्पत्तिः । "श्वसो वसीयः श्रेयसः" इत्यच् । यतते-उद्युक्तो वर्तते । अनेन-तथा श्वःश्रेयसोद्युक्तेनेति भावः । राज्ञा-जीवेन । किलेति संभावनायाम् । स्वस्मिन्-चतुर्वर्गसाधनोपायभूते स्वशरीर इति यावत् । अमात्येषु-मन्त्रिवर्गोपदिश्यमानेषु विषयेषु तत्प्रवृत्तिषु चेति भावः । सुहृत्सु-अत्रापि मित्रजनरञ्जनकृत्येष्वित्यर्थः । राष्ट्रे-राज्यनिर्वहणविषये । दुर्गेषु-जलशैलाद्यावरणादिभिर्निर्मितेषु दुर्गमेषु स्थलेषु । कोशेषु-धनागारेषु । बलेषु-सैन्येषु च । दुर्गादीनां निर्वहणरक्षणकृत्येष्विति यावत् । पृथक्-प्रत्येकं यथा तथा । विमर्शः-विविच्य परिशीलनम् । कार्यः-अवश्यं कर्तव्यो भवति । पूर्वश्लोकेन धर्मपथेन प्रजानां सामान्यतः पालनधुरायां विद्यमानं राज्ञः परिश्रममभिधाय, पद्येनानेन स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलाख्यानि राज्यनिर्वहणे परस्परोपकारकाणि सप्ताप्यङ्गानि राज्ञो मनसि दुरूहविमर्शास्पदानि भवन्तीति च संजगृहे ॥ ९ ॥

निर्ज्ञातेति । निर्ज्ञातानि-निश्शेषतोऽवगतानि, सर्वतन्त्राणि-अशेषशास्त्रविशेषाः यैस्तेषु । विगूढाः-विशिष्य गुप्ताः, अमोघाः-सफलाः, मन्त्राः-राजरहस्योपाया यैस्तेषु । मन्त्रिषु-स्वसदृशेष्वमात्यवरेषु । विन्यस्तः-आरोपितः, समस्तकार्यभरः-सकलराज्यतन्त्रनिर्वहणभारः येन तस्य । राज्ञस्तु । निश्चिन्ततैव-सक्लेशस्मृतिपरता चिन्ता, तद्राहित्यं निश्चिन्तता । श्वःश्रेयसासक्तचेतसा सप्ताङ्गसहितराज्यभारस्य मन्त्रिसात्कृतत्वात् तादृशराज्यधुरावहनचिन्तैव तस्य संप्रति नास्तीति भावः । परं तु-तथापि । तेषां-मन्त्रिणाम् । अत्र मन्त्रिणामिति बहुवचनान्तत्वं विविधराजकृत्यनिर्वहणधुरन्धराः सन्ति सचिवा बहवो राज्ञ इति, तेषां चैष विज्ञानशर्मा प्रधान इति च सूचितं भवति । हृदयानि-सचिवानां मनांसि । दुरन्तया-निरवधिकया । अनया-पूर्वोक्तया । तत्कार्यचिन्तया-तेषां राज्यकार्याणां आलोचनाव्यापारेण । व्याकृष्यन्ते-सर्वदा विविधराज्यकार्यालोचनासक्तानि तेषां हृदयानीत्यर्थः ।



सामन्ता विनमेयुरित्युपचयः कोशस्य सिद्ध्येदिति
स्थानेषु द्विषतां स्थितीरपि चराः पश्येयुराप्ता इति ।
स्यादायोपगमो यथेति विभवैस्तुष्टाः प्रवीरा भटा
वर्तेरन्निति मा मलिम्लुचगणात् भूरुद्विजेतेति च ॥ १० ॥

तच्चिन्ताप्रकारानेव विशदयति सामन्ता इति । समन्ताद्भवाः सामन्ताः-प्रातिवेशिका नृपाः । यथा-येन प्रकारेण । विनमेयुः-वशंवदा भूत्वा स्वात्मानमनुवर्तेरन् इति । कोशस्य-धनागारस्य, तत्रस्थधनस्येति यावत् । उपचयः-अभिवृद्धिः । यथा सिद्ध्येत्-निष्पद्येत इति । आप्ताः-विश्वसनीयगुणविशिष्टाः । चराः-प्रणिधयः ; रहस्यवृत्तान्ताख्यायिनः पुरुषा इति यावत् । स्थानेषु-तेषु तेषु प्रदेशेषु । द्विषतां-शत्रूणाम् । स्थितीः-अवस्थानप्रकारानपि । यथा पश्येयुः-अवगच्छेयुः इति । आयोपगमः-अर्थप्राप्तिः । यथा स्यात् इति । कैः कैः करग्रहणैरुपायान्तरैर्वा न्याय्येन मार्गेण राज्यनिर्वहणाय पर्याप्तो धनायः स्यादिति यावत् । प्रवीराः-प्रकृष्टशौर्यवन्तः । भटाः-योधाः । विभवैः-बहुमूल्यैर्वेतनैः पारितोषिकैरपरैश्चाधिपत्योचितैर्बहुमानैरिति भावः । यथा तुष्टाः-संपूर्णमनोरथाः । वर्तेरन्निति । भूः-पृथिव्यां निवसत्प्रजावर्ग इत्यर्थः । मलिम्लुचाः-तस्कराः तेषां गणः-निवहः तस्मात् । यथा मा च उद्विजेत-न च बिभ्येत् । इत्येतादृशया दुरन्तया चिन्तया तेषां

अहमपि राज्ञा विन्यस्तसमस्तकार्यभारतया यत्सत्यं व्याकुल एव । तथा हि—

कार्येषूक्तेषु राज्ञा कतिचिदपि मया साधितान्येव पूर्वं
साधिष्यन्ते परस्तात् कतिचन कतिचिच्चापि साध्यन्त एव ।
किञ्चानुक्तेषु सद्यः किमपि किल कुशाग्रीययात्मीयबुद्ध्या
पर्यालोच्यैव तत्तत्समयसमुचितं कर्तुमुत्कण्ठितोऽस्मि ॥ ११ ॥

हृदयान्याकृष्यन्ते इति पूर्ववाक्येनान्वयः । राज्ञा स्वकीये राज्यनिर्वहणभारे सचिवसात्कृते सति राज्ञानुभूतश्चिन्ताभरोऽपि स्वयमनुपदमेव धर्ममार्गैकनिहित-चेतसां राजकार्यधुरन्धराणां मन्त्रिणां मनस्यासज्जत इति भावः । एषा च नीतिः नन्दवंशे निहितनिरतिशयश्रद्धम् अतिप्रबुद्धम् अमात्यराक्षसमुद्दिश्य विराधगुप्तेनोक्तं मुद्राराक्षसीयं वचनम् अनुस्मारयति । तद्यथा—

"किं शेषस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत्
किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः ।
किं त्वङ्गीकृतमुत्सृजन् कृपणवच्छ्लाघ्यो जनो लज्जते
निर्व्यूढं प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतम् ॥" इति ॥

एवमेवाङ्गीकृतस्य राज्यभारनिर्वहणतन्त्रस्य विषये नृपादपि मन्त्रिणां मनो नून-मधिकतरं चिन्तासन्तानदन्तुरितं स्यादिति मन्त्री निर्वर्णितवान् ॥ १० ॥

**अहमपीति** । विन्यस्तः-आयत्तीकृतः, समस्तकार्यभरः-अशेषराजकृत्य-निर्वहणधुरा यस्मिन् सः; तस्य भावस्तत्ता तया । यत्सत्यं-नूनमेव । व्याकुलः-चिन्ताभरायासित एव । राज्यतन्त्रनिर्वहणकृत्यैर्विविधैः सर्वदा मनसश्चिन्तानिर्भ-रत्वविषये स्वस्यापि राज्ञः समानधर्मत्वम् अपिशब्देन विवक्षितं भवति ।

**कार्येष्विति** । राज्ञा-जीवेन । उक्तेषु-आदिष्टेषु । कार्येषु-राजकृत्येषु । मया-आत्मना मन्त्रिणा । कतिचित्-कानिचन । पूर्वमेव । अपि साधितानि-निर्वर्तिता-



अत एव तत्र तत्र व्यापृतेन मया पुरगुप्त्यै मत्सदृश एव कोऽपि विनियुक्तो विचारनामा नागरिकः । तत् प्रकृतकार्ये व्यापृतव्यम् । कः कोऽत्र भोः ।

(प्रविश्य)

**दौवारिकः**—विजयतां देवः ।

**मन्त्री**—भद्र, मद्वचनेनानुशासनीयाः पौरा नगरालङ्काराय ।

न्येव । कतिचन-अन्यानि कानिचित् । परस्तात्-क्रमशः कालान्तरे । साधि-ष्यन्ते । कतिचिच्चापि कार्यान्तराणि । साध्यन्ते-अद्य वर्तमानकाले समु-चितैर्यत्नैर्निष्पाद्यन्त एव । सचिवस्य सर्वस्वातन्त्र्यं राज्यनिर्वहणे सश्रद्धत्वं धूर्वहत्वं च सूचयत्युत्तरार्धेन किञ्चेत्यादिना । न केवलं नृपनिर्दिष्टकार्याणां निर्वर्तने-नैव स्वस्य कृतकृत्यता परं तु सन्त्यपराण्यपि तदनुक्तानि स्वमतिकौशलेन समा-लोच्य साधनीयानीति विषयं प्रस्तौति किञ्चेतिशब्दः । अनुक्तेषु-राज्ञा अनिर्दिष्टेषु कार्येषु । किमपि-स्वधिषणैकगोचरं कार्यम् । किलेति संभावनायाम् । सद्यः-अद्यैव । कुशाग्रीयया-कुशाग्रवदतिसूक्ष्मया । आत्मीयबुद्ध्या-स्वकीयया मत्या । पर्यालोच्यैव-आवापोद्वापपुरस्सरं सम्यक् परिशील्यैव । न तु तरसा यथातथमिति भावः । तत्त-त्समयसमुचितं-तत्तत्कालविशेषानुरोधं यथा तथा । कर्तुं-निर्वोढुम् । उत्कण्ठितो-ऽस्मि-अतीवासक्तमना भवामि । इतःपूर्वं मन्त्रिणः समुचिता धुरा केवलमेकास्या-सीत्, अद्य तु राज्ञो धुरापि सकला सविशेषा चैतदायत्ताभवदिति अतश्च अस्य व्याकुलीभावः शतधा समभिवृद्ध इति, अत एव च भूतभविष्यद्वर्तमानसमयकर्तव्य-कार्यनिवहसमालोचनपर एव सर्वदा यापयति कालमेष इति चाभिहितं भवति ॥ ११ ॥

अतएवेति । पूर्वपद्योक्तेन हेतुनेति यावत् । तत्र तत्र-विविधेषु सङ्ख्यातीतेषु कार्येषु । (सर्वत्र तत्र तत्रेति पाठान्तरम् ।) व्यापृतेन-समुद्युक्तचित्तेन । पुरगुप्त्यै-शत्रुपक्षीयेभ्यो नगरस्य पालनाय । मत्सदृशः-मतिकौशलादिना स्वात्मनः समान

आलिप्यन्तां सुधाभिः पुरसदनगता भित्तयो भृत्यवर्गैः
रम्भास्तम्भाः क्रियन्तां कपिशफलभृतः पार्श्वयोर्द्वारभूमेः ।
बध्यन्तां तोरणानि श्रितनवमणिभिर्दामभिः सन्तु रथ्याः
संमृष्टाश्चाम्बुसिक्ताः प्रतिगृहमुपरि ग्रथ्यतां केतनाली ॥ १२ ॥

एव; एतेन तस्मिन् पुरुषान्तरेऽस्य विस्रंभातिशयवत्त्वं सूचितम् । कोऽपि पुरुषो विचारनामा । नागरिकः-नगरपरिपालनाधिकृत इति यावत् । प्रकृतकार्ये-सिद्ध-प्रतिज्ञस्य राज्ञ आगमिष्यतः संभावनाय नगरालङ्कारादिरूपे कर्मणि । **भद्रेति** । मद्वचनेनानुशासनीयाः-मन्त्रिमहाशय एवम् आदिशतीति नियोक्तव्याः ।

नगरालङ्कारप्रकारमाह **आलिप्यन्तामिति** । भृत्यवर्गैः इति कर्तृपदं पद्य-स्थैनैकैकवाक्येन चान्वेति । पुरसदनगताः-नगरगृहानाश्रित्य विद्यमानाः । भित्तयः । भृत्यवर्गैः । सुधाभिः-जलविद्रावितचूर्णशर्कराभिः । करणभूताभिः । आलिप्यन्तां-सुधाद्रवैः सर्वेषामपि गृहाणां भित्तयो धवलीक्रियन्तामिति यावत् । (आलिम्पन्तां इति पाठान्तरम् ।) द्वारभूमेः-एकैकस्य च गृहस्य बहिरङ्गणस्थ-प्रतीहाराख्यस्य प्रदेशस्य । पार्श्वयोः-उभयतः । कपिशफलभृतः-नातिपरिणत-त्वात् किञ्चिद्धरितवर्णविशिष्टैः फलैः संयुक्ताः । रम्भास्तम्भाः-स्थूलस्थूणासदृशाः कदलीवृक्षाः । क्रियन्तां-स्तम्भरूपेण निवेश्य बध्यन्तामिति यावत् । श्रिताः-संयोजिताः, नवमणयः-नवविधानि रत्नानि येषु तैः । दामभिः-मालाभिः । तोरणानि । बध्यन्ताम् । रथ्याः-वीथयः । अम्बुसिक्ताः । तथा संमृष्टाः-सम्यक् शोधिताश्च । सन्तु । गृहे गृहे-प्रतिगृहम् । उपरि-गृहाणामूर्ध्वम् । केतनाली-ध्वजपटपङ्क्तिः । ग्रथ्यतां निवध्यताम् । राज्ञि बहुमानं तच्छ्रेयोवृद्धिश्रवणेन प्रजानां संजातं प्रमोदातिशयं च सूचयितुमेवं नगरालङ्कारविधानं सुतरामावश्यक-मिति सचिवः संदिशति ॥ १२ ॥



यतः संप्रत्येव सिद्धप्रतिज्ञो राजा समागमिष्यति ।

**दौवारिकः**—यदाज्ञापयत्यार्यः । (इति निष्क्रान्तः ।)

**मन्त्री**—(सदृष्टिक्षेपं परिवृत्यावलोक्य च) अहो रिपूणां पुरावस्कन्दनप्रकारः । तथा हि । पाण्डुना प्रेरिता रोगाः—

मूर्धानं व्याप्तुकामाः शतमथ नवतिर्लोचने षट् च रोगाः
नासामष्टादशास्यं खलु चतुरधिका सप्ततिर्हृच्च पञ्च ।
वक्षोजौ पञ्च शूलैः सह समगणनैः कुक्षिमष्टौ च गुल्माः
स्वार्हस्थानान्युपेतं त्रिगुणगणनया पञ्चकं च व्रणानाम् ॥ १३ ॥

**यत इति** । सिद्धा-निष्पन्ना, प्रतिज्ञा-रससिद्ध्यादिसाधनार्थो मनोरथः यस्य सः । समागमिष्यति-नगरं प्रवेक्ष्यति । **सदृष्टिक्षेपमिति** । आकस्मिकतया ज्ञातेन विस्मयावहेन उद्वेगजनकेन वा विषयेण हठादाकृष्टे मनसि यः किल तत्र दृष्टिपातो झटिति क्रियते स दृष्टिक्षेप इत्यभिधीयते । पुरस्य अवस्कन्दनं-आक्रमणम्, तस्य प्रकारः । पाण्डुना प्रेरिता रोगा इत्यस्य आनन्तरिकेण पद्येनान्वयः ।

शरीराख्यस्य जीवराजपुरस्यावस्कन्दनरीतिमेव विवृणोति **मूर्धानमित्या-दिना** । मूर्धानं-शिरः । शतं रोगाः । शिरोरोगैः सह कपालरोगाश्चात्र गृह्यन्ते । व्याप्तुकामाः-व्यापनशीलाः । अथ लोचने-नेत्रे । नवतिः षट् च-षण्णवति-सङ्ख्याका रोगाः । व्याप्तुकामा इति पदं प्रतिवाक्यमन्वेति । (नवतिर्लोचने षट् च भूयः इति पाठान्तरम् ।) नासां-नासिकाया बहिरन्तश्च । अष्टादश रोगाः । आस्यं-मुखं खलु । चतुरधिका सप्ततिः-चतुस्सप्ततिः व्याधयः । हृत् हृदयं च । पञ्च रोगाः । वक्षोजौ-स्तनौ । पञ्च । कुक्षि-उदरम् । समगणनैः-गुल्मसमसङ्ख्याकैः; अष्टभिरिति यावत् । शूलैः-कुक्षिशूलैः सह । अष्टौ गुल्माः-गुल्मरोगाः । स्वार्हस्थानानि-स्वस्य स्वस्य समुचितानि पाणिपादमुखगुदवस्ति-

अथ च स्वयमेव मन्त्रिभूतस्य युवराजस्य पाण्डोः पुरोपरोधवैचित्री वाचामतिवर्तते पन्थानम् । (सामर्षं सावहित्थं चाकाशे लक्ष्यं बध्वा) साधु मन्त्रि-धुरीण साधु । अनया गुप्तप्रयोगप्रकारगोचरया धिषणया शौर्येण च दैत्य-गुरुं वृषपर्वाणं चातिशेषे । (सोपहासम्) मयि—(इत्यर्धोक्ते विरमति ।)

प्रभृतीनि अङ्गानि । उपेतं-आक्रान्तम् । व्रणानां-शारीरव्रणशोभादीनाम् । त्रिगुण-गणनया-सङ्ख्यया त्रिगुणितया । समन्वितमिति शेषः । पञ्चकं-त्रिगुणितं पञ्चकं पञ्चदशसङ्ख्याकमित्यर्थः । एवं परपक्षसचिवेन पाण्डुना समादिष्टाः सर्वेऽपि रोगरूपाः शात्रवयोधाः शरीराख्यं पुरं बहिरन्तश्चावस्कन्द्य विशङ्कटं सङ्कट-मुत्पादयितुम् उपक्रान्ता इति भावः । अत्र व्याधीनां शिरोनेत्रसम्बन्धिनां विनिर्दिष्टाः सङ्ख्या निदानग्रन्थेषु निर्दिष्टप्रतिनियतव्याधिसङ्ख्याभ्यो विसंवदन्ति । अनन्तवात-सूर्यावर्तादयः शिरोरोगा एकादशेति माधवकरः । शार्ङ्गधरोक्तानां दारुणोपशीर्षकारूंषिकादीनां नवकपालरोगाणाम् एतैः सह गणनायामपि मूर्धगताः रोगा विंशतिरेव । नेत्रे शुक्लभाग-कृष्णभाग-दृष्टिवर्त्माद्याश्रया आमयाः षट्सप्तति-रिति माधवनिदानम्; शार्ङ्गधरः चतुष्षष्टिरिति । नासारोगादिसङ्ख्यास्तु न तावता विसंवदन्ति । 'मूर्धानं व्याप्तुकामा उपदश नयने षष्टिरष्टौ च रोगाः' इति कविप्रोक्तं स्यादिति वयमभिप्रैमः ॥ १३ ॥

अथ चेति । युवराजस्य-पाण्डोः । स्वयमेव मन्त्रिभूतस्य-युवराजपदव्या सह स्वात्मनैव मन्त्रिणो दुर्भरां धुरामप्यावहतः । युवराजो मन्त्रिस्थानेऽप्यधिकृत इति लोकविलक्षणैषा नीतिरिति चाशयः । पुरोपरोधस्य-शरीररूपनगरावस्कन्दस्य, वैचित्री-विलक्षणता । वाचां पन्थानम् अतिवर्तत इति सावहेलनमिदं प्रशंसावच-नम् । सावहित्थं-अमर्षादिजनितक्रोधादिमनोविकाराणां परपक्षाश्रितदोषादीनां च गोपनपुरस्सरम् उद्भावितो मानसो भावः अवहित्थम् अवहित्था वा; तेन तया वा सहितं सावहित्थं यथा तथा । (लक्ष्यं बध्वा इत्येतत् क्वचित् पुस्तके विसृष्टम् ।) गुप्तस्य-निगूढस्य, प्रयोगस्य-पुरोपरोधरूपव्यापारस्य, प्रकारः-रीतिः,

# तृतीयः पटलः

## [1](स्नानभेदाः)

[2]स्नानानि संप्रवक्ष्यामि विविधानि यथाविधि ।
मान्त्रं भौमं तथाऽऽग्नेयं वायव्यं दिव्यमेव च ॥ १ ॥
वारुणं मानसं चेति कण्ठस्नानमतः परम् ।
कटिस्नानं कापिलं च दश स्नानान्यनुक्रमात् ॥ २ ॥
[3]*आपो हि ष्ठादिभिर्मान्त्रं मृदालम्भस्तु पार्थिवम् ।

[1]( ) घ, ङ.

[2]According to *Dakṣa-smṛti* (*ASS.* No. 48, pp. 72-84) five kinds of *snānas* are enumerated as meritorious as under :

आग्नेयं भस्मना स्नानमवगाह्य च वारुणम् ।
आपो हि ष्ठेति च ब्राह्मं वायव्यं गोरजः स्मृतम् ॥
यत्तु सातपवर्षं तु तत्स्नानं दिव्यमुच्यते ।
पञ्च स्नानानि पुण्यानि मनुः स्वायंभुवोऽब्रवीत् ॥

*Dakṣa-smṛti*, chap. 2, *vv.* 15 and 16. What Āpastamba here calls *māntram* is named *Brāhmam* by Dakṣa.

[3]Compare with *SMP*, Āhnika, p. 290, line 1, the verse of Yoga-Yājñavalkya which is a combination of this half-verse and the second half of verse 4 *below*.

* आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥
यो वश्शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ ।
आपो जनयथा च नः ॥ तै. आ, प्र. १०, अ. १. म. ४६.

आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम् ॥ ३ ॥

यत्तु सातपवर्षेण दिव्यं स्नानं तदुच्यते ।

वारुणं चावगाहस्तु मानसं विष्णुचिन्तनम् ॥ ४ ॥

शिरस्नानविहीनं यत् कण्ठस्नानं तदुच्यते ।

नाभिमात्रं प्रविश्याप्सु कटिं प्रक्षालयेज्जलैः ॥ ५ ॥

कटिस्नानमिदं प्रोक्तं ह्यशक्तस्य विधीयते ।

आर्द्रेण वाससाऽङ्गानां मार्जनं कापिलं [1]विदुः ॥ ६ ॥

अत्रापि चासमर्थस्य मन्त्रस्नानं विधीयते ।

*शं न †आपस्तु ‡द्रुपदा §आपो हि ष्ठा ¶घमर्षणम् ॥ ७ ॥

परम् । तत्रापि चासमर्थस्य भस्मनोद्धूलनं परम् ।
स्नानानामुत्तमं स्नानं ब्रह्मविद्भिः सुनिश्चितम् ॥ शं न—घ, ङ, छ, ज. The rest of the manuscripts consulted do not contain this verse. The text does not warrant its inclusion as it does not form part of the ten *snānas* described.

---

* शं नो देवीरभिष्टये । आपो भवन्तु पीतये ।
शं योरभि स्रवन्तु नः ॥ तै. ब्रा. १. प्र. २. अ. १.

† आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् ।
पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम् ॥
यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम ।
सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहँ स्वाहा ॥ तै.आ.,प्र.१०,अ.२३.

‡ द्रुपदादिव मुञ्चतु । द्रुपदादिवेन्मुमुचानः ।
स्विन्नः स्नात्वी मलादिव । पूतं पवित्रेणेवाज्यम् ।
आपश्शुन्धन्तु मैनसः । तै. ब्रा. २. प्र. ६. अ. ६.

§ तै. आ., प्र. १०, अ. १. म. ४६ ; see p. 25 foot-note.*

¶ हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः ।
यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः ॥



एतैश्च पञ्चभिर्मन्त्रैः मन्त्रस्नानमुदाहृतम् ।

नित्यस्नानविधिं वक्ष्ये शृणुध्वं सुसमाहिताः ॥ ८ ॥

---

यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम् ।
तन्न इन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनःपुनः ॥
नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः ॥
यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात् ॥
अत्याशनादतीपानाद्यच्च उग्रात्प्रतिग्रहात् ।
तन्नो वरुणो राजा पाणिना ह्यवमर्शतु ॥
सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः ।
नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्मसलोकताम् ॥
यश्चाप्सु वरुणः स पुनात्वघमर्षणः ॥
इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमँ सचता परुष्णिया ।
असिक्निया मरुद्वृधे वितस्तयाऽऽर्जीकीये शृणुह्या सुषोमया ॥
ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत ।
ततो रात्रिरजायत ततः समुद्रो अर्णवः ॥
समुद्रादर्णवादधि संवत्सरो अजायत ।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।
दिवं च पृथिवीं चान्तरिक्षमथो सुवः ॥
यत्पृथिव्याँ रजः स्वमान्तरिक्षे विरोदसी ।
इमाँस्तदापो वरुणः पुनात्वघमर्षणः ॥
पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः ॥
एष भूतस्य मध्ये भुवनस्य गोप्ता ।
एष पुण्यकृतान् लोकानेष मृत्योर्हिरण्मयम् ॥
द्यावापृथिव्योर्हिरण्मयँ सँश्रितँ सुवः ।
स नः सुवः सँशिशाधि ॥
आर्द्रं ज्वलति ज्योतिरहमस्मि ।
ज्योतिर्ज्वलति ब्रह्माऽहमस्मि ।
योऽहमस्मि ब्रह्माऽहमस्मि ।
अहमस्मि ब्रह्माऽहमस्मि ।
अहमेवाहं मां जुहोमि स्वाहा ॥

प्रक्षाल्य पादौ हस्तौ च आचम्य प्रयतस्तथा ।
दर्भपाणि: प्रसन्नात्मा तिथिवारादिकं[1] स्मरेत् ॥ ९ ॥
प्राङ्मुखोदङ्मुख: स्थित्वा सुसंकल्प्य यथाविधि ।
[2]हिरण्यशृङ्गमन्त्रेण* जलं समवगाहयेत् ॥ १० ॥

[1] दि संस्म—क, ख, ग.

[2] cf. *Smṛtiratnākara* under *Snānavidhi* (Telugu edition, Mysore, p. 116). The verses are cited under Bharadvāja and are extracted below for comparison. It will be noted that there are some omissions as well as additions when compared with the *text* for the corresponding portion, such additional lines as are not found are printed in slightly bolder type.

भरद्वाज—

हिरण्यशृङ्गमित्युक्त्वा जलं समवगाहयेत् ।
सुमित्रा इत्युदाहृत्य स्वात्मानमभिषेचयेत् ॥
दुर्मित्रा इत्युदाहृत्य मृत्स्थाने जलमुत्सृजेत् ।
योऽस्मान् द्वेष्टीत्युदाहृत्य तथा तत्र जलं क्षिपेत् ॥
यं च वयं द्विष्म इति पुनस्तत्र जलं क्षिपेत् ।
**एवं त्रिर्मृत्तिकास्थाने जलमञ्जलिनोत्सृजेत् ॥**
नमोऽग्नय इति तीर्थं नमस्कुर्यात्ततो बुध: ।
यदपामित्यमेध्यांशं निरस्येद्दक्षिणे जलम् ॥

---

अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पग: ।
वरुणोऽपामघमर्षणस्तस्मात्पापात्प्रमुच्यते ॥
रजो भूमिस्त्वमा॰ रोदयस्व प्रवदन्ति धीरा: ।
आक्रान्त्समुद्र: प्रथमे विधर्मन् जनयन् प्रजा भुवनस्य राजा ॥
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे सुवान इन्दु: ॥—
तै. आ, प्र. १०, अ. १. म. ४७—६३.

* See *infra* pp. 26-27 for the *aghamarṣaṇa-sūkta*.

हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचित: ।
यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रह: ॥
यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम् ।
तन्न इन्द्रो वरुणो बृहस्पति: सविता च पुनन्तु पुन:पुन: ॥



*सुमित्रा इति मन्त्रेण स्वात्मानमभिषेचयेत् ।

अत्याशनादिति द्वाभ्यां त्रिरालोड्य तु पाणिना ।
चतुरश्रं तीर्थपीठं पाणिनोल्लिख्य वारिषु ॥
आवाहयामि त्वां देवीत्यावाह्यात्रैव जाह्नवीम् ।
इमं मे गङ्ग इत्युक्त्वा पुण्यतीर्थानि च स्मरेत् ॥
आदित्याभिमुखो मज्जेदापो अस्मानिति त्यृचा ।
**निमज्य चापो हि ष्ठाद्यैरब्लिङ्गैर्मार्जयेत्तत: ॥**
**आपो नारा इति प्रोक्तास्ता एवास्यायनं पुन: ।**
**तस्मान्नारायणं देवं स्नानकाले सदा स्मरेत् ॥**
ततोऽघमर्षणं कुर्यादृतं चेति त्यृचं जपन् ।
त्रिषडष्टौ द्वादश वाऽऽवर्तयेदघमर्षणम् ॥
अघमर्षणसूक्तस्य ऋषिरेवाघमर्षण: ।
तस्य चानुष्टुभं छन्दो भाव(वृत्तो)वृक्तोऽधिदेवता ॥
**द्विराचम्याथ विबुधानृषीनथ पितॄन् क्रमात् ।**
**स्वस्वतीर्थेन वारिस्थस्तर्पयेद्विधिवद्बुध: ॥**
**संतर्पयेच्च तिसृभिर्व्याहृतीभिस्तिलाक्षतै: ।**
**केवलैस्तण्डुलैर्देवानृषीन् सतिलतण्डुलै: ॥**
**पितॄन् साक्षात्तिलैरेव तर्पयेद्द्विजसत्तम: ।**
**सतिलैस्तण्डुलैस्तीरे दद्यात्त्रीनुदकाञ्जलीन् ॥**
**ये के चेत्यम्बराम्भोभिस्तीरे निष्पीडयेत्तिलै: ।**
**स्नात्वैवं वाससाऽन्येन शिरोऽङ्गं परिमार्जयेत् ॥**
शिरोवारि शरीराम्बु वस्त्रतोयं यथाक्रमम् ।
पिबन्ति देवा मुनय: पितरो ब्राह्मणस्य तु ॥
तस्मात्स्नातो नावमृज्यात् स्नानशाट्या न पाणिना ।
स्नानवस्त्रेण हस्तेन यो द्विजोऽङ्गं प्रमार्जति ॥
वृथा भवति तत्स्नानं पुन: स्नानेन शुद्ध्यति ।
**स्नानं प्लवङ्गमस्येव कृतं विधि विना कृतम् ॥**
**वृथा द्विजन्मनस्तस्मात् विधिना स्नानमाचरेत् ।**
शुची वो हव्या मरुत इत्युक्त्वा शुद्धमम्बरम् ॥
संप्रोक्ष्य देवस्य त्वेति व्याहृत्याऽऽदाय भास्करम् ।
उदुत्यं जातवेदसमित्युक्त्वा दर्शयेत्तत: ।
आवहन्तीत्युदाहृत्य परिधाय द्विराचमेत् ॥

---

* सुमित्रा न आप ओषधयस्सन्तु । तै. सं. का. १. प्र. ४. अ. ४९.

*दुर्मित्रा इत्युदाहृत्य मृत्स्थाने जलमुत्सृजेत् ॥ ११ ॥
†योऽस्मान्द्वेष्टीत्युदाहृत्य तथा तत्र जलं क्षिपेत् ।
‡यं च वयं द्विष्म इति पुनस्तत्र जलं क्षिपेत् ॥ १२ ॥
§नमोऽग्नय इति मन्त्रेण नमस्कुर्यात्तु तज्जलम् ।
¶यदपामित्यमेध्यांशं निरस्येद्दक्षिणे जलम् ॥ १३ ॥
‖अत्याशनादिति द्वाभ्यां त्रिरालोड्य तु पाणिना ।
चतुरश्रं तीर्थपीठं पाणिनोल्लिख्य वारिषु ॥ १४ ॥
‡‡इमं मे गङ्ग इत्युक्त्वा गङ्गामावाह्य चात्र वै ।
+आवाहयामि त्वां देवीमिति चावाह्य जाह्नवीम् ॥ १५ ॥
अघमर्षणसूक्तस्य ऋषिरेवाघमर्षणः ।
छन्दोऽनुष्टुब्देवता तु भाववृत्तोऽधिदेवता ॥ १६ ॥

* दुर्मित्रास्तस्मै भूयासुः । तै. सं. का. १. प्र. ४. अ. ४९.
† योऽस्मान्द्वेष्टि । ,,
‡ यं च वयं द्विष्मः । ,,
§ नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः ॥
¶ यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात् ॥
‖ अत्याशनादतीपानाद्यच्च उग्रात्प्रतिग्रहात् ।
तन्नो वरुणो राजा पाणिना ह्यवमर्शतु ॥
सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः ।
नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्मसलोकताम् ॥
‡‡ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमᳵ सचता परुष्णिया ।
असिक्निया मरुद्वृधे वितस्तयाऽऽर्जीकीये शृणुह्या सुषोमया ॥
+ आवाहयामि त्वां देवि स्नानार्थमिह सुन्दरि ।
एहि गङ्गे नमस्तुभ्यं सर्वतीर्थसमन्विते ॥
विष्णुवामपदाङ्गुष्ठनखस्रोतोविनिस्सृते ।
तद्भक्तिविघ्नरूपात्त्वं गङ्गे मां मोचयैनसः ॥



[1]यथाश्वमेधः क्रतुराट् सर्वपापप्रणाशनः ।
द्रुपदा नाम गायत्री यजुर्वेदप्रतिष्ठिता ॥ १७ ॥
अन्तर्जले त्रिरावृत्य गुप्तपापं व्यपोहति ।
तथाऽघमर्षणं सूक्तं सर्वपापं व्यपोहति ॥ १८ ॥
आदित्याभिमुखो मज्जेदापो अस्मानिति त्वृचा ।
आदित्याभिमुखस्नानं **आपस्तम्बमतं** त्विदम् ॥ १९ ॥
आदित्याभिमुखस्नानं **याजुषाणां** विधीयते ।
सरित्सु चेत्तु सर्वत्र प्रवाहाभिमुखं मतम् ॥ २० ॥
प्रवाहाभिमुखस्नानमन्येषां तु प्रकीर्तितम् ।
त्रिषडष्टौ द्वादश वाऽऽवर्तयेदघमर्षणम् ॥ २१ ॥
सव्याहृतिं सप्रणवां गायत्रीं च जपेत्क्रमात् ।
अष्टाक्षरं महामन्त्रं सर्वपापप्रणाशनम् ॥ २२ ॥
अन्तर्जले त्रिरावृत्य संसारात्परिमुच्यते ।
†आपो हि ष्ठेति तिसृभिः दर्भपूतेन वारिणा ॥ २३ ॥

[1] Compare *SMP*, Āhnika, p. 261, the quotation under Yoga-Yājñavalkya; also *ibid.*, p. 262, *ll.* 11 and 12 under Vyāsa. Also *Bodhāyana-Dharma-Sūtra*, III, iv, 7.

The Aghamarsaṇasūkta as effectively washing sins is dealt with in chapters, III, V by Bodhāyana.

* आपो अस्मान्मातरश्शुन्धन्तु घृतेन नो घृतपुवः पुनन्तु विश्वमस्मत्प्रवहन्तु रिप्रम । तै. सं. का. १. प्र. २-अ. १

† आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधात न ; महे रणाय चक्षसे ॥
यो वश्शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥

तथा *तरत्समन्दीति सिञ्चेच्च तिसृभिः क्रमात् ।
†गोसूक्तेनाश्व ‡सूक्तेन §शुद्धवर्गेण चाप्यथ ॥ २४ ॥

---

* तरत्स मन्दी धावति धारा सुतस्यान्धसः । तरत्स मन्दी धावति ॥१॥
उस्रा वेद वसूनां मर्तस्य देव्यवसः । तरत्स मन्दी धावति ॥ २ ॥
ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे । तरत्स मन्दी धावति ॥ ३ ॥
आययोस्त्रिंशतं तना सहस्राणि च दद्महे ।
तरत्स मन्दी धावति ॥ ४ ॥ ऋ. मं. ९. सू. ५८. व. १९.

† आ गावो अग्मन्नुत भद्रमक्रन् । सीदन्तु गोष्ठे रणयन्त्वस्मे । प्रजावतीः पुरुरूपा इह स्युः । इन्द्राय पूर्वीरुषसो दुहानाः । इन्द्रो यज्वने पृणते च शिक्षति । उपेद्ददाति न स्वं मुषायति । भूयोभूयो रयिमिदस्य वर्धयन् । अभिन्ने खिल्ले निदधाति देवयुम । न ता नशन्ति न दभाति तस्करः । नैना अमित्रो व्यथिरादधर्षति । देवांश्च याभिर्यजते ददाति च । ज्योगित्ताभिः सचते गोपतिः सह । न ता अर्वा रेणुककाटो अश्नुते । न संस्कृतत्रमुपयन्ति ता अभि । उरुगायमभयं तस्य ता अनु । गावो मर्त्यस्य विचरन्ति यज्वनः । गावो भगो गाव इन्द्रो मे अच्छात् । गावः सोमस्य प्रथमस्य भक्षः । इमा या गावः स जनास इन्द्रः । इच्छामीद्धृदा मनसा चिदिन्द्रम । यूयं गावो मेदयथा कृशं चित् । अश्लीलं चित्कृणुथा सुप्रतीकम् । भद्रं गृहं कृणुथ भद्रवाचः । बृहद्वो वय उच्यते सभासु । प्रजावतीः सूयवसंरिशन्तीः । शुद्धा अपः सुप्रपाणे पिबन्तीः । मावस्तेन ईशत माऽघशंसः । परि वो हेती रुद्रस्य वृञ्ज्यात । उपेदमुपपर्चनम् । आसु गोषूपपृच्यताम् । उपर्षभस्य रेतसि । उपेन्द्र तव वीर्ये ॥ तै. ब्रा. २. प्र. ८. अ. ८.

‡ अयं ते अस्तु हर्यतः सोम आ हरिभिः सुतः ।
जुषाण इन्द्र हरिभिर्न आ गह्या तिष्ठ हरितं रथम् ॥
हर्यन्नुषसमर्चयः सूर्यं हर्यन्नरोचयः । विद्वाँश्चिकित्वान् हर्यश्व वर्धस इन्द्र [विश्वा अभि श्रियः ॥
द्यामिन्द्रो हरिधायसं पृथिवीं हरिवर्पसम् ।
अधारयद्धरितोर्भूरि भोजनं ययोरन्तर्हरिश्चरत् ॥
जज्ञानो हरितो वृषा विश्वमा भाति रोचनम् ।
हर्यश्वो हरितं धत्त आयुधमा वज्रं बाह्वोर्हरिम् ॥
इन्द्रो हर्यन्तमर्जुनं वज्रं शुक्रैरभीवृतम् ।
अपावृणोद्धरिभिरद्रिभिः सुतमुद्गा हरिभिराजत ॥ ऋ.मं.३.सू.४४.व.८.

§ एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना ।
शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान्ममत्तु ॥



तादद फलार्थिविषयम् । अन्येषां तु स्वयंप्रयोजनत्वं प्रागेव स्थापितम् । तदभिप्रायेणोक्तं वङ्गिवंशेश्वरैः—

"एवमेकदिनं वाथ[1] द्विदिनं त्रिदिनं तु वा ।
मासं वा वत्सरं वापि यावज्जीवितमेव वा ॥
वर्तेत भक्त्या परया वैष्णवः सुचिरं सुखम् ।
प्रारब्धे मध्यतो विघ्ने विच्छिन्नेऽप्यत्र कर्मणि ॥
नानर्थो न च नैष्फल्यं न कृतांशस्य संक्षयः ।
प्रारब्धेष्वसमाप्तेषु विच्छिन्नेष्वन्यकर्मसु ॥
भवत्येवैतदखिलं वैदिकेष्वितरेष्वपि ।
कृतस्वल्पांशकोऽप्यस्य स्थित्वा सुचिरमक्षयम् ॥
त्रायेतैव स्वकर्तारं स्वशक्त्या भवभीतितः ।
श्रद्धावानधिकार्यस्मिन्नुक्ते कर्मणि[2] वैष्णवे ॥
नापरः कुलवृत्तादिगुणः कर्तुर्विशेषतः[3] ।
येन केनचिदेषित्रा भाव्यमस्मिंस्तु कर्मणि ॥
तस्मिन् सुदुर्लभे लब्धे [4]कृपैवानन्तरक्रिया ।
ज्ञानकर्मतपोयोगयुक्तानप्यधिकारिणः ॥
श्रद्धाहानिः परो दोषश्च्यावयेदधिकारतः ।
स्वोक्तासूपनिषत्स्वेवमुक्तवानुत्तमः पुमान् ॥
श्रद्धाश्रद्धे समुद्दिश्य तस्माच्छ्रद्धा परो गुणः ।

---

[1] एकदिनं यावत्—क, ख, ग, च, झ.
[2] अस्मिन् युक्ते कर्मणि—मुद्रितकारिकाग्रन्थपाठः.
[3] कर्तुं विशेषतः—क, झ ; कश्चिद्विशेषतः—घ ; कर्तृविशेषतः—च.
[4] क्रियेव—घ, ङ, च, छ.

नेह कालक्रियाकर्तृद्रव्यदिग्देशसंश्रिता[1] ॥
एषितारं तदिच्छां वा विहायास्ति नियन्त्रणा ।
निषेधाविषयीभावादृते नैवापरो गुणः ॥
प्रीतिहेतुः परेशस्य स्वार्चनाङ्गेषु वस्तुषु ।
अत एवार्चनाङ्गानि द्रव्याणि गणयन् स्वयम् ॥
प्राह पत्रादिमात्राणि जातिवर्णादिभिर्विना ।
अहो हरिं ब्रुवन्नेवं मुक्तिमेत्यप्यहो अहो ॥
अहो अहो सुलभता कृपा चेयमहो अहो ।
अस्त्येव निर्मलं तोयमयत्नसुलभं भुवि ॥
दृश्यन्ते च शुभा दूर्वाः सुलभाः सर्वदिक्ष्वपि ।
अस्ति जिह्वा [2]हरिं स्तोतुमात्मीयैवास्यमध्यगा ॥
स्वकरावपि कर्मीणौ ध्यातुमस्त्येव मानसम् ।
अतो न हानिर्मन्त्राणां [3]यागविघ्नकरी हरेः ॥
सामग्र्येषा हि सम्पूर्णा [4]पत्राद्येकैकमेव तु ।
अज्ञानादथवा ज्ञानादपराधेषु सत्स्वपि ॥
प्रायश्चित्तं क्षमस्वेति प्रार्थनैकैव केवलम् ।
सत्यसंकल्पसंयुक्ते सर्वज्ञे सर्वशक्तिके ॥
नित्यनिर्दोषनिःसीममहाविभव[5]योगिनि ।
स्वाधीनत्रिविधाशेषचिदचिद्वस्तुशेषिणि ॥

[1] संस्थिता—क, ख, ग, झ.
[2] हरिं वक्तुं—ङ, छ.
[3] योग—ङ, च, छ.
[4] वक्त्रादि—मुद्रितकारिकापाठः.
[5] महामहिम—ङ, छ.



निर्मलानन्तविज्ञाननिधावुदधिशायिनि ।
स्वसंकल्पकृताशेषजगज्जन्मलयस्थितौ ॥
अर्चनादिष्वनर्हत्वान्न कश्चिन्नापराध्यति ।
अतोऽनङ्गीकृताशेषकर्तृदोषविमर्शया ॥
कृपयैवास्य देवस्य सर्वोऽप्यर्हति तत्क्रियाम्" ॥ इति ।

अत्र 'तत्क्रियाम्' इति सामान्यनिर्देशात् यथाधिकारं साक्षात् समाराधनम्, परैस्तत्प्रवर्तनम्, समाराधनापेक्षितप्रदानेन शिश्रूषणम् इत्यादिकं सर्वं संगृहीतम्। उक्तन्यायेन न्यूनाधिकोपचारादिकमपि सर्वमुपपादितं मन्तव्यम् ।

अपि च, अप्रयत्नलभ्यैरान्तरपुष्पादिभिरपि भगवदुपासनं स्मर्यते—

**भगवदाराधने आन्तरपुष्पादीनां मुख्यत्वम् ।**

"अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः ।
सर्वभूतदया पुष्पं क्षमा पुष्पं विशेषतः[1] ॥
ज्ञानं पुष्पं तपः पुष्पं ध्यानं पुष्पं तु सप्तमम् ।
सत्यमेवाष्टमं पुष्पं तेन तुष्यति केशवः" ॥ इति ।

आह च भगवान् शौनकः—

"रागाद्यपेतं हृदयं वागदुष्टानृतादिना ।
हिंसादिरहितः कायः केशवाराधनं त्रयम्" ॥ इति ।

[1] पुष्पं तथैव च—घ.

प्रत्येकं सम्पूर्णसमाराधनमित्यर्थः । अतो यथाधिकारं यथाशक्यमत्र श्रद्धानैः दयार्द्रहृदयदेशिकोपदेशपूर्वकमनुप्रविश्य देश-काल-द-शाद्यानुगुण्येनाच्छिद्रम्, यथाक्रमं समाहृत्य वानुतिष्ठद्भि रनन्यप्रयोजनैः परमैकान्तिभिः अनवधिकपरमपुरुष-चरणपरिचरणरूपम्[1] अपवर्गैश्वर्यं यथारोग्यं यथायोग्यं चात्रैव भोक्तव्यमिति सिद्धम् ।

**पूर्णानुष्ठातुः समाहृत्यानुष्ठातुश्च तुल्यफलत्वम् ।**

**ग्रन्थोपसंहारः ।**

सव्यं पादं प्रसार्य श्रितदुरितहरं दक्षिणं कुञ्चयित्वा
जानुन्याधाय सव्येतरभुजमपरं[2] नागभोगे निधाय ।
पश्चाद्बाहुद्वयेन प्रतिभटशमने[3] धारयन् शंखचक्रे
देवीभूषादिजुष्टो जनयतु[4] जगतां शर्म वैकुण्ठनाथः[5] ॥

विदितनिगमसीम्ना वेङ्कटेशेन तत्त-
द्बहुसमयसमक्षं बद्धजैत्रध्वजेन ।
प्रतिपदमवधानं पुष्यतां सात्त्वतानां[6]
परिषदि विहितेयं पञ्चकालस्य रक्षा ॥

[1] परिचर्यारूपम्—क, ख, ग, च, झ.

[2] सव्येतरमितरभुजं—क, ख, ग, च, झ ; सव्येतरभुजमितरं—ङ, छ.

[3] प्रतिभयशमने—घ.

[4] वितरतु—ङ, छ.

[5] देवीभूषादिजुष्टो नवजलदनिभः पातु दिव्यः परो नः—इत्यस्मिन्नेव ग्रन्थे उपादान-विषयस्यावसाने दृश्यमानः पाठः (१३७ पुटे).

[6] सात्त्विकानां—क, ङ, च, छ, झ.



कण्डूलाः [1]कलिकज्जलाविलधियः केचिज्जडा निष्फलं
एवं वितथविकल्पाभ्यासवासनानिद्रया प्रसुप्तो लोकः स्वप्न इवाभूतमर्थं पश्यन् अप्रबुद्धस्तदभावं यथावन्नावगच्छति । यदा तु तत्प्रतिपक्षलोकोत्तरनिर्विकल्पज्ञानलाभात्प्रबुद्धो भवति । तदा [1]तत्पृष्ठलब्धशुद्धलौकिकज्ञानसंमुखीभावात् विषयाभावं यथावदवगच्छतीति समानमेतत् ॥

[1] See Mahāyānasūtrālaṅkāra XIV, 43 with Bhāṣya.

## B

## STHIRAMATI ON THE EXTERNAL THINGS

[The following extract is from the Bhāṣya (pp. 16-17) of Sthiramati on Vasubandhu's Triṁs'ikā, ed. S. Levi. Sthiramati is well-known to be one of the champions of the Āgamānusāri Vijñānavāda school. It will be seen from the extract below, that he has put forth for his view the arguments which are almost similar to those of his two predecessors, Vasubandhu and Diṅnāga.]

कथमेतद्गम्यते विना बाह्येनार्थेन विज्ञानमेवार्थाकारमुत्पद्यत इति । बाह्यो ह्यर्थः स्वाभासविज्ञानजनकत्वेन विज्ञानस्यालम्बनप्रत्यय इष्यते न कारणत्वमात्रेण समनन्तरादिप्रत्ययादिविशेषाप्रसङ्गात् । न च सञ्चितमवयवसंहतिमात्राद् अन्यद् विद्यते । तदवयवान् अपोह्य सञ्चिताकारविज्ञानाभावात् । तस्माद्विनैव बाह्येनार्थेन विज्ञानं सञ्चिताकारमुत्पद्यते । न च परमाणव एव सञ्चितास्तस्यालम्बनम्, परमाणूनाम् अतदाकारत्वात् । न ह्यसञ्चितावस्थातः सञ्चितावस्थायां परमाणूनां कश्चिदात्मातिशयः । तस्माद् असञ्चितवत् सञ्चिता अपि परमाणवो नैवालम्बनम् ॥ अन्यस्तु मन्यते । एकैकपरमाणुरन्यनिरपेक्ष्योऽतीन्द्रियः । बहवस्तु परस्परापेक्ष्या इन्द्रियग्राह्याः । तेषामपि सापेक्षनिरपेक्षयोरात्मातिशयाभावाद् एकान्तेनेन्द्रियग्राह्यत्वम् अतीन्द्रियत्वं वा । यदि च परमाणव एव परस्परापेक्षा विज्ञानस्य विषयीभवन्ति । एवं सति योऽयं घटकुड्याद्याकारभेदो विज्ञाने स न स्यात् । परमाणूनामतदाकारत्वात् । न चान्यनिर्भासस्य विज्ञानस्य अन्याकारो विषयो युज्यते । अतिप्रसङ्गात् । न च परमाणवः स्तम्भादिवत् परमार्थतः



सन्ति । अर्वाङ्मध्यपरभागसद्भावात् । तदनभ्युपगमे वा पूर्वदक्षिणापरोत्तरादिदिग्भेदो यः स परमाणो र्न स्यात । ततश्च विज्ञानवत् परमाणोरप्यमूर्तत्वमदेशस्थत्वञ्च प्रसज्यते । एवं बाह्यार्थाभावाद् विज्ञानमेवार्थाकारमुत्पद्यते । स्वप्नविज्ञानवद् इत्यभ्युपेयम् । वेदनादयोऽपि नातीता ना[ना]गतास्तदाकारविज्ञानजनकाः । निरुद्धाजातत्वात् । न च वर्तमाना वर्तमानजनकाः । उत्पद्यमानावस्थायामसत्त्वाद् उत्पन्नावस्थायां विज्ञानस्यापि तदाकारेणोत्पन्नत्वान् न किञ्चित् कर्तव्यमस्तीति मनोविज्ञानमप्यनालम्बनमेवोत्पद्यते ॥

## C

## YOGĀCĀRAS' CLASSIFICATION OF PHENOMENA (DHARMAS)

## महायानशतधर्मविद्यामुखम्*

### बोधिसत्त्ववसुबन्धुकृतम्

*Mahāyānas'atadharmavidyāmukham*

[The following is the Sanskrit translation of a treatise above named from the Chinese version of Hiuan

* Nanjio No. 1213. Shanghai ed. Vol. marked *lai*, part 10, fol. 11*a*.

Tsang. It is attributed to Bodhisattva Vasubandhu. It will be clear from the perusal of the treatise that it is merely a catalogue of a hundred dharmas into which the Yogācāras have classified the things external as well as internal as against the Vaibhāṣikas who have put them into seventy-five items. A detailed account of the classification of dharmas made by Vaibhāṣikas is given by Prof. Th. Stcherbatsky in his ***Central Conception of Buddhism***; Appendix.]

यथाह भगवान् । सर्वधर्मा निरात्मका इति । [तत्र] के सर्वधर्माः । किं नैरात्म्यम् । सर्वधर्माः संक्षेपेण पञ्चविधाः—१ चित्तधर्मः, २ चैतसिकधर्मः, ३ रूपधर्मः, ४ चित्तविप्रयुक्तसंस्कारधर्मः, ५ असंस्कृतधर्म† इति ।

प्रथमश्चित्तधर्मः संक्षेपेण अष्टप्रकारो भवति । १ चक्षुर्विज्ञानम्, २ श्रोत्रविज्ञानम्, ३ घ्राणविज्ञानम्, ४ जिह्वाविज्ञानम्, ५ कायविज्ञानम्, ६ मनोविज्ञानम्, ७ मननविज्ञानम् (=क्लिष्टं मनो०), ८ [1]आलयविज्ञानमिति ।

द्वितीयश्चैतसिकधर्मः संक्षेपेण एकपञ्चाशद्विधः[2] षड्राशिषु विभक्तः ।

† See Mah. Sūtrālaṅkāra, XI, 37. Prakaraṇāryavācā s'āstra. as quoted by Prof. Tucci; *v* his article, The Idealistic School in Buddhism, p. 8, published in the Dacca University Bulletin, No. XII.

[1] The Vaibhāṣikas do not accept the last two types of consciousness, *manana* and Ālayavijñāna, and bring the other types under one group, vijñāna, counted as one dharma.

[2] According to the Vaibhāṣikas Cetasikadharmas are only 46: (1)*Cittamahābhūmikāḥ* 10, (2) *Kus'alamahābhūmikadharmāḥ* 10, (3) *Kles'amahābhūmikadharmāḥ* 6, (4) *Akus'alamahābhūmikadharmāḥ* 2, (5) *Upakles'a-(paritta) bhūmikadharmāḥ* 10, (6) *Aniyatabhūmikadhārmāḥ* 8: Total 46.



| | | |
|---|---|---|
| १. | सर्वत्रगाः पञ्च | 5 |
| २. | विनियतभूमिकाः पञ्च | 5 |
| ३. | कुशला एकादश | 11 |
| ४. | क्लेशाः षट् | 6 |
| ५. | उपक्लेशा विंशतिः | 20 |
| ६. | अनियताश्चत्वारः इति । | 4 |
| | Total | 51 |

(१) पञ्च सर्वत्रगाः[3]—१ मनस्कारः, २ स्पर्शः, ३ वेदना, ४ संज्ञा, ५ चेतना ।

(२) पञ्च विनियतभूमिकाः[4]—१ छन्दः, २ अधिमोक्षः, ३ स्मृतिः, ४ समाधिः, ५ मतिः ।

(३) एकादश कुशलाः[5]—१ श्रद्धा, २ वीर्यम्, ३ ह्रीः, ४ अपत्रपा, ५ अलोभः, ६ अद्वेषः, ७ अमोहः, ८ प्रश्रब्धिः, ९ अप्रमादः, १० उपेक्षा, ११ अहिंसा ।

(४) षट् क्लेशाः[6]—१ रागः, २ प्रतिघः, ३ मानः, ४ मोहः, ५ विचिकित्सा, ६ [7]मिथ्यादृष्टिः ।

[3] These are mentioned by Vasubandhu in his Triṁs'ikā, vers. 3 c-d and explained by Sthiramati in his Bhāṣya thereon.

[4] Triṁs'ikā, ver. 10 b-c; Bhāṣya. pp. 25-6. It may be noted that this group and the previous one are put under one class, *cittamahābhūmikāḥ* by the Vaibhāṣikas.

[5] Triṁs'ikā, ver. 10d-11*a*-c; Bhāṣya, pp. 26-28. The Vaibhāṣikas omit *amoha* in this group.

[6] Triṁ. ver, 11c-12*a*; Bhāṣya p. 28-9. The Vaibhāṣikas count them thus: 1. *moha*, 2. ***pramāda***, 3. ***kausīdya***, 4. ***as'raddhā***, 5. ***styāna***, 6. ***auddhatya*** which are, omitting *moha*, counted amongst 20 upakles'as by Yogācāras.

[7] Lit. असम्यग्दृष्टिः Sthiramati explains it as ***pañca satkāyadṛṣṭayaḥ***.

(५) विंशतिरुपक्लेशाः[8]—१ क्रोधः, २ उपनाहः, ३ प्रदाशः, ४ म्रक्षः, ५ माया, ६ मदः, ७ शाठ्यम्, ८ विहिंसा, ९ ईर्ष्या, १० मात्सर्यम्, ११ [9]आह्रीक्यम्, १२ अनपत्राप्यम्, १३ आश्रद्धयम्, १४ कौसीद्यम्, १५ प्रमादः, १६ स्त्यानम्, १७ उद्धवः, १८ मुषिता स्मृतिः, १९ असंप्रजन्यम्, २० विक्षेपः ।

(६) चत्वारोऽनियताः[10]—१ मिद्धम्, २ कौकृत्यम्, ३ वितर्कः ४ विचारः ।

तृतीयो रूपधर्मः संक्षेपेण एकादशविधः—१ चक्षुः, २ श्रोत्रम, ३ घ्राणम्, ४ जिह्वा, ५ कायः, ६ रूपम्, ७ शब्दः, ८ गन्धः, ९, रसः, १० स्पर्शः, ११ धर्मायतनसंगृहीतं [11]रूपम् ।

चतुर्थश्चित्तविप्रयुक्तसंस्कारधर्मः संक्षेपेण च[12]तुर्विंशतिविधः—१ प्राप्तिः, २ जीवि[13]तम्, ३ निकायसभागता, ४ पृथग्जातिः, ५ असंज्ञि-

[8] Triṁ. ver. 12*b*—13; Bhāṣya, pp. 30-31. The Vaibhāṣikas accept only the first ten upakles'as of this group.

[9] These two dharmas (*āhrīkhya* and *anapatrāpya*) are put by the Vaibhāṣikas under *akus'alamahābhūmikadarma*.

[10] Triṁ. ver. 14; Bhāṣya, pp. 31-33. These are, for the Vaibhāṣikas the first four of 8 *aniyatabhūmikadharmāh*. The other four *aniy. dharmāh, rāga, dveṣa, māna*, and *vicikitsā* are counted by Yogācāras amongst 6 kles'as. Some of the *kles'a* and *upakles'a* groups are mentioned in the Dhammadāyādasutta (Majjhima, I, 3, p. 15): *lobha, dosa, kodha, upanāha, makkha, palāsa, issā, maccheram, māyā, sāṭheyyam, thambha, sārambha, māna, atimāna, mada, pamāda*. These are again. mentioned as upakles'a of the mind in the Vatthūpamasutta (Maj. I, 7, p. 36f.)

[11] This is *avijñapti* for the Vaibhāṣikas.

[12] According to the Vaibhāṣikas they are only 14, *viz*. Nos. 1-3, 5-14: thus 13 in the above list of Yogācāras and *aprāpti* being added, 14 dharmas are counted.

[13] Chinese has *ming-hen* which means literally "life-hatred". I think the character *hen* is a mistake for *ken*, source; so I have taken both *ming-ken* to mean *jīvitendriya* or simply *jīvita*, the 7th dharma in the Vaibhāṣikas' list.



समापत्तिः, ६ निरोधसमापत्तिः, ७ असंज्ञिविपाकः, ८ नामकायः, ९ पद-कायः, १० व्यञ्जनकायः, ११ जातिः, १२ जरा, १३ स्थितिः, १४ अनित्यता, १५ प्रवृत्तिः or स्रोतःसन्ततिः १६ एवंभागीयः or समाध्यन्तरम्, १७ प्रतिबन्धः, १८ जावन्यम्, १९ क्रमः, २० देशः or दिक्, २१ कालः, २२ संख्या, २३ सामग्री or संयोगः, २४ भेदः or वियोगः ।

पञ्चमोऽसंस्कृतधर्मः संक्षेपेण [14]षड्विधः—१ आकाशः, २ प्रतिसंख्यानिरोधः, ३ अप्रतिसंख्यानिरोधः, ४ अचलनिरोधः, ५ संज्ञावेदयितनिरोधः, ६ तथता ।

उक्तं नैरात्म्यं संक्षेपेण द्विविधम्—२ पुद्गलनैरात्म्यम् २ धर्मनैरात्म्य[15]म् ।

इति महायानशतधर्मविद्यामुखम्

| | | |
|---|---|---|
| 1. | *Cittadharmāḥ* | 8 |
| 2. | *Cetasikadharmāḥ* | 51 |
| 3. | *Rūpadharmāḥ* | 11 |
| 4. | *Cittaviprayuktasaṁskāradharmāḥ* | 24 |
| 5. | *Asaṁskṛtadharmāḥ* | 6 |
| | Total | 100 |

[14] The Vaibhāṣikas admit only the first 3 asaṁkṛtas.

[15] The Vaibhāṣikas do not admit *dharmanairātmya*; dharmas for them are real entities. Nairātmya means "परिकल्पितपुद्गलधर्माभाव" and not "सर्वथैवाभाव"; see Mah. Sūtrālaṅkāra, XI, 47.

One may refer to S. Yamakami Sogan; *System of Buddhist Thought*, pp. 217-229 for a clear exposition in English of all the terms mentioned in this treatise.

D

# CLASSIFICATION OF PHENOMENA (DHARMAS) ACCORDING TO THE SAUTRĀNTIKAS

[It is already known that the Sautrāntikas as against the Vaibhāṣikas, reduced the number of Dharmas to forty-three. But how they have worked it out actually is not as yet known either from the Sanskrit, Chinese or Tibetan source. However, some hints as to the method of their classification of things are found in the Sivajñānasidhiyār, (second part, *parapakṣa*) and commentary thereon. The Sidhiyār, a polemical treatise in Tamil on S'aiva philosophy was composed by Aruṇandi Sivācāryar, a great S'aivait scholar of South India, who flourished in 1275-1325 A.D. The relevant portion of the section, ***Sautrāntikamata***[1] of the Sidhiyār is given below with the commentary which supplements the text with a very valuable necessary information on the subject.]

Text: There are only two pramāṇas, ***pratyakṣa***[2] and *anumāna*. The momentary knowledge and the knowable are their objects. These objects get divided

[1] This Section is studied and translated in full by the present writer and published in the Journal of the Srí Venkatesvara Oriental Institute, Tirupati, Vol. I, part 2, pp. 176-191.

[2] The commentator, Jñānaprakās'ar in explainning ***pratyakṣa***, quotes Dharmakirti : प्रत्यक्षं कल्पनापोढम् । It is divided into four : ***idriyapratyakṣa*** *mānasapr.* *yogapr.* and *svasaṁvedanāpr.* See Nyāyabindu, I. 4-11.



into four, *viz.* ***rūpa***, ***arūpa***, ***nirvāṇa*** and ***vyavahāra***. Each one of these four objects is again divided into two, and therefore they become eight in all, (ver. 3).

Two kinds of ***rūpa*** are: ***upādānarūpa*** and ***upādāya-rūpa***.

Two kinds of ***arūpa*** are: ***citta*** and ***karman***.

Two kinds of ***nirvāṇa*** are: ***sopadhis'eṣanir.*** and ***nirupadhis'eṣanirvāṇa***.

Two kinds of ***vyavahāra*** are: ***sad.*** and ***asadvyavahāra***, (ver. 4).

Four ***upādānarūpas*** are: earth, water, fire and air.

Four ***upādāyarūpas*** are: hardness, attraction, motion and heat.

***Rūpa*** is what is produced from the combination of the above eight elements (4 ***upādānar.*** and 4 ***upādāyar.***).

***Citta*** is that which cognizes a thing cognizable through the senses.

***Karman*** is to discriminate what is good and what is bad, (ver. 5).

Commentary: The author intends to bring all the five groups of elements of the Buddhists indicated in this verse No. 5. Of these five groups, rūpa includes eight elements, four ***upādānarūpas*** and four ***upādāyarūpas***; ***vedanā*** three, ***kus'alā***, ***akus'alā*** and ***kus'alākus'alā***; ***saṁjñā*** six, five sense organs[3] and one ***citta***;

[3] This is partly in harmony with Yos'omitra's comment : वैभाषिका हि ब्रुवते । भूतविकारविशेषा एवेन्द्रियाणीति । प्रवचने तु नैवम् । किं तर्हि । रूपादिव्यतिरिक्तानि अच्छानि अतीन्द्रियाणि स्वविज्ञानानुमेयानि इन्द्रियाणि येषां चक्षुरादीन्यधिष्ठानानि दृश्यन्ते । p. 24-25. See . My paper on ***Sarvāstivāda in S'aṅkarabhāṣya***, publ. in the Jour. of Orien. Research, Madras, Vol. XI, p. 28.

*vijñāna* six, vijñānas corresponding to the six above and *saṁskāra* twenty, ten good acts and ten bad acts.[4] Thus they work out forty-three in all. So says their Scripture:

> எட்டிவை யுருவமூன் றுவேதனை யாறுஞான,
> மொட்டிய குறிப்போரா று செய்கை யிருபதாகக்,
> கட்டிய பஞ்சகந்தங்கணத்தினிற் பங்கமாகித்,
> தொட்ட நாற்பத்து மூன்றுஞ்சுகதநூற் றுணிவு தானே.

" It is the *siddhānta* of the scriptures of the Buddhists that the forty-three [dharmas] which are momentary are counted in five skandhas which are built up of eight rūpas, three vedanās, six jñānas, their corresponding six saṁjñās and twenty saṁskāras."

[It may be noted that the asaṁskṛta elements, *ākāśa*, etc. which are not real entities for the Sautrāntikas, are not counted in the above list.]

[4] These ten good and ten bad acts are the same as daśa kuśalas and daśākuśalas divided into three, *vācika*, *kāyika* and *mānasika*.

## SANSKRIT INDEX

*(Roman figures refer to verses and Arabic ones to pages)*

अक्षवत् I, 26
अतदाकारत्वात् 26
अतदाभता I, 26
अणुस्वरूपं निरंशम् 34
अण्वाकारो (न विज्ञप्तिविषयः) III, 32
अध्यवसायान्तर 33
अनन्यत्वम् (विज्ञानशक्त्यो: 7
अनिर्धारितस्वभाव: (परमाणु:) 26
अनैकान्तिक(दोष) 26 (त्रि:), 29
अन्त: VI, 38
अन्यत्वम् (विज्ञानशक्त्यो:) 7
अन्योन्यहेतुकौ (शक्तिविषयौ) 7
अपार्थक 26
अभेद: (विज्ञानार्थयोः) 30
अर्थ 23
अर्थानुभव 109
अर्थापत्ति 26
असंघातत्वोपलम्भ 27
असिद्धि (दोष) 25, 35
आकारभेद 33, 34
आगम 28
आदर्शे विम्बवत् 25
आनुरूप्य ( = सारूप्य) 25
आरोपिताकार (अवयविन्) 35
आलम्बन (द्विविध) 3, ( = उत्पत्तिप्रत्यय) 4, (द्व्यंश) 30,—लक्षण 27-28
आलम्बनादविभक्तं (विज्ञानम्) 7
आशयान्तर 32
इन्द्रियम् (शक्तिरूपं न भौतिकं) VII, 10, 24, 25
—परमाणुवत् 26, 27
—बुद्धेः (आकारोत्पत्ति) 33
—विज्ञानानां विशेषाकारत्व 35
—वैकल्य 28
—शक्ति: प्रतिनियता 23, 33
उपचयापचयाभाव 34
एकाङ्गवैकल्य 4
एतच्छास्त्र 32
कठिनतादिवत् III, 32, 33
कश्चित् or केचित् 23, 27, 28, 30
कारणतादि (यथा—) 37
केशाद्यवभासि (यथा—) 37

क्षणिक (विषय) 109
ग्राहकांशवत् 39
ग्राह्यत्व ( = प्रत्ययत्व) 39
गाह्यांश ( = अणु) I, 36, 39
चित्तचैत्त 28
छायावृती 107
तत्त्व 22 ;—वचन 32
तथताज्ञान 32
तथागत 23
तदाकार(युक्तत्व)हेतु 24, 25, 27, 29
तारतम्य 32
दिग्भागभेद 107, 111
दृष्टान्त (साधारण—) 24, 29
द्विचन्द्र II, 4, 28, 29,
(मतभेद) 30
द्व्यणुकमालम्बनम् 23
निर्विकल्पज्ञान (लोकोत्तर—) 109
नैय्यायिक 6
पक्षधर्म 33
पक्षस्थापन 27
पक्षा( = न्याया)न्तर 36
पञ्चसप्ततिपदार्थ ( = विज्ञान) 38
परपक्ष 26
परमाणु (बाह्यार्थ) 3, (अभिन्न) 35, (अभेदक) 35, (निरवयव) 34, (अप्रत्यक्ष) 32, (अनिर्धारितस्वभाव) 26.
—सामान्यलक्षणमालम्बनम् 24, (असंयुक्तत्वेन आलम्बनत्वम्) 24,
—काय 24, (न एकं द्रव्यम्) 106
पारिमाण्डल्य 5
पिण्ड ( = सङ्घात) 106, 107
प्रतिघात 107
प्रतीत्यसमुत्पन्नता 28
प्रत्यक्ष 108
प्रत्यय (चतुर्विध) 36, 39
प्रमाण (अन्यत्) 26 ; (एक) 38
प्रयोग 32
बधिरान्धादि 22
बहिर्वत् VI, 37
बह्वाकार 31
बाह्यलक्षण 37
बाह्यवस्तु (मिथ्या) 38, 39
बाह्यार्थ (विना—) 110
भाग 38
मनस् (न षष्ठेन्द्रियम्) 20-21, 25
—विज्ञान 108, 109, 111, (पार्ष्ठिक—) 30
रथादिवत् 21
रूपादि 107,
—असिद्धि 108
लोकविरोध 36, 37
लौकिकज्ञान (शुद्ध—) 109
लौकिकानाम् 37
वादिन् (द्वि) 24
वास्तवाकार 33
विज्ञप्तिमात्र 108
विज्ञानपरिणाम 36
विशिष्टशक्ति 31
विषय ( = ज्ञानस्वरूप) 3



विषयाभाव 109
वृत्ति (द्वि) 38
वेदनादि 111
वैभाषिक 117, *n.*, काश्मीर—106
शक्ति VII, VIII, 7
शास्त्रकार 26
शृङ्गद्वय (यथा—) 39
सङ्घात 27, (बाह्यार्थ) 3, 102-3 ; (न द्रव्यम्) 28, (सांवृत) 33, 34 (व्यत्यस्ताकार) 36, 106
सञ्चय 32
सञ्चित 110
सञ्चिताकार III, 31, 32, 33
सभागविज्ञान 39
समनन्तरादि 110
समनन्तरनिरोध (यथा—) 39
सर्वभाव (भौतिक) 31, 32
सह VII, 39
साधन (द्विप्रकार) 38
सामग्री 23
सार्थक 27
सिद्धसाधन 35
सुखदु:खवेदनवत् 35
सुप्त (दृष्टान्त) 29
सूत्र 17, 36
सेनादिवत् 36
स्थूलदृष्टि 30
स्मरण 109
स्वपक्षे आलम्बन 36
स्वप्नादौ यथा 108
स्वप्नावस्थायाम् (यथा—) 38
स्वप्रतिज्ञा 26
स्वरूपविरोधदोष ( = विरुद्धहेतु) 39
स्वलक्षण 28
हेतुद्वय (वादमूल—) 24
हेतुफल 17

# ENGLISH GENERAL INDEX

(*Figures refer to pages*)

Abhidharmakos'a (BB. ed.) 95, 96, 102, 103
Advayavajrasaṅgraha (GOS.) 104
aggregate (not real entity) 69, 70 (empirical), 77, -of-atoms-object theory) 42 ff, 61 ff, 105 f.
*AKALAṄKA* 104
*ākāra*, v. form, image
*ananyatva* 55n.57, explained 100
*anirdes'ya* 53n.50
*anyatva* 55n.57, 100
*ARUṆANDISIVĀCĀRYA* 116
*artha* 42n.5, 43n.9
*arthāpatti* 66
*atiprasaṅga* 50n.37; (answered) n.40
atom (its indeterminate nature) 66
(atom-object-theory) 41, 60, 106
(atom-generality-object theory) 61-62, 103
*avayavin* 57
*ālambana*, (-dvibhāga, 45n.16; -*lakṣaṇa* 68; -*tā* 59; (explanation of—) 95
*ālayavijñāna* 51n.42
*ās'raya* 53 n.49; -*tā* 59
āvedha 54 n.52
*Bhavasaṅkrāntisūtra* 59 n.
*BHĀVAVIVEKA* 60 n.
*buddhivis'eṣa* 46 n.20
Buddhist 62
*CANDRAKĪRTI* 95, 99
causality 82
cause, mutual- 54; -inference 52 n.48
characteristic, two-fold- (of object) 68
chariot (as example) 57
*cittacaitta* 43 n.9
cohesion, *saṁyoga* 47 n.29
concomitant, mutually— 64
condidition (-simultaneous) 50, 84; (-in succession) 51 n. 42; two- 73
consciousness, —of the hair-like thing 82; five-fold— 56; sensual- 76
contradictory, not— 53 n.49
co-ordination 63, 66
dependent causation 68
*Dhammadāyādasutta* 114, n
*DHARMAPĀLA* 95, 97, 98
*DHARMAKĪRTI* 103-4
digbhāg (of atoms) 47 n.23
*DIṄNĀGA* 96, 99, 101, 103, 105, 110
*dravyataḥ* 43 n.11
elements, great- 44 n. 14
externally, "as if it exists— " 81
force, *s'akti*, 51
form (*ākāra*), 42; -attributed 78; atomic— 45, 75; combined—(*sañcitākāra*) 44 n. 14; (*sañcitakāra*-object- theory and its refutation) 44, 45 n.19, 73-74; gross—67, 73; (distinction in-) 46-47, 79; many- 44, 73; undifferentiated- 77
"form" 77; —(due to imagination) 83
*grāhyabhāga* 49 n. 33, 50 n.37
*grāhyāṁs'a* 82, 84
*grāhyasvabhāva* 59
happiness, feeling of— 78
*HIUEN TSANG* 95, 97, 100, 112
image, (-immanent in cons.) 84
"internally" 81, 83
*I-TSING* 21
Jains 62, 97
*JÑĀNAPRAKĀSA* 116 n.
*KAMALASĪLA* 97
"knowable aspect" 81
*KUMĀRILA* 62, n.
*LEVI, SYLVAIN* 95, 105, 110
lokavirodha 81
*Madhyamakavṛtti* 98
*Madhyamakāvatāra* (Sanskrit text) 95, 99
Mādhyamika 59 n., 102
Mahāyānasūtrālaṅkāra 109 n., 112 n., 115 n.
"many" 76
*MEYAR, HENRY* 42, 49, 54, 95, 101
mind (not the 6th sense) 55-58; (as sense and object) 64, (opinion on-) 101-102
mirror, image in— 64
misery, feeling of— 78
modolities, two— 54 n.44
moon, double— 43, 69-71; (views) 71-72
*NĀGĀRJUNA*, doctrine of—101
Naiyāyika 50, 101
*Nyāyabindu* (BB.) 58 n.
*Nyāybinduṭīkāṭippani* (BB.)102
*Nyāyavārtika* (Chawk.) 57, n., 59, n.
*Nyāyav. tātparyaṭīkā* (Chawk.) 104
*Nyāyavinis'caya* (Sindh Jain Series) 104
*Nyāyasūtra* 98
object (explained) 43,n.7; -cause 41 ff.; -image 67
objection (*dūṣaṇa*) 65
parts, two— (of ālambana) 72, (of cons.) 83
*PARAMĀRTHA* 54 n. 55, 95, 97-101
*pārimāṇḍalya* 46 n. 21
*PĀRTHASĀRATHI MIS'RA* 85, n., 98, 100, 101, 104
*POUSSIN*, L.V. 95, 99
*pradars'anārtham* 66
*Prakaraṇapañcikā* (Chawk.) 71, n.
*Prakaraṇāryavācāsāstra* 112,n.
*pramāṇa, ekam*—84
*Pramāṇavārtika* (Rāhula's ed.) 58, n., 61, n., 67, n., 71 n., 103, 104
*pratijñā* 55 n. 57
*pratyaya* 85
reason (inconclusive) 65, 70; (its exclusion) 76; (not established) 67
reinvestigating 77
resolve 66
*sabhhāga* 86
*sahakārin* 51 n.42
*s'akti* (=sense-faculty) 52, 53, 59,—*mat* 53 n. 49
*samanantaranirodha* 86
*saṁvṛtyā* 55 n.57
*SAṄGHABHADRA* 97
*Sāṅkhya* 102

*sañcitākāra*, v. form
*ŚĀNTARAKṢITA* 102
sandal wood 55, n. 57
*sapakṣadṛṣṭānta* 76
*sādhana* 83, 84
*sādhyadharma* 62
*sāmagrī* 59
*sāmānya* (=*sañcita*) 103
*sārūpya* 63, 66
Sarvāstivādin 52 n.46, 97
*Śāstra* 43 n.9; author of—65
scripture 81
*senā*, army 80
senses, *passim*; power of—75, (explained) 52
*siddhasādhana* 79
*Śivajñānasiddhiyār* 116
Sautrāntika 116
*ŚUBHAGUPTA* 96, 104
*Ślokavārtika* (Chawk.) 60, n., 85 n., 99—101
solidity (*kaṭhinatā*) 45, 75
sound-object 81
*STCHERBATSKY*, Th. 102, 112
*STHIRAMATI* 95, 113 n.
—on the external thing 110
*svalakṣaṇa* 69
*svarūpavirodha* 84
*svasaṁvedana* 53 n. 49
syllogism 66, 82, formulation of —76
*TĀRĀNĀTHA* 97
*taimirika* 49 n. 33
*tarka* 57
*tathatā*, suchness 75
Tathāgata 59
*Tattvasaṅgraha* (GOS.) 57, n., 58, n., 60, n., 96, 97, 102
thesis (formulated) 65
thing, (external-), *passim*
(of great elements) 73
(of distinct force) 73
different views on—) 96; Vasubandhu's criticism of—105-9. Sthiramati on—110-111
*Triṁśikābhāṣya* 95; Extract from—110
*TUCCI, G.* 112, n.
*VĀCASPATI MIŚRA* 104
*VĀGBHAṬA* 44 n. 13, 97
Vaibhāṣika 112; Kasmira—63, n.. 96, 102
Vaibhāṣika-Sautrāntika 102
Vaiśeṣika 47 nn. 27-28; (refuted) 48 n. 29, 96, 103
vāsanā 49 n. 35, 54
*VASUBANDHU* 95, 96, 102, 105-112, (Bhadanta-) 63, n.,98
*Vatthūpama Sutta* 114. n
Viṁśikābhāṣya 96, 102, 103; Extract from—105-9
*Vijñānapariṇāma* 81
Vijñānavādin 62, n., 101, 110
*VINĪTADEVA* 49n.36; 54 n. 55, 95-99. (His criticism of other school) 100
*viṣayākāratā* 54
Vedāntin 102
*vyavahāra* 43 n. 9
*UDYOTAKARA* 62, n.
*UI, H.* 60
*YAMAGUCHI, SUSUMA* 42, 49, 54, 95, 101
*YAMAKAMI SOGEN* 115, n.
*YAŚOMITRA* 95, 101, 103, 117, n.
Yogācāra-Sautrāntika 102

# TIBETAN INDEX

(WITH AUTHORISED SKT. EQUIVALENT)

(*Figures refer to verses*)

kyaṅ, apica 6
rkyen, pratyaya 7
gaṅ, yat 6
rgyu, kāraṇa 1
ci. dgar, yatheṣṭaṁ, *vṛtti ad* 7
gcig. chaḥaṅ, ekāṁso'pi (Original: saha) 7
de. ni, saḥ, *vṛtti ad* 7
de ḥi, tasyāḥ 1
de hi. rkyen. ñid . . . yin phyir. ro, tatpratyayatayā 6
der. mi. snaṅ. phyir, atadābhatayā 1
don, artha 6
don. du. snaṅ. ba, arthāvabhāsa, *vṛtti ad* 7
ḥdus. pahi. rnaṁ. pa, sañcitākāra 3
rdul. phran, aṇu (Original: saḥ) 1
naṅ. gi, antaḥ 6
nus. pa, śaktiṁ, *vṛtti ad* 7
nus. pa. hjog. phyir, śaktyarpaṇāt 7
rnam. par. śes. pahi. rten can, vijñānādhārām, *vṛtti ad* 7
rnam. pa. śes. ṅo. bohi phyir, vijñānarūpatvāt 6
snaṅ . . yin. te, avabhāsate 6
phyi. rol. ltar, bahirvat 6
phra. rab. rdul, aṇu (Orig.: grāhyāṁśa) 1
byed. pas, karotīti. *vṛtti* ad 7
dbaṅ. po. bzhin, akṣavat 1
dban. pohi. rnam. par. rig, indriyavijñapti. 1
ḥbras. bu. skyed. par. byed. pahi, kāryotpādaka (Orig.: —utpattaye) *vṛtti ad* 7
mi. ḥkhrul. phyir. ro, avyabhicāritvāt 7
mi. ḥgol. lo, avirodha, *vṛtti ad* 7
mod. kyi, yadyapi 1
zlum. po, pārimāṇḍalya, *vṛtti* ad 4 d.
yan. lag. gcig. ma. tshaṅ, ekāṅgavaikalya, *vṛtti ad* 2 c. d.
yul, viṣaya 1
raṅ. daṅ. mthun. pahi, svānurūpa. *vṛtti ad* 7
rim. gyis, kramāt 7,—kyaṅ, kramenāpi, *vṛtti ad* 7
śes. byahi. ṅo. bo, jñeyarūpa 6
sra. ñid. la. sogs. bzhin, kaṭhinatādivat 3

सुदृशो विधूय बहुशो निवारणं प्रणयेन मोचयति कञ्चुलीं प्रिये ।
लघुसङ्कुचत्तनुलतैव लज्जया पुनरप्यसौ पुलककञ्चुकीमधात् ॥ ६६ ॥
अयि किं बिभेषि भवदन्तिके सखी निवसत्यसौ निपुणमीक्ष्यतामिति ।
अदसीयबिम्बमधिरत्नभित्तिगं परिसूच्य[1] तां पतिररुन्ध गत्वरीम् ॥ ६७ ॥
अयि मार्ज्यते लगति चेदपाङ्ग इत्यवमार्जयन्निव तदङ्गमस्पृशत् ।
अतिदीनमर्हति न गाढबन्धनान्यवलग्नमित्यहरदंशुकाञ्चलम् ॥ ६८ ॥
अधरं गृहीतवति कामुके हठादतनोत्कुचावरणमात्तसम्भ्रमा ।
अलघुस्तनस्पृशि ततो नवा वधूरवति स्म नीविमवलम्ब्य पाणिना ॥ ६९ ॥
भुजवल्लरीं द्विगुणितामुरोजयोः परिधानवाससि परं कराञ्चलम् ।
दृशमर्पयन्त्यपि च दीपिकार्चिषि प्रमदा निरैक्षि गमिता प्रियान्तिकम् ॥७०॥
दयिते करस्पृशि दरानुरागयोस्सममैक्षि कम्पपुलकश्रमोदकम् ।
अधरं हठात्कृतवति[2] त्रपामुदोरसितभ्रुवस्सदृशमक्षिमीलनम् ॥ ७१ ॥
सविधं प्रियस्य गमिता सखीजनैर्विनताननना विधुमुखी त्रपावशात् ।
प्रतिबिम्बभाजि पतके च सा दृशौ निमिमील तां निभृतमाश्लिषद्विटः ॥७२॥
अपदिश्य किञ्चन सखीषु गत्वरीष्वदवीयसि प्रियतमे तमोमुषि ।
अपि दीपिकार्चिषि मुहुस्सतर्जनं सभयं सरोषमभवत्तदीक्षणम् ॥ ७३ ॥
प्रणयोत्तरं किमपि पृच्छति प्रिये न परं ददे प्रतिवचो नवोढया ।
अथ दत्तमप्यगमि न श्रवःपदं[3] गमितं तदप्यजनि न स्फुटीकृतम् ॥ ७४ ॥

[1] परिमुच्य तां—ख, ग, घ, ङ.
[2] धृतवति—झ.
[3] पथं—ख, ग, घ, छ.

अवलम्ब्य रोमलतिकामवातरत्कुटिलभ्रुवः कुचमहीधरादयम् ।
अथ नाभिमण्डलसुरङ्गमाविशन्नभिकस्य[1] पाणिरथ नीविमग्रहीत् ॥ ७५ ॥
कबरीकलापतमसा विसारिणा कबलीकृते सति मुखक्षपाकरे ।
प्रमदोत्तराविव पयोधराभिधौ रमणीमणेः रथपदावनृत्यताम् ॥ ७६ ॥
शयपल्लवस्सहचरस्य साहसादहृतोत्तरीयमथ तन्निवारणे ।
सुदृशः कराग्रवलयेन चुक्रुशे स्तनदुर्गमेष गमितस्तदाऽमुना ॥ ७७ ॥
नवमेखलानिनदनाभ्युदञ्चनं कुचशीर्णहारकुसुमाञ्जलिश्रियः ।
स्फुटबन्धभेदबहुभूमिकाविटैस्सुदृशो बभुः सुरतलास्यविभ्रमे ॥ ७८ ॥
सहमृगनयनाभिस्तत्र संक्रीडमान-
शशिधवलविताने सागरस्योपकण्ठे ।
पतिरिव कमलायाः पाथसि क्षीरसिन्धो-
श्शयनमयमयासीच्छासिताऽपि क्षमायाः ॥ ७९ ॥

इति[2] राजनाथस्य[3] कृताबच्युतरायाभ्युदयनाम्नि[4] महाकाव्ये नवमस्सर्गः ॥

[1] न हि कस्य—अ, छ.
[2] इत्यच्युत—छ.
[3] थकृता—क, ख, च, झ.
[4] दये न—क, ख, च, छ, झ.

## दशमस्सर्गः

कक्ष्यान्तरेऽथ मगधाः करजाग्रयोगाद्युच्चकीकृतश्रुतिसुखां[1] विरचय्य वीणाम् ।
नाथं भुवो भणितिभिर्नयजागरूकं प्राबोधयन्दिनमुखस्तुतिपक्ष्मलाभिः ॥ १ ॥
आस्वाद्य पूर्वमविशङ्कमभीशुमिन्दोराराद्विरामसमये [2]कणशो गृहीतम् ।
चञ्चूपुटेषु कलयन्ति चकोरकान्ताः सञ्चिन्त्य शावककुलानि तृषाऽऽकुलानि ॥
सायम्मिलद्दलशताक्रमणाद्विरेफस्संरक्षितुं सहचरीं विततौ चिराय ।
सङ्कोचयत्यतिजडौ गरुतौ[3] कथञ्चित्सांहासिकस्पृशि शनैर्मुकुले[4] नलिन्याः ॥
कारानिभात्कमलकुड्मलतश्चिराय
निर्गत्य षट्पदयुवा कुमुदे न्यवात्सीत् ।
तत्राऽपि [5]सङ्कुचददश्च्छदपीडितोऽभू-
त्कुत्राऽपि भावि न जहात्यसुखं सुखं वा ॥ ४ ॥
ज्योत्स्नाम्बुपूरमपसार्य दिशावकाशकूलङ्कषं कुवलयाक्रमणानुकूलम् ।
ध्वान्तौघमुद्गरखरांशुखनित्रपातान्विस्तारयत्यरुण[6] एष वियत्तटाकम् ॥ ५ ॥

[1] धां वि—अ, क, ग, च.
[2] कणिशं गृ—च, ज.
[3] तौ स किञ्चित्—छ.
[4] लैः न—छ.
[5] सङ्कुचिततच्छदपी—छ.
[6] निर्भर—अ ; कर्दमहरांशुखनित्रपातो—छ ; मुद्गरहरांशु—ज ; मुद्गर—झ.

पादाग्रतः कमलिनी [1]परिदृश्यमाना [2]प्रादुस्मिताऽम्बुजमिषात्प्रथमं प्रबुद्धा ।
पत्युर्निजस्य परिपालयतीव बोधं पन्था ह्ययं परिचितः पतिदेवताभिः ॥ ६ ॥
आलोक्य [3]दूरमितरेतरमश्रुयोगादग्रेऽपि मार्गमवगन्तुमपारयन्तौ ।
पश्चात्परस्पररवानुगमाद्भ्रमन्तौ संरम्भतो रथपदौ दिवसं घटेते ॥ ७ ॥
व्यग्रास्समीहितफलाय विधाय [4]दृष्टिं व्या[5]प्तारुणद्युतिनि विष्णुपदेऽनुवेलम् ।
विद्योतयन्ति विविधागमशाखिकायामुच्चैस्स्वरप्रकरणा[6]न्युदये द्विजौघाः ॥ ८ ॥
आश्लेषविच्युतिसं[7]हानवकल्प्य मुग्धान् जग्धावशिष्टकणिशार्पणतः किशोरान् ।
क्वापि क्रमोपचितकूजनधोरणीका निर्यान्त्यतश्शकुनयस्तरुनिष्कुटान्तात् ॥९॥
अर्घ्योदकानि महसामधिपाय दातुमाबिभ्रतोऽञ्जलिपुटेष्वखिलान्द्विजातीन् ।
अम्भोजिनीपरिषदः किमिहानुकुर्वन्त्यन्तर्मरन्दरसदन्तुरितारविन्दाः ॥ १० ॥
विस्तार्यमाणमरविन्दकरन्नलिन्या विप्रश्निका समवलोक्य नि[8]शान्तवेला ।
सन्ध्यांशुदण्डमधिशक्रदिशं प्रचाल्य प्राह प्रियागमशु[9]भं पततां विरावैः ॥११॥
अन्तेवसन्तमप[10]सारितपाशबन्धं वत्सं कटाक्षिततनौ सुरभौ नियोज्य ।
गोपालकोऽयममृतं गुरु[11]मप्रमेयमापीडितो मिषदधस्तनजन्म दुग्धे ॥ १२ ॥
इन्दीवराण्युद[12]यतीशितरि ग्रहाणां निद्रान्ति यन्नियतमभ्युदयान्यमूनि ।
इत्येव तानि परिहृत्य वलन्ति मन्दमिन्दिन्दिरद्विजकुलान्यरविन्दबृन्दे ॥१३॥

[1] परिमृश्यमाना—ज.
[2] दुत्थिताम्बु—छ.
[3] योगमि—अ.
[4] वृष्टिं—च, छ.
[5] प्तानल—च, छ.
[6] न्युभये—अ.
[7] सुखानव—च, छ ; ज.
[8] हि वेला—छ ; विभातवेला—ऋ.
[9] मुदं—ख, ऋ.
[10] वसारि—छ.
[11] रुप्र—छ.
[12] दयविक् प्रथमे—क.



सन्ध्याच्छलेन मुखमार्जनवस्त्रमाशासौत्रामणी वरुणदिक्च्छशिमण्डलाग्रम् ।
अभ्रश्रियैव विजिहीषति भानुमालिन्यम्भोजिनी वहति चाब्जमयीं कलाचीम् ॥
मन्देहलोकमखिलं मथितुं पयोधेर्निर्गच्छतश्शुभनिरीक्षणकालजन्मा ।
निश्वासबन्ध इव नीरजलोकबन्धोः प्राभातिको विवलते पवनस्तुषारः ॥१५॥
सम्प्रेष्य हेतिसमवायमहर्मुखेन स[1]न्दारितान्धतमसः प्रसरं समन्तात् ।
पाथोजिनीः किमखिलाः परिणीय दूरात्प्रख्यायते पतिरसाविति भानुरासाम् ॥
निक्षिप्तमात्मनि सुरक्षितमाप्रभातं पूष्णे वसूच्चयमयी पुनरर्पयित्वा ।
दीपास्सजाड्यमवपत्य दशांशुकान्ते निद्रान्ति सङ्कुचदभीशुनिभप्रतीकाः ॥
आभोगवत्प्रथमशैलकुचाग्रलीनमाकृष्य चन्द्रकिरणांशुकमब्जबन्धौ ।
आश्लिष्यति स्वमचिरेण हरिद्विलारेरालक्ष्यते सुखनिमीलिततारके[2]यम् ॥ १८ ॥
निर्गच्छतो निखिलसन्तमसं नियन्तुं[3] नेतुस्त्विषां त्रिभुवनाऽनुजिघृक्षयाऽग्रे ।
स्थातुं न युक्तमसहायतयेति कुत्राप्यन्तर्दधाति रभसादधिभूर्द्विजानाम् ॥१९॥
आकर्ण्य कर्णमधुरामिति मागधोक्तिं कान्तो भुवः परिसमापितकाल्यकर्मा ।
प्रातिष्ठताऽस्तपवमानजवाभिमानमारुह्य वाहमपरोक्षितताक्ष्र्यवाहः ॥ २० ॥
कक्ष्यान्तरेषु कलितस्थितिभिः पुरैव कालानुकूलपरिकर्मकरम्बिताङ्गैः ।
आरूढवाहनिवहैरनुबद्धरागं नाथोऽन्वगामि धरणेर्नरपालवर्गैः ॥ २१ ॥
निर्भर्त्स्यमानकुलिशारभटीनिरूढिं निस्साणराणमिव सोढुमशक्नुवानः ।
आवर्तकर्णविव[4]रार्पितफेनकू[5]लमालोक्यते किमपरं पतिरापगानाम् ॥ २२ ॥

[1] न्दर्शिता—छ.
[2] कोयम्—च.
[3] न्तुः—झ.
[4] वराचित—ज.
[5] लामा—झ.

निर्गच्छतां कलकलैर्निबिडं भटानां निर्याणतूर्यजनुषा निनदारभट्या ।
गन्धर्वहेषितरवैर्गजगर्जितैश्च सर्गो विधेरजनि शब्दमयः किलैषः ॥ २३ ॥

सम्भ्राम्यतोपकरणग्रहणे समन्तात्
　　प्राक्प्रेषिताखिलपदार्थनिराकुलेन ।
विक्षिप्य वस्तु चलितेन विना सहायं
　　तद्ग्राहिणाऽजनि जवेन तदाऽपरेण ॥ २४ ॥

अग्रे दृशोर्विदधतीव जगत्त्रयैक्यमाक्रम्य सर्वमवनीतलमप्यमान्ती ।
आलक्ष्यतः क्षितिधराक्रमणापदेशाद्राशीकृतेव वसुधारमणस्य सेना ॥ २५ ॥

आशास्वहंप्रथमिकोल्लसितैरनीकिन्यश्वीयपांसुभिरगादनवेक्ष्यमाणा ।
आशङ्क्य धावनमरातिमहीपतीनामाबिभ्रतीव महतीयमदृश्यविद्याम् ॥ २६ ॥

आस्वाद्य तोयमधिवर्त्म जनानजस्रं
　　छायालभूमिषु निषद्य निषद्य यातान् ।
आशान्त[2]दिग्गजमदाम्बुविलम्बिनिर्य-
　　दाराद्धजाटविषु सैन्यरजोऽन्वकार्षीत् ॥ २७ ॥

एतत्प्रयातु बलमेत[3]दपि प्रयायादित्येव कश्चिदपथे[4] सुचिरं न्यवात्सीत् ।
आगच्छदेतदधिकं न खलु व्यरंसीदस्यैव किन्तु विरलं पथि[5] गन्तुमाशा ॥२८॥

सम्मर्दतः पथि चमूश्शिथिला समन्तात्संवर्तसिन्धुसमसन्नहना व्रजन्ती ।
आविर्मिथः कलकलारवमन्तरालेऽप्याद्यन्तयोस्तटवती महतीरतारीत् ॥ २९ ॥

[1] भ्राजितो—छ.
[2] चान्त—क, च.
[3] तदिति प्र—अ, छ.
[4] येषु चि—अ, छ.
[5] धिकं दुराशा—छ.



आबुद्ध्य तथ्यमिति कूटकृतं भटानामायोधनं सुवदनाऽऽश्लिषदात्मनाथम् ।
तत्त्वं तदात्व[1]जनितं स जनोऽपदिश्य तां वारयन्निव भयात्तरसाऽऽलिलिङ्ग ॥३०॥

आरोपिता तुरगमाशु नियम्य कण्ठमाबध्नती सवलयेन भुजेन काचित् ।
नाथेऽङ्कभारमतनिष्ट नतभ्रुवोऽस्या वाहाधिरो[2]हणमजायत वैभवाय[3] ॥ ३१ ॥

दाशेरकत्वरितदर्शनतो महोक्ष-
　　मुत्प्लुत्य यान्तमनुयातुमुदग्रवेगम् ।
स्रस्तां विहातुमप[4]टुस्सरणौ च गोणी-
　　म्मध्ये त्रिशङ्कुरिव कोऽपि वणिग्बभूव ॥ ३२ ॥

कश्चिद्द्वयेन सह कापथधावितेन गाढं निपत्य भुवि नाऽव्यथताऽऽहतोपि ।
सोऽयं गतानुगतिकाखिललोकहा[5]सकोलाहलैरहह कोरकितव्यथोऽभूत् ॥ ३३ ॥

[6]सम्बोधतो विशिथिलं जरती स्ववर्ग्यानाख्यानपूर्वकमनुक्ष[7]णमाह्वयन्ती ।
विष्वक्[8]कथाऽनुवदतो जगतो विनोदात्प्रीत्यै कटूक्तिमुखराऽप्यभवन्महत्यै ॥३४॥

अन्यश्चमूनिबिडितानविषह्य मार्गान्मार्गान्तरं समनुगन्तुमनाश्चचाल ।
तत्रावकाशमनवाप्य तथा विमर्दात्कु[9]ण्ठक्रमोऽजनि कुतो गतिर[10]स्थिराणाम् ॥

संरम्भतस्सरयमुत्पतिताश्चमूनां स्थातुं जनैरविरतास्वटवीष्वशक्ताः ।
श्रान्ताश्चिराय दिवि च भ्रमितुं शकुन्ता वेतण्डकेतुषु विशश्रमुरुच्छ्रिखेषु ॥

[1] तु जनि—छ.
[2] धिरोपण—ख.
[3] From verse 32 to verse 48 the text is missing in manuscript ज.
[4] पटः—छ.
[5] भास—ख.
[6] संबाधतो—अ, च, छ, झ.
[7] भावहन्ती—झ.
[8] कृकुदानुवद—अ, झ.
[9] कण्ठक—क, घ.
[10] रस्खलानाम्—छ.

कश्चिच्छशः कलकलाकुलमेव लोकैराबद्ध[1]चक्रमभितो[2]ऽप्यनुधाव्यमानः ।
सम्बाधवद्गजहयाङ्घ्रिचयान्तरालं सद्यः प्रविश्य चतुरक्रममभ्यधावत् ॥ ३७ ॥
आच्छिद्य कङ्कणनियन्त्रितमङ्घ्रिसूत्रं यातः क्व वा शुक इतीह[3] कयाचिदूचे ।
जाने शुकं जहिहि खेदमपाशमास्ते ब्रह्मण्यसाविति बभाण सलीलमेकः ॥
यानेन सञ्चरणमूरुयुगेन शुण्डां कुम्भं मिथो मिलितयोः कुचयोर्युगेन ।
स्वैरं यतो विजयसे सुतनो करेणोरारो[4]हणं तदिदमौपयिकं भवत्याः ॥ ३९ ॥
कान्तोपगूढचरमाङ्गतया गजस्य स्कन्धे भवस्य पितुरङ्गतनौ निषण्णः ।
एतन्न पश्यति ममोपरि पातुकोऽश्वः पश्येज्जनः किमिव पञ्चशिलीमुखान्धः ॥
पश्चाद्गतस्य महतः पथि नाऽवकाशं लोकस्य दत्त पुरतो निबिडं प्रयात ।
दत्वा बलिस्स हरये त्रितयं पदानां यत्सौख्यमाप तदिदं विदितन्न किं वा ॥
आलिप्तमूधसि गवांकुलमध्वपङ्कैः किं वा कृथाः कृपण तर्णकवक्त्रबन्धम् ।
शाखां[5] प्रगृह्य पुरतस्त्यजसि प्रतूर्णं शाखामृगस्य क इवासि सचापलस्त्वम् ॥
जम्बालमग्नचरणे शकटे चिराय निष्पन्दमध्वनि निरीक्ष्य रु[6]षा महोक्षम् ।
आहन्ति कोपि कशया स पुनर्युगान्ते हन्ता हतो निजशिरः[7]प्रसृताग्रकायः ॥
आलापभङ्गिभिरतीव तरङ्गिताभिरज्ञातदूरगमनार्तिरनीकिनीयम् ।
नासीरसीम्नि चलिता नरपालमौलेराशामपूरयत पाशधराधिनाथाम् ॥ ४४ ॥
कल्लोलजालशि[8]शिरेण कवेरजायाः कूलाध्वनैव परिलङ्घ्य स कोङ्कदेशान् ।

[1] वक्र—अ ; मार्ग is also noted as a variant for चक्र in झ.
[2] प्यभिधाव्य—ख.
[3] तीव—अ, ग, घ, छ.
[4] रोपणं—छ.
[5] खा: प्र—क.
[6] रुजा—छ.
[7] प्रहृताग्र—छ.
[8] शिखरेण—अ, छ.

23 MAY 1942
MADRAS

# MANUSCRIPTS NOTES

## THE PRAMĀṆAMAÑJARĪ OF SARVADEVA

BY K. MADHAVA KRISHNA SARMA, M. O. L.

THOUGH some MSS. of the *Pramāṇamañjarī* of *Sarvadeva* are noticed by Aufrecht (C.C. I, 354b), the work still remains mostly unknown or inaccessible to students of *Vaiśeṣika.* There is mention of this neither in Vidyabhushana's *History of Indian Logic* nor in any history of Sanskrit literature written so far. Nothing is known at present about the place and personality of the author *Sarvadeva.* There have been some *Jaina Sarvadevas* (see the *Descriptive Catalogue of MSS. in the Jain Bhandars at Pattan*, Baroda, 1937, pp. 39, 324, 342 and 363). In the colophon of a MS. of the present work noticed by Peterson, Report III, p. 266, the author's name bears the suffix '*Sūri*' which is most common among the Jainas. Except these there are no facts to indicate that he was a *Jaina.* On the other hand, the invocation to *Gaṇapati* and *Śiva* at the beginning is against his having been of *Jaina* faith.

The present edition of the work is based on a single MS. deposited with the shelf-number 36. F. 33 in the Adyar Library. A second copy was inaccessible. The MS. in the Adyar Library is written in *Devanāgarī*, on paper. It is old and somewhat damaged. At the end it bears the date *Saṃvat* 1566, *i.e.* A.D. 1509 and mentions *Tri. Devaśarman* of *Bārejapura*, son of *Tri. Sābhā* as the copyist. Sarvadeva has therefore to be assigned to a date earlier than this. Aufrecht (op. cit. p. 354b) notices two commentaries on the work, one by *Advayāraṇyayogin* and the other by *Balabhadrasūri*. Only

one MS. of the former is noticed by Aufrecht. Another, an incomplete one beginning with the *Hetvābhāsas*, is also now available in the Adyar Library (No. 36. F. 35). This latter is at the end dated *Saṃvat* 1571, *i.e.* 1514 A.D. *Advayāraṇya* says that he wrote the commentary to please *Saṃvidāraṇya*. From the date of this MS. it is evident that he must be earlier than the 16th century A.D. and his author *Sarvadeva* still earlier, say, earlier than the 15th century. Of the latter commentary also Aufrecht notices only one MS. Another is noticed in the India Office Catalogue by Eggeling, No. 2075.

I had first contemplated to edit the commentaries also; but as I found it difficult to get the necessary MSS. under the present conditions, I had to drop the idea. My aim at present is only to give a readable text. I hope to edit the commentaries also when the conditions are better.

# प्रमाणमञ्जरी

## तार्किकचूडामणिभट्टसर्वदेवविरचिता

कासारतीरसरसीरुहमाददानः शुभ्रं भ्रमद्भ्रमरमध्यमिवेन्दुबिम्बम् ।
द्वैमातुरश्चिरतरं भवतः स पायात्संजातनिर्मलजलप्रतिबद्धनर्मा ॥ १ ॥
अभिवन्द्य विधोरर्धधारिणं च कणव्रतम् ।
प्रमाणमञ्जरी सर्वदेवेन क्रियते मया ॥ २ ॥

अभिधेयः पदार्थः । स भावाभावभेदाद्द्वेधा । पूर्वो विधिविषयः । स षोढा द्रव्यादिभेदेन । तत्र समवायिकारणं द्रव्यम् । तन्नवधा पृथिव्यादिभेदेन । तत्र गन्धवती पृथिवी । सा द्वेधा नित्यानित्यभेदेन । पूर्वा परमाणुरूपा । क्रियावान्नित्यः परमाणुरिति सामान्यलक्षणम् । परमाणुर्गन्धवान्पार्थिवपरमाणुः । उत्तरा द्वेधा नित्यसमवेतान्यथा चेति । पूर्वा द्व्यणुकम् । स्पर्शवन्नित्यसमवेतं द्व्यणुकमिति सामान्यलक्षणम् । गन्धवद्द्व्यणुकं पार्थिवं द्व्यणुकम् । पृथिवीत्वं



नित्यसमवेतवृत्ति घटपटजातित्वात्सत्तावदिति परमाणुद्व्यणुकयोः सिद्धिः । उत्तरा त्रेधा शरीरादिभेदेन । स्पर्शवदिन्द्रियसंयुक्तमेव भोगसाधनं शरीरमिति सामान्यलक्षणम् । गन्धवच्छरीरं पार्थिवं शरीरम् । स्वसमवेतसुखदुःखान्यतरसाक्षात्कारो भोगार्थः । तद्द्विधा योनिजायोनिजभेदेन । पूर्वमस्मदादीनां प्रत्यक्षसिद्धम् । उत्तरं च द्वेधा प्रकृष्टधर्मजमन्यथा चेति । पार्थिवाः परमाणवः पारंपर्येण कदाचित्प्रकृष्टधर्मजायोनिजशरीरारम्भकाः स्पर्शवत्परमाणुत्वादुदकपरमाणुवदित्ययोनिजशरीरसिद्धिः । दुःखभूयस्त्वादधर्मजमुत्तरं मशकादीनाम् । प्रत्यक्षसिद्धं तस्यायोनिजत्वम् । षड्गुणमप्रत्यक्षम् । साक्षात्कारप्रतीतिसाधनमिन्द्रियमिति सामान्यलक्षणम् । गन्धवदिन्द्रियं घ्राणम् । तत्र प्रमाणं पार्थिवाः परमाणवः पारंपर्येण कदाचिदिन्द्रियारम्भकाः स्पर्शवत्परमाणुत्वात्तेजःपरमाणुवत् । स्पर्शवान्शरीरेन्द्रियव्यतिरिक्तः कार्यजातो विषय इति सामान्यलक्षणम् । गन्धवान्विषयः पार्थिवो विषय इष्टकादिः प्रत्यक्षसिद्धः । सा चतुर्दशगुणवती । एवमुत्तरत्र सामान्यलक्षणानुवृत्तौ पदान्तरानुगमेन तत्तत्परमाण्वादीनां लक्षणानि भवन्ति ॥

स्नेहवदम्भः । नित्यमनित्यं च । पूर्वं परमाणुः । उत्तरं च द्वेधा नित्यसमवेतमन्यथा चेति । पूर्वं द्व्यणुकम् । अप्त्वं नित्यसमवेतवृत्ति सरित्समुद्रजातित्वात्सत्तावदिति परमाणुद्व्यणुकयोः सिद्धिः । उत्तरं शरीरादिभेदेन त्रिधा । शरीरे प्रमाणमाप्याः परमाणवः पारंपर्येण कदाचिच्छरीरारम्भकाः स्पर्शवत्परमाणुत्वात्पृथिवीपरमाणुवत् । तच्च शुक्लशोणितसन्निपातनिरपेक्षमाप्यकार्यत्वात्करकादिवत् । तत्प्रकृष्टादृष्टजमयोनिजशरीरत्वान्मशकादिशरीरवत् । सुखभूयस्त्वान्नाधर्मजम् । इन्द्रियं रसनम् । आप्याः परमाणवः पारंपर्येणेन्द्रियारम्भकाः स्पर्शवत्परमाणुत्वात्पृथिवीपरमाणुवदिति तत्र प्रमाणम् । उत्तरो विषयः सरिदादिः । रूपादिचतुर्दशगुणवत्त्वम् ॥

अगुरुत्वे सति रूपवत्तेजः । तन्नित्यानित्यभेदेन द्वेधा । आद्यं परमाणुः । उत्तरं द्वेधा नित्यानित्यसमवायात् । आद्यं द्व्यणुकम् । तेजस्त्वं नित्यसमवेतवृत्ति दीपसुवर्णजातित्वात्सत्तावदिति साधनात् । उत्तरं शरीरादिभेदेन त्रेधा । पूर्वत्र प्रमाणं तैजसाः परमाणवः पारंपर्येण कदाचिच्छरीरारम्भकाः स्पर्शवत्परमाणु-

त्वात्पृथिवीपरमाणुवत् । तदयोनिजमेव तेजःकार्यत्वाद्दीपवत् । नयनाख्येन्द्रिये तत्र प्रमाणमालोकात्यन्ताभावे जायमानरूपसाक्षात्कारस्तेजःकारको रूपसाक्षात्कारत्वात्सत्यालोके जायमानरूपसाक्षात्कारवत् । तद्गोलकस्थं नयनोन्मीलने सत्येवोपलब्धेः । आलोकाज्ञानं तम इत्याश्रयासिद्धिरिति चेन्न, विधिमुखेन स्वातन्त्र्येण कृष्णाकारेण बहीरूपतया प्रतीतेः । अत एव नालोकाभावः । आलोकाभावस्तम इति वदतो ऽपि मते आरोपितरूपप्रतीतेः सत्वान्नाश्रयासिद्धिः । तमो न भावरूपमसत्येवालोके चक्षुषा प्रतीयमानत्वादालोकाभाववदिति प्रमाणोपपत्तेः । कृष्णरूपं तमो द्रव्यमिति वदतो ऽपि मते रूपप्रतीतेः सत्वान्नाश्रयासिद्धिः । तदतिरिक्तो विषयो भौमादिः । रूपाद्येकादशगुणवत् ।

रूपासहचरितस्पर्शवान्वायुः । स नित्यानित्यभेदेन भिन्नः । पूर्वः परमाणुः । उत्तरो द्वेधा । नित्यसमवेतोऽन्यथा चेति । आद्यो द्व्यणुकम् । वायुत्वं नित्यसमवेतवृत्ति स्पर्शवद्गतद्रव्यत्वावान्तरजातित्वात्पृथिवीत्ववदिति परमाणुद्व्यणुकयोः सिद्धिः । उत्तरं शरीरादिभेदेन त्रेधा भिद्यते । वायुपरमाणवः पारंपर्येण कदाचिच्छरीरारम्भकाः स्पर्शवत्परमाणुत्वात्तेजःपरमाणुवदिति शरीरसिद्धिः । तदयोनिजं वायुकार्यत्वात्त्वगिन्द्रियवत् । वायवीयाः परमाणवः पारंपर्येणेन्द्रियारम्भकाः स्पर्शवत्परमाणुत्वात्तेजःपरमाणुवदिति त्वगिन्द्रियसिद्धिः । तदन्यो विषयः प्रतीयमानवाय्वादिः । त्वगिन्द्रियमरूपिद्रव्यग्राहकमरूपित्वे सति द्रव्यग्राहकेन्द्रियत्वान्मनोवदिति वायोः प्रत्यक्षत्वसिद्धिरिति चेन्न, मूर्तत्वे सति सर्वदास्पर्शवत्त्वस्योपाधित्वात् । विप्रतिपन्नो वायुरप्रत्यक्षो वायुत्वात्त्वगिन्द्रियवत । स्पर्शादिनवगुणवान् ॥

शब्दवदाकाशम् । तत्र प्रमाणं शब्दो ऽष्टद्रव्यातिरिक्तसमवेतः समवेतत्वे सति श्रोत्रग्राह्यत्वाच्छब्दवदिति । विप्रतिपन्नाः श्रूयमाणशब्दाश्रयाश्रयाः शब्दत्वाच्छ्रूयमाणशब्दवदित्येकत्वं तस्य सिद्धम् । आकाशं नित्यसमवेतं भावत्वात्समवायवदिति नित्यत्वं तस्य सिद्धम् । तदेवेन्द्रियं श्रोत्रं नाम शब्दोपलब्धिर्भूतेन्द्रियकरणिका रूपशब्दयोरन्यतरसाक्षात्कारत्वाद्रूपसाक्षात्कारवदिति पारिशेष्यात्सिद्धम् । परिशेषस्तु विप्रतिपन्नाः शरीरतदवयवा नयनादयश्च तद्ग्राहका न भवन्ति कार्यत्वाद्घटवदिति । न कालादयस्तद्ग्राहका अजसंयोगनिराकरणात् । शब्दादिषड्गुणकम् ।



विवक्षितपरत्वासमवाय्याश्रयत्वे सति सर्वगतः कालः । विप्रतिपन्नं मनो विवक्षितपरत्वासमवाय्याश्रयसंयुक्तं द्रव्यत्वादात्मवदिति तत्र प्रमाणम् । अनियतपरत्वासमवाय्याश्रयत्वे सति सर्वगता दिक् । विप्रतिपन्नं मनो ऽनियतपरत्वासमवाय्याश्रयसंयुक्तं द्रव्यत्वादात्मवदिति तत्र प्रमाणम् । मनसा संयुक्तं मनः सर्वदा विशेषगुणरहितद्रव्यद्वयसंयुक्तं द्रव्यत्वादात्मवदिति दिक्कालयोः प्रमाणम् । अत्र द्रव्यद्वितये कल्पितेऽन्यत्र तेनैव व्यवहारसिद्धावनन्तकल्पनायां प्रमाणाभावः । दिक्कालौ द्रव्यत्वावान्तरजातिरहितौ बुद्ध्यनाधारत्वे सति सर्वगतत्वादाकाशवदित्येकत्वं सिद्धम् । विप्रतिपन्नं सर्वं दिक्कालकार्यं संप्रतिपन्नवदिति तयोः सर्वकार्यनिमित्तत्वम् । आकाशकालदिशः सर्वगता मनोव्यतिरिक्तत्वे सति सर्वदास्पर्शवद्द्रव्यत्वादात्मवदिति सर्वगतत्वम् । संख्यादिपञ्चगुणवत्त्वं कालदिशोः ।

बुद्ध्याश्रय आत्मा । स द्वेधेशानीशभेदात् । पूर्वत्र प्रमाणमात्मत्वं नित्यविशेषगुणवद्वृत्त्यात्मजातित्वात्सत्तावत् । ईशज्ञानं नित्यमनन्तकार्यत्वात्कालवदिति तज्ज्ञानं नित्यम् । विप्रतिपन्नं सर्वं कार्यं विवक्षितज्ञानजं कार्यत्वात्संप्रतिपन्नवदित्यनन्तहेतुत्वं सिद्धम् । तज्ज्ञानमाश्रयव्यापि नित्यगुणत्वात्पाथोऽणुरूपवदित्याश्रयव्यापित्वं ज्ञानस्य सिद्धम् । अत एव तदिच्छाप्रयत्नावाश्रयव्यापिनौ । उत्तरत्र प्रमाणं भोगः क्वचिदाश्रितो गुणत्वाद्रूपवत् । न कार्याणि तद्वन्ति कार्यत्वाद्घटवत् । न श्रोत्रादि तद्वत्करणत्वाद्दण्डवत् । भोगो गुणो ऽनित्यत्वे सत्यचाक्षुषप्रत्यक्षत्वाद्गन्धवदिति हेतुसिद्धिः । अस्मदाद्यात्मा द्रव्यत्वावान्तरजातिमांश्चतुर्दशगुणवत्त्वात्पाथोवत् । आत्मशब्दो नैकवाचक आत्मवाचकत्वात् 'स'-शब्दवदिति नानात्वम् । मच्छरीरान्तराणि मूर्तानि मदात्मसंयुञ्जि मूर्तत्वान्मच्छरीरवदिति व्यापकत्वं तस्य । ईशो ऽपि सर्वगत आत्मत्वाद्देहिवत् । स नित्यः सर्वगतत्वात्कालवत् । स बुद्ध्यादिचतुर्दशगुणवान् ॥

मूर्तत्वे सति सर्वदा स्पर्शशून्यं मनः । सुखज्ञानमिन्द्रियजमनित्यज्ञानत्वाद्रूपज्ञानवदिति तत्र प्रमाणम् । मनो ऽण्वात्मसंयोगित्वे सति निरवयवत्वात्परमाणुवदिति मूर्तत्वं सिद्धम् । अजसंयोगनिराकरणान्न सर्वगतेन व्यभिचारः । संख्याद्यष्टगुणकम् । इति द्रव्यपदार्थः ॥

कर्मान्यत्वे सति सामान्यैकाश्रयो गुणः । स रूपादिभेदेन चतुर्विंशतिधा । नयनैकग्राह्यजातिमद्रूपम् ॥ रसनैकग्राह्यजातिमान्रसः ॥ घ्राणैकग्राह्यजातिमान्गन्धः ॥ स्पर्शनैकग्राह्यजातिमान्स्पर्शः ॥ एते यावद्द्रव्यभाव्ययावद्द्रव्यभाविभेदाद्द्वेधा । पार्थिवपरमाणोरन्यत्र यावद्द्रव्यभाविनः प्रत्यक्षद्रव्ये प्रत्यक्षतस्तथा सिद्धाः । द्व्यणुकादिषु यावद्द्रव्यभाविनः कार्यरूपादित्वात्पटरूपादिवत् । सलिलादिपरमाणुरूपादयो यावद्द्रव्यभाविनः सलिलादिरूपादित्वात्संप्रतिपन्नवत् । पार्थिवपरमाणौ च यावद्द्रव्यभाविनः । तत्र प्रमाणं पार्थिवपरमाणौ सति रूपादयो निवर्तन्ते ऽनित्यत्वात्संप्रतिपन्नवदिति । पार्थिवं द्व्यणुकमनित्यविशेषगुणवत्समवेतं पार्थिवकार्यत्वात्पटवदिति नासिद्धसाधनम् । हुतवहालीढे महीखण्डे पूर्वरूपविलक्षणरूपादिदर्शनात्तत्रैवंकल्पने नातिप्रसङ्गः । तत्र पार्थिवपरमाणुरग्निसंयोगासमवायिकारणविशेषगुणाश्रयो ऽनित्यविशेषगुणवत्त्वे सति नित्यभूतत्वादाकाशवदिति पाकजत्वं तेषां सिद्धम् ॥ गुणत्वावान्तरजात्या द्व्यणुकपरिमाणासमवायिकारणसजातीया संख्या । सा द्वेधा यावद्द्रव्यभाव्ययावद्द्रव्यभाविभेदात् । पूर्वत्र प्रमाणं परिमाणत्वं संयोगातिरिक्तानेकद्रव्यासमवायिकारणवृत्ति परिमाणजातित्वात्सत्तावत् । परमाणुपरिमाणमसमवायिकारणं न भवति नित्यपरिमाणत्वादाकाशपरिमाणवदिति परपक्षव्युदासः । द्वित्वमयावद्द्रव्यभाव्यनेकगुणत्वात्संयोगवत् । द्वित्वसामान्यं बुद्धिजवृत्ति द्वित्वजातित्वात्सत्तावदिति बुद्धिजत्वम् । उत्तरत्र प्रमाणं संख्यात्वं यावद्द्रव्यभाविवृत्ति द्वित्वत्रित्वजातित्वात्सत्तावत् । तदेवैकत्वम् । संख्या गुणः सामान्यैकाश्रयत्वे सत्यकर्मत्वाद्रूपवदिति परपक्षव्युदासः । एवंभूतायाः संख्यायाः पदार्थान्तरत्वे स्वीकृते रूपमपि पदार्थान्तरं भवेत् ॥ गुणत्वावान्तरजात्या पृथक्त्वान्याप्रत्यक्षात्मगतयावद्द्रव्यभाविसजातीयं परिमाणम् । आत्मा पृथक्त्वान्याप्रत्यक्षयावद्द्रव्यभाविगुणवान्सर्वगतत्वाद्दिग्वत् । सर्वं द्रव्यं परिमाणाधिकरणं द्रव्यत्वादात्मवत् । तच्चतुर्विधमणुमहद्दीर्घह्रस्वभेदात् । द्व्यणुके ऽणुत्वमङ्गीकृत्य ह्रस्वत्वं निराकुर्वाणं प्रतीदमनुमानम् । द्व्यणुकमणुपरिमाणातिरिक्तपरिमाणाधिकरणं कार्यद्रव्यत्वाद्घटवत् । दीर्घत्वमनङ्गीकुर्वाणं प्रतीदमनुमानम् । घटो महत्त्वव्यतिरिक्तपरिमाणाधिकरणं कार्यद्रव्यत्वाद्द्व्यणुकवत् ॥ संख्यातिरिक्तदिक्कालगतात्यन्तसजातीयं पृथक्त्वम् । तद्द्वेधा यावद्द्रव्यभाव्य-



यावद्द्रव्यभाविभेदात् । कालः संख्यातिरिक्तदिग्गतगुणवान्द्रव्यात्वाद्घटवदित्ययावद्द्रव्यभाविपृथक्त्वसिद्धिः । पृथक्त्वसामान्यमस्मदादिबुद्धिजवृत्ति पृथक्त्वजातित्वात्सत्तावदिति बुद्धिजत्वं सिद्धम् । तत्सामान्यं कारणगुणपूर्ववृत्ति पृथक्त्वजातित्वात्सत्तावत् । तत्सामान्यं यावद्द्रव्यभाविवृत्ति द्वित्रिपृथक्त्वजातित्वात्सत्तावदित्येकपृथक्त्वसिद्धिः ॥ गुणत्वावान्तरजात्या द्रव्यासमवायिकारणसजातीयः संयोगः । तत्र प्रमाणं संयोगपदं सद्वाच्यं वाचकत्वात्स्वलक्षणपदवदिति परिशेषात । स त्रिविधो ऽन्यतरकर्मजोभयकर्मजसंयोगजभेदात् । तत्रोभयं प्रसिद्धम् । तृतीये प्रमाणं संयोगत्वं संयोगासमवायिकारणवृत्ति संयोगजातित्वात्सत्तावत् । विप्रतिपन्ना आत्मादय आकाशेन न संयुज्यन्ते सर्वगतत्वादाकाशवदित्यजसंयोगनिरासः । अयावद्द्रव्यभावित्वं प्रसिद्धं प्रत्यक्षसिद्धम ॥ संयोगविरोधी गुणो विभागः । तत्र प्रमाणमाकाशः संयोगातिरिक्तकर्मजगुणाधारो द्रव्यत्वाच्छरीरवत् । विप्रतिपन्नं सर्वं द्रव्यं विभागवद्द्रव्यत्वादाकाशवत् । स द्विविधः कर्मजविभागजभेदात । आद्यो द्वेधान्यतरकर्मजोभयकर्मजभेदात् । तत्र प्रमाणं विभागत्वमेकानेककर्मासमवायिकारणवृत्ति विभागजातित्वात्सत्तावत् । विभागत्वमक्रियाजवृत्ति विभागजातित्वात्सत्तावत् । विभागजविभागसिद्धिस्तु परिशेषात् । विभागत्वं विभागासमवायिकारणवृत्ति विभागजातित्वात्सत्तावदिति च मानम् ॥ परव्यवहारे यद्विशेषणतया निमित्तं तत्परत्वम् । अपरव्यवहारे यद्विशेषणतया निमित्तं तदपरत्वम् । तत्र प्रमाणं घटो ऽस्मदादिबुद्धिजैकद्रव्यजातीयवाननेकविशेषगुणसमवायिकारणत्वादात्मवत् । विप्रतिपन्नं परत्वादि संयोगासमवायिकारणकमस्मदादिबुद्धिजैकद्रव्यत्वात्सुखवदिति पारिशेष्याद्दिक्कालपिण्डसंयोगासमवायिकारणत्वं सिद्धमनयोः ॥ अथ विग्रहो बुद्धिः । सा द्वेधा नित्यानित्यभेदेन । पूर्वा भगवतो महेश्वरस्य । सा परीक्षितात्मप्रकरणे । उत्तराप्यनीशानां मानसप्रत्यक्षसिद्धा । सा द्वेधा विद्याविद्याभेदात् । बाधिता धीरविद्या । सा द्वेधा निश्चयानिश्चयभेदात् । तत्र पूर्वो विपर्ययः । तत्र प्रमाणं विवादपदं रजतधीःपदं रजतेच्छुप्रवृत्तिविषयत्वात्सम्यग्रजतवत् । उत्तरः संशयः । इदमेवमाहोस्विन्नैवमिति व्यवहारो व्यवहार्यज्ञानपूर्वको व्यवहारत्वात्संप्रतिपन्नवदिति तत्र प्रमाणम् । अनध्यवसायस्येहान्तर्भावः । स्वप्नस्य विपर्यये । अबाधिता धीर्विद्या । सा द्वेधा प्रमितिरन्यथा चेति ।

सम्यगनुभूतिः प्रमितिः । सा द्वेधा प्रत्यक्षेतरा चेति । तत्रापरोक्षा सा प्रत्यक्षा परोक्षा सेतरा चेति । पुनर्द्वेधा प्रकृष्टधर्मजेतरभेदात् । पूर्वं योगिप्रत्यक्षम् । तत्र प्रमाणं धर्मः कस्यचित्प्रत्यक्षः प्रमेयत्वाद्वांसीवत् । यस्य स प्रत्यक्षः स योगी । उत्तरास्मदादीनां प्रत्यक्षम् । सापि प्रकारान्तरेण द्वेधा सविकल्पकनिर्विकल्पकभेदात् । विशिष्टविषयं सविकल्पकम् । तत्प्रमाणं स्मृतिव्यतिरिक्तत्वे सत्यबाधितबुद्धित्वान्निर्विकल्पकवत् । वस्तुस्वरूपमात्रावभासकं निर्विकल्पकम् । ज्ञानानां सविकल्पकत्वाद्दृष्टान्तासिद्धिरिति चेन्न, प्रमाणोपपत्तेः । सर्वे विकल्पा ज्ञानव्यावृत्तजातिमन्तो जातिमत्त्वात्पटवत् । उत्तरा लैङ्गिकी । लिङ्गं पुनः साध्याव्यभिचारित्वे सति पक्षधर्मवत् । तद्द्वेधा भिद्यते ऽन्वयव्यतिरेकभेदात् । यस्य साध्येन साहचर्यनियमस्तदन्वयि । तद्द्वेधा सति विपक्षेऽसति च । पूर्वमन्वयव्यतिरेकि । तद्यथा निनादो ऽनित्यः कृतकत्वात् । यदेवं तदेवं यथा रथः । तथा चेदम् । तस्मात्तथा । यदनित्यं न भवति तत्कृतकमपि न भवति । यथाकाश इति । न चेदं न तथा । तस्मान्न च न तथेति । उत्तरं केवलान्वयि । यथा स्थितिस्थापकः प्रत्यक्षः प्रमेयत्वात् । यदेवं तदेवम् । यथा पृथिवी । तथा च प्रकृतम् । तस्मात्तथा । असति पक्षे यस्य साध्याभावे ऽभावनियमस्तद्व्यतिरेकि । यथा सर्वं कार्यं सर्ववित्कर्तृपूर्वकं कार्यत्वात् । न यदेवं न तदेवम् । यथा परमाणुः । न च तथेदम् । तस्मान्न तथेति । लिङ्गलक्षणरहिता लिङ्गवदभिभासमानविषया लिङ्गाभासाः । ते चासिद्धविरुद्धानैकान्तिकासाधारणबाधितविषयसत्प्रतिपक्षभेदाः षटप्रकाराः । तत्र पक्षधर्मतया ज्ञातो ऽसिद्धो यथा शब्दो ऽनित्यश्चाक्षुषत्वादिति । पक्षविपक्षयोरेव वर्तमानो विरुद्धो यथा नित्यः शब्दः श्रोत्रग्राह्यत्वादिति । पक्षत्रयवृत्तिरनैकान्तिको यथा शब्दो ऽनित्यः प्रमेयत्वादिति । सपक्षविपक्षव्यावृत्तः पक्षे वर्तमानो ऽनध्यवसितो यथा पृथिवी नित्या गन्धवत्त्वादिति । प्रमाणविरोधो बाधितविषयो यथानुष्णोऽग्निः प्रमेयत्वादिति । समबलविरुद्धहेतुद्वयसमावेशः सत्प्रतिपक्षो यथा शब्दो नित्यः श्रोत्रग्राह्यत्वादित्युक्ते न नित्यः सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वादिति षोढा व्यूढः । शेषं भाष्ये । वाक्याद्वाक्यार्थधीरसन्निहितविषये । असतो गृहे जीवतो बहिर्भावबुद्धिरनुमितिः प्रत्यक्षेतरप्रमितित्वात्संप्रतिपन्नवत् । सन्निहितविषयाभावप्रमा प्रत्यक्षजानुमित्यन्य-



प्रमितित्वात्संप्रतिपन्नवदित्यन्तर्भावः । शेषं भाष्ये । उत्तरा स्मृतिः । सा प्रमा स्वविषये प्रत्यक्षानुमानान्यत्वाद्विपर्ययवदिति सिद्धा विद्या ॥ यस्मिन्ननुभूयमाने तत्साधनेष्वभिष्वङ्गस्तत्सुखम् । यस्मिन्ननुभूयमाने तत्साधने द्वेषस्तद्दुःखम् । ते बुद्धिजे तदन्वयव्यतिरेकानुविधायित्वात् । यदेवं तदेवम् । यथा घटः । तथा च प्रकृतम् । तस्मात्तथा ॥ प्रार्थनेच्छा । सा द्विधा नित्यानित्यभेदेन । महेश्वरस्य नित्येशविशेषगुणत्वात्तद्बुद्धिवद्विप्रतिपन्नानि कार्याणीशेच्छाजन्यानि जन्यत्वात्संप्रतिपन्नवदिति सर्वोत्पत्तिमन्निमित्तत्वमीशेच्छायाः । अनित्यानीशानामनीशविशेषगुणत्वात्तद्बुद्धिवत् ॥ रोषो द्वेषः । सो ऽनित्यो ऽनीशविशेषगुणत्वात्तद्बुद्धिवत् । बुद्धिजत्वं तदन्वयव्यतिरेकानुविधायित्वादिति ॥ गुणत्वावान्तरजात्या बुद्धीच्छान्येश्वरविशेषगुणगतसामान्याधारः प्रयत्नः । सो ऽस्मदादीनां प्रत्यक्षः । ईशस्य तु पुरुषत्वात्सिद्धः । स नित्यानित्यभेदेन द्वेधा । नित्यः सर्वज्ञस्य तद्विशेषगुणत्वात्तद्बुद्धिवत् । अनित्यो द्वेधेच्छाद्वेषान्यतरपूर्वको जीवनपूर्वकश्चेति । पूर्वो मानसप्रत्यक्षसिद्धः । उत्तरो ऽनुमानसिद्धः । सुप्तस्य प्राणक्रियास्मदादिप्रयत्नजा प्राणक्रियात्वाज्जाग्रत्प्राणक्रियावदिति ॥ आद्यपतनासमवायिकारणात्यन्तसजातीयं गुरुत्वम् । तत्र प्रमाणं प्रथमपतनमसमवायिकारणपूर्वकं क्रियात्वात्संप्रतिपन्नवदिति । परिशेषाद्गुरुत्वसिद्धिः । द्रुतं सर्पिर्यावद्द्रव्यभाव्यतीन्द्रियवच्चतुर्दशगुणवत्त्वाद्बहुविशेषगुणवत्त्वादात्मवदिति मानद्वयम् । तत्रान्यस्यासंभवात् । घटगुरुत्वं यावद्द्रव्यभाव्यक्रियाजन्यत्वे सत्यबुद्धिजन्यत्वे सति घटसमवेतत्वाद्घटसमवेतरूपवत् । एवं सर्वत्र घटगुरुत्वदृष्टान्तेन यावद्द्रव्यभावित्वम् । अत एव कारणगुणपूर्वकत्वं साधनीयं घटदृष्टान्तेन । घटगुरुत्वमप्रत्यक्षं गुरुत्वात्परमाणुगुरुत्ववत् ॥ आद्यस्यन्दनासमवायिकारणात्यन्तसजातीयं द्रवत्वम् । तद्द्वेधा नित्यानित्यभेदेन । सलिलपरमाणुषु नित्यम् । तत्र प्रमाणं सलिलद्व्यणुकं यावद्द्रव्यभावि द्रवत्ववत्समवायिकार्यकार्यत्वे सति सलिलत्वात्संप्रतिपन्नवत् । पार्थिवतैजसपरमाणुषु द्रवत्वमनित्यमसलिलद्रवत्वात्संप्रतिपन्नवदितीतरसिद्धिः । पार्थिवपरमाणवो रूपादिचतुष्टयातिरिक्ताग्निसंयोगजैकद्रव्यगुणयोगिनो ऽनित्यविशेषगुणवत्त्वे सति नित्यभूतत्वादाकाशवदिति परिशेषादग्निसंयोगजत्वं द्रवत्वस्य सिद्धम् । तेजःपरमाणुषु द्रवत्वमग्निसंयोगजमुदकत्वानधिकरणत्वे सति परमाणुद्रवत्वात्पार्थिवपरमाणुद्रवत्व-

१०६६. ऋजुविमर्शिनी
१०६७. ऋक्षाद्यं
१०६८. एकवीराकल्पं
१०६९. एकवीरातन्त्रं
१०७०. एकाक्षरीकल्पं
१०७१. ओड्डामरेश्वरतन्त्रं
१०७२. कलापदं



१०७३. कलावादतन्त्रं
१०७४. कलासारतन्त्रं
१०७५. कंकाळभैरवतन्त्रं
१०७६. कपालभैरवतन्त्रं
१०७७. कल्पसूत्रं
१०७८. कल्याणवृष्टिस्तवं
१०७९. कक्ष्यास्तोत्रं
१०८०. कामिकतन्त्रं
१०८१. कामकलाविलासं
१०८२. कामकलासूत्रं
१०८३. कापिलसूत्रं
१०८४. कालसारं
१०८५. काळिकाखण्डं
१०८६. काळिकामतं
१०८७. काळीकल्पं
१०८८. काळीतन्त्रं
१०८९. किरणावलिः
१०९०. कुब्जिकामततन्त्रं
१०९१. कुमारकौशलं
१०९२. कुमारतन्त्रं
१०९३. कुण्डलप्रकाशं
१०९४. कुमारीकल्पं
१०९५. कुमारीतन्त्रं
१०९६. कुरूपिकामतं
१०९७. कुळकमलं
१०९८. कुळचिन्तामणितन्त्रं
१०९९. कुळचूडामणिः
११००. कुळपूजामणिः
११०१. कुळप्रकाशं
११०२. कुळमूलावतारं
११०३. कुळसद्भावं
११०४. कुळसर्वस्वं
११०५. कुळसारतन्त्रं
११०६. कुळसंभारं
११०७. कुळार्णवं
११०८. कुळोड्डीशतन्त्रं
११०९. कूर्म्मयामळतन्त्रं
१११०. क्रमकेळी
११११. क्रमवासना
१११२. क्रमसद्भावं
१११३. क्रमसिद्धिः
१११४. क्रमसंहिता
१११५. क्रमसूत्रं
१११६. क्रमोदयं
१११७. कोमळवल्लीस्तवं
१११८. कौमारीतन्त्रं
१११९. कौळगीता
११२०. कौतूहलचिन्तामणिः
११२१. गणेशस्तवं
११२२. गन्धर्वतन्त्रं
११२३. गान्धर्वाख्यम्
११२४. गारुडं
११२५. गीतानिष्यन्दं
११२६. गीतासारं
११२७. गुप्तवती १
११२८. गुप्तवती २
११२९. गुप्तार्णवं
११३०. गुरुस्तोत्रं
११३१. गुह्यतन्त्रं
११३२. गोरक्षशतकं

११३३. गौतमीयं
११३४. गौरीदशकं
११३५. चर्चास्तवं
११३६. चतुर्वेदशिखा
११३७. चतुश्शती
११३८. चन्द्रज्ञानतन्त्रं
११३९. चरणस्तोत्रं
११४०. चाणक्यतन्त्रं
११४१. चामुण्डातन्त्रं
११४२. चिन्तामणिस्तोत्रं
११४३. चिद्गगनचन्द्रिका
११४४. चिदम्बररहस्यं
११४५. चिद्वल्ली
११४६. चिद्विलासं
११४७. चिदानन्दपद्धतिः
११४८. चिदानन्दवासना
११४९. जयपद्धतिः
११५०. जयार्णवं
११५१. जालशंबरं
११५२. जालोत्तरं
११५३. ज्ञानवासिष्ठं
११५४. ज्ञानार्णवं
११५५. ज्ञानकौमुदी
११५६. ज्ञानेन्दुकौमुदी
११५७. डामरं
११५८. तन्त्रचिन्तामणिः
११५९. तन्त्रचूडामणिः
११६०. तन्त्रभेदतन्त्रं
११६१. तन्त्रराजं
११६२. तन्त्रवटधानिका
११६३. तन्त्रवैशेषिकं
११६४. तन्त्रसद्भावं
११६५. तन्त्रालोकं
११६६. तन्त्रार्णवतरंगिणी
११६७. तन्त्रार्णवं
११६८. तन्त्रोत्तमं
११६९. तत्वचिन्तामणिः
११७०. तत्वप्रकाशिका
११७१. तत्वबोधिनी
११७२. तत्वशंबरकतन्त्रं
११७३. तत्वसंहिता
११७४. तत्वसारं
११७५. तत्वानन्दतरंगिणी
११७६. तत्वार्णवं
११७७. तारार्णवं
११७८. तारातन्त्रं
११७९. ताराप्रदीपं
११८०. तारावली
११८१. त्रिकहृदयं
११८२. त्रिपुरारत्नसारं
११८३. त्रिपुरार्णवं
११८४. त्रिभुवनालंकारसञ्जीविनी
११८५. त्रिमुण्डं
११८६. त्रिशती
११८७. त्रिशतीरत्नं
११८८. त्रिशिरोभैरवीयं
११८९. त्रंशिकाशास्त्रं
११९०. त्रोतलतन्त्रं
११९१. त्रोतलोत्तरतन्त्रं
११९२. दक्षिणामूर्त्यष्टकं



११९३. त्रिपुरारत्नसागरं
११९४. त्रिपुरासिद्धान्तः
११९५. दक्षिणामूर्त्तिसंहिता
११९६. दक्षिणाम्नायतन्त्रं
११९७. दूर्वासामहिम्नं
११९८. दिव्यागमं
११९९. दृग्दृश्यविवेकं
१२००. देविकाक्रमं
१२०१. देवीपञ्चरत्नं
१२०२. देवीभुजंगं
१२०३. देवीमततन्त्रं
१२०४. देवीमहिम्नं
१२०५. देवीयामळतन्त्रं
१२०६. देवीस्तवराजं
१२०७. देवीस्तोत्रं
१२०८. देवीनवरत्नमालिका
१२०९. धर्म्मांबिकास्तवं
१२१०. नन्दिकेश्वरसंहिता
१२११. नरेश्वरविवेकं
१२१२. नवरात्रप्रदीपं
१२१३. नवाक्षरीस्तोत्रं
१२१४. नागानन्दसूत्रं
१२१५. नागार्जुनसिद्धतन्त्रं
१२१६. नामपट्टं
१२१७. निजतत्वामृतरसं
१२१८. नित्याषोडशिकार्णवं
१२१९. नित्यातन्त्रं
१२२०. नित्याहृदयं
१२२१. निधिग्रन्थं
१२२२. निरुत्तराम्नायतन्त्रं
१२२३. निशाकुळं
१२२४. निशाटनं
१२२५. नीलतन्त्रं
१२२६. नृसिंहप्रसादः
१२२७. नैशाख्यं
१२२८. पञ्चस्तवं
१२२९. पञ्चदशीमातृकापुष्पमालास्तवं ।
१२३०. पञ्चमीस्तवराजं
१२३१. पञ्चमीयामळतन्त्रं
१२३२. पञ्चकोशविमर्शिनी
१२३३. पञ्चशती
१२३४. पञ्चामृततन्त्रं
१२३५. पदसंगतिः
१२३६. पर्यन्तपञ्चाशिका
१२३७. परमार्त्थसारसंग्रहं
१२३८. परशंभुमहिम्नं
१२३९. परशिवस्तवं
१२४०. परानन्दतन्त्रं
१२४१. परात्रिंशिका
१२४२. परापञ्चाशिका
१२४३. परावासना
१२४४. परासूक्तं
१२४५. परास्तोत्रं
१२४६. पश्चिमाम्नायतन्त्रं
१२४७. पादुकोदयं
१२४८. पादसूत्रं
१२४९. पाशकल्पं
१२५०. पुस्तकेन्द्रं
१२५१. पूजारहस्यं
१२५२. पूर्णोदयं

१२५३. पूर्वाम्नायतन्त्रं
१२५४. प्रचण्डभैरवीतन्त्रं
१२५५. प्रज्ञानकौमुदी ।
१२५६. प्रणवार्थदीपिका
१२५७. प्रत्यभिज्ञाविमर्शिनी
१२५८. प्रत्यभिज्ञावृत्तिः
१२५९. प्रत्यभिज्ञासूत्रं
१२६०. प्रत्यभिज्ञाहृदयं
१२६१. प्रपञ्चसारं
१२६२. प्रबोधपञ्चाशिका
१२६३. प्रभाकौळं
१२६४. प्रयोगरत्नमाला
१२६५. फीट्कारिणी
१२६६. फेट्कारीतन्त्रं
१२६७. बहुरूपाष्टकं
१२६८. बारुडं
१२६९. बिंबसूत्रं
१२७०. बृहत्तन्त्रकौमुदी
१२७१. बृह्मगीता
१२७२. ब्रह्मयामळतन्त्रं
१२७३. बृहत्श्रीक्रमतन्त्रं
१२७४. बृहत्श्रीक्रमसंहिता
१२७५. बृहन्मत्स्यसूक्तं
१२७६. बृहद्विक्रमसंहिता
१२७७. ब्राह्मीतन्त्रं
१२७८. बोधचित्तविवरणं
१२७९. बोधसारः ।
१२८०. भक्तितन्त्रं
१२८१. भगवद्गीता
१२८२. भट्टनारायणीयं
१२८३. भावचूडामणिः
१२८४. भुवनेश्वरीकक्षपुटं ४
१. मन्त्रकक्षपुटं
२. यन्त्रकक्षपुटं
३. मूलिकाकक्षपुटं
४. गणितकक्षपुटं
१२८५. भूततन्त्रं
१२८६. भूतिराजीयं
१२८७. भूतोड्डामरतन्त्रं
१२८८. भूबलं
१२८९. भैरवतन्त्रं
१२९०. भैरवयामळतन्त्रं
१२९१. मतदेवं
१२९२. मतोत्तरतन्त्रं
१२९३. मन्त्रमहोदधिः
१२९४. मन्त्रचूडामणिः
१२९५. मन्त्रव्याकरणं
१२९६. मन्त्रभेदं
१२९७. मन्त्रवैतरणी
१२९८. मन्थानभैरवीयं
१२९९. मत्स्यसूक्तं
१३००. मत्स्यसूक्ततन्त्रं
१३०१. मनोरमा
१३०२. मनोनुशासनस्तोत्रं
१३०३. महाकाळीतन्त्रं
१३०४. महानयप्रकाशं
१३०५. महानयपद्धतिः
१३०६. महानयसंगतिः
१३०७. महापिचुमतं
१३०८. महाभैरवतन्त्रं



१३०९. महामायाशंबरतन्त्रं
१३१०. महावनमालीयं
१३११. महार्थमञ्जरी
१३१२. महार्थोदयं
१३१३. महादेवतन्त्रं
१३१४. महालक्ष्मीमतं
१३१५. महालक्ष्मीरत्नकोशं
१३१६. महाशैवतन्त्रं
१३१७. महासम्मोहनतन्त्रं
१३१८. महिषासुरमर्दिनीस्तोत्रं
१३१९. महोग्रताराकल्पं
१३२०. महोच्छुष्मं
१३२१. मार्त्ताण्डभैरवतन्त्रं
१३२२. मातंगीस्तोत्रं
१३२३. मातृकाविवेकं
१३२४. मातृकाचक्रविवेकं
१३२५. मातृकाचक्रविवेकवृत्तिः
१३२६. मातृकार्णवं
१३२७. मातृकापुष्पमालास्तवं
१३२८. मालिनीतन्त्रं
१३२९. मालिनीविजयं
१३३०. माहेश्वरतन्त्रं
१३३१. माहेन्द्रीतन्त्रं
१३३२. मीनाक्ष्यष्टकं
१३३३. मुकुन्दकेलीपरिमळगुहा
१३३४. मुण्डमालातन्त्रं
१३३५. मूकपञ्चशती
१३३६. मृगेन्द्रसंहिता
१३३७. मेरुतन्त्रं
१३३८. मैलापुरतन्त्रं
१३३९. मोदिनीशतन्त्रं
१३४०. मोहिनीशं
१३४१. मोक्षोपायं
१३४२. यन्त्रराजं
१३४३. यामळाष्टकं
१३४४. योगदीपिका
१३४५. योगवासिष्ठं
१३४६. योगसारं
१३४७. योगार्णवं
१३४८. योगिनीतन्त्रं
१३४९. योगिनीजालशंबरतन्त्रं
१३५०. योगिनीभैरवतन्त्रं
१३५१. योगपातञ्जलसूत्रं
१३५२. योगपातञ्जलसूत्रवृत्तिः
१३५३. योगसूत्रभाष्यं
१३५४. योगसूत्रवाचस्पत्यं
१३५५. योगदीपिका
१३५६. योगिनीहृदयं
१३५७. रत्नदेवं
१३५८. रत्नमाला
१३५९. रत्नत्रयपरीक्षा
१३६०. रसकौमुदी
१३६१. रसरत्नाकरं
१३६२. रससारसंग्रहं
१३६३. रसान्वयं
१३६४. रहस्यागमं
१३६५. राजराजभट्टारकीयं
१३६६. राजराजेश्वरीस्तवराजं
१३६७. राजराजेश्वरीस्तवं
१३६८. राजभैरवसूत्रं

१३६९. राधातन्त्रं
१३७०. रुद्रयामळतन्त्रं
१३७१. रूपभेदतन्त्रं
१३७२. रूपिकामतं
१३७३. लघुस्तवं
१३७४. लघुब्रह्मणी
१३७५. ललितास्तवरत्नं
१३७६. ललितासहस्रनामभाष्यं
१३७७. ललितास्वच्छन्दं
१३७८. ललितोपाख्यानं
१३७९. लक्ष्मीतन्त्रं
१३८०. लक्ष्मीपीठिका
१३८१. लिंगागमं
१३८२. वटुकभैरवतन्त्रं
१३८३. वरिवस्याप्रकाशः
१३८४. वरिवस्यारहस्यं
१३८५. वसिष्ठकल्पं
१३८६. वसुबोधकं
१३८७. वामजुष्टतन्त्रं
१३८८. वामकेश्वरतन्त्रं
१३८९. वाक्यवृत्तिः
१३९०. वातुळतन्त्रं
१३९१. वातुळोत्तरतन्त्रं
१३९२. वाराहीतन्त्रं
१३९३. वाराहीसंहिता
१३९४. व्यासगीता
१३९५. वासुकितन्त्रं
१३९६. विकुण्ठेश्वरतन्त्रं
१३९७. विजयं
१३९८. विजयाकल्पं
१३९९. विजृंभितसूत्रं
१४००. विजृंभितसूत्रभाष्यं
१४०१. विमलामलतन्त्रं
१४०२. विमलार्थतन्त्रं
१४०३. विरक्तिरत्नावलिः
१४०४. विशुद्धेश्वरं
१४०५. विशुद्धेश्वरतन्त्रं
१४०६. विज्ञानभैरवी
१४०७. विरूपाक्षपञ्चाशिका
१४०८. विष्णुकृतशिवस्तुति
१४०९. विष्णुयामळतन्त्रं
१४१०. विज्ञानभट्टारकीयं
१४११. विज्ञानोद्योतं
१४१२. विनायकतन्त्रं ।
१४१३. विश्वकर्म्मशास्त्रं ।
१४१४. विश्वामित्रकल्पं
१४१५. विषयपञ्चाशिका
१४१६. वीणातन्त्रं
१४१७. वीरतन्त्रं
१४१८. वीरकल्पं
१४१९. वीरावली
१४२०. व्रतखण्डं
१४२१. वेदपादस्तवं
१४२२. वैशंपायनसंहिता
१४२३. वैष्णवीतन्त्रं
१४२४. शक्तिभैरवतन्त्रं
१४२५. शक्तिरहस्यं
१४२६. शक्तिसूत्रं
१४२७. शचिमतं
१४२८. शबरचिन्तामणिः



१४२९. शशिमतं
१४३०. शल्यतन्त्रं
१४३१. शान्तिस्तवं
१४३२. शाण्डिल्यसूत्रं
१४३३. शाबरतन्त्रं
१४३४. शारदाटीका
१४३५. शारदातिलकं
१४३६. शांभवदीपिका
१४३७. शांभवानन्दकल्पलता
१४३८. श्यामळादण्डकं
१४३९. शिवगीता
१४४०. शिवदृष्टिः
१४४१. शिवदूतीतन्त्रं
१४४२. शिवमीडेस्तवरत्नं
१४४३. शिवशक्तिसंगमतन्त्रं
१४४४. शिवयोगदीपिका
१४४५. शिवयोगसारं
१४४:. शिवज्ञानबोधं
१४४७. शिवतत्वविवेकं
१४४८. शिवमहिम्नं
१४४९. शिवभुजंगं
१४५०. शिवपादादिकेशान्तस्तुतिः
१४५१. शिवकेशादिपादपरागान्त-
स्तुतिः
१४५२. शिवानन्दस्वामीयं
१४५३. शिवसूत्रं
१४५४. शिवसूत्रवृत्तिः
१४५५. शुभागमपञ्चकं नाम । वसिष्ठ-
संहिता ।१। सनकसंहिता ।२।
सनन्दनसंहिता ।३।
सनत्कुमारसंहिता ।४। शुक-
संहिता ।५।
१४५६. शिवार्चनाशिरोमणिपद्धतिः
१४५७. शंभुविलासं
१४५८. शंभ्वैक्यदीपिका
१४५९. श्यामातन्त्रं
१४६०. शुक्रसंहिता
१४६१. शुक्रद्विशती
१४६२. शुकसप्तशती
१४६३. श्रीक्रमसंहिता
१४६४. श्रीक्रमसद्भावं
१४६५. श्रीक्रमोदयं
१४६६. श्रीक्रमसिद्धिः
१४६७. श्रीकण्ठसंहिता
१४६८. श्रीकण्ठभाष्यं
१४६९. श्रीत्रिपुरासारं
१४७०. श्रीदर्शं
१४७१. श्रीगुरुपूर्वशास्त्रं
१४७२. श्रीपादुकोदयं
१४७३. श्रीप्रत्यभिज्ञाहृदयं
१४७४. श्रीस्पन्दं
१४७५. श्रीस्तोत्रावली
१४७६. श्रीमहानयपद्धतिः
१४७७. श्रीस्वच्छन्दं
१४७८. श्रीसिद्धान्तमतं
१४७९. श्रुतिसूक्तिमाला
१४८०. षट्त्रिंशन्नवमालिकास्तवं
१४८१. षोढोत्तरयामळं
१४८२. सकलजननीस्तवं
१४८३. सच्चरित्ररक्षा

१४८४. सर्ववीरमतं
१४८५. सप्तशती
१४८६. समाधिपञ्चदशी
१४८७. सर्वज्ञानोत्तरतन्त्रं
१४८८. संविदानन्दभैरवीयं
१४८९. संवित्स्तोत्रं
१४९०. संवित्प्रकाशं
१४९१ संविदुल्लासं
१४९२. संवित्शतकं
१४९३. समयाचारं
१४९४. साम्राज्यलक्ष्मीपीठिका
१४९५. सारशास्त्रं
१४९६. सारसर्वस्वतन्त्रं
१४९७. सांख्यायनतन्त्रं
१४९८. सांबपञ्चशती
१४९९. सिद्धभैरवतन्त्रं
१५००. सिद्धांबातन्त्रं
१५०१. सिद्धयोगेश्वरीतन्त्रं
१५०२. सिद्धसिद्धान्तपद्धतिः २
१५०३. सिद्धसारस्वततन्त्रं
१५०४. सिद्धेश्वरतन्त्रं
१५०५. स्पन्दसन्दोहं
१५०६. सुप्रभेदः
१५०७. सुभगोदयं
१५०८. सुभगोदयव्याख्या चन्द्रकला
१५०९. सुभगोदयवासना
१५१०. सुन्दरीमहोदयं ।
१५११. सूतगीता
१५१२. सूरितन्त्रं
१५१३. स्वच्छन्दं
१५१४. स्वतन्त्रं ।
१५१५. स्वच्छन्दशास्त्रं
१५१६. स्वच्छन्दसारसंग्रहं
१५१७. स्वच्छन्दसंग्रहं
१५१८. स्वच्छन्दभैरवं
१५१९. स्वरभैरवं
१५२०. स्वात्मप्रकाशिका
१५२१. सेतुबन्धं
१५२२. सुभगार्चारत्नं
१५२३. सुभगार्चापारिजातं
१५२४. सोमभुजगवल्ली
१५२५. स्तोत्रावलिः
१५२६. स्तोत्रभट्टारकीयं
१५२७. सौन्दर्यलहरीस्तोत्रं
१५२८. सौन्दर्यलहरीव्याख्या लक्ष्मीधरा
१५२९. सौभाग्यरत्नाकरं
१५३०. सौभाग्यभास्करं
१५३१. सौभाग्यहृदयस्तोत्रं
१५३२. सौभाग्यसुधोदयं
१५३३. सौख्यं
१५३४. स्कन्दयामळं
१५३५. स्वरूपाह्लं
१५३६. सृष्टितत्वामृतं
१५३७. हंसपारमेश्वरं
१५३८. हंसभेदं
१५३९. हृद्भेदतन्त्रं
१५४०. हृदयसूत्रं
१५४१. क्षमास्तोत्रं
१५४२. क्षेमराजीयं
१५४३. गणपतिस्तोत्रं



१५४४. सुब्रह्मण्यस्तोत्रं
१५४५. सुब्रह्मण्यभुजंगं
१५४६. कुमारस्तुतिपञ्चकं
१५४७. नानाविधस्तुतिश्लोकाः
१५४८. श्रीराममूर्तिध्यानं
१५४९. परमेश्वरमूर्तिध्यानं
१५५०. परशिवमूर्तिध्यानं
१५५१. ललितामूर्तिध्यानं
१५५२. गौरीदशकं
१५५३. भवानीस्तोत्रं
१५५४. गंगास्तोत्रं
१५५५. सेतुस्तोत्रं
१५५६. कावेरीस्तोत्रं
१५५७. हरिहरस्तोत्रं
१५५८. हरिनामस्तोत्रं
१५५९. कृष्णस्तोत्रं
१५६०. बालमुकुन्दाष्टकं
१५६१. राघवाष्टकं
१५६२. कालभैरवाष्टकं
१५६३. विश्वनाथाष्टकं
१५६४. त्यागराजाष्टकं
१५६५. त्यागाधिराजाष्टकं
१५६६. हालास्येशाष्टकं
१५६७. हालास्यनाथाष्टकं
१५६८. शिवशंकराष्टकं
१५६९. चन्द्रशेखराष्टकं
१५७०. ताण्डवेश्वराष्टकं
१५७१. शंकरपार्वत्यष्टकं
१५७२. शंभ्वष्टकं
१५७३. कृत्तिवाससः पञ्चरत्नं
१५७४. पञ्चमुखस्तोत्रं
१५७५. ताण्डवेश्वरस्तोत्रं
१५७६. पञ्चाक्षरमालिका
१५७७. पञ्चाक्षरसंपुटं
१५७८. श्रीकण्ठप्रार्थना
१५७९. शिवप्रार्थना
१५८०. अपराधस्तोत्रं
१५८१. शिवमानसिकं
१५८२. दक्षिणामूर्तिमानसिकं
१५८३. दक्षिणामूर्तिचिन्त्यं
१५८४. रामभुजंगं
१५८५. हरिहरतारतम्यं
१५८६. सांबपरब्रह्मस्तुतिः
१५८७. शिवदशश्लोकी
१५८८. शिवषट्श्लोकी
१५८९. सांख्यसारं
१५९०. योगसारं
१५९१. आत्मविद्याविलासं
१५९२. परापूजानवकं
१५९३. कौपीनपञ्चकं
१५९४. सोपानपञ्चकं
१५९५. मयूरशतकं
१५९६. शिवकेशादिपादपरागान्तस्तुति
१५९७. श्रीकृष्णद्वादशमञ्जरी
१५९८. स्वदोषपरिहाराष्टकं
१५९९. जंबुनाथाष्टकं
१६००. आर्तिहराष्टकं
१६०१. कुळीरेशाष्टकं
१६०२. शिवभक्तलक्षणप्रार्थना
१६०३. शिवभक्तिकल्पलतिका

१६०४. तारावलीस्तोत्रं
१६०५. शिवाख्याशतकं
१६०६. शिवदयाशतकं
१६०७. श्रीमातृभूतेशशतकं
१६०८. शिवस्तुतिपद्धति:
१६०९. श्यामळादण्डकं
१६१०. श्यामळानवरत्नमालिका ।
१६११. द्वादशप्रासनवरत्नमालिका
१६१२. श्रीश्यामळांबिकास्तवं
१६१३. श्रीशारदांबाष्टकं
१६१४. मूकांबिकास्तोत्रं
१६१५. श्रीचिन्तामणिस्तोत्रं
१६१६. शिवनामादिशक्त्यष्टोत्तरशतं
१६१७. श्रीललिताष्टोत्तरशतनामानि
१६१८. इन्द्राक्षीस्तोत्रं
१६१९. त्रिपुरसुन्दरीमानसिकं
१६२०. धेनुवागीश्वरीस्तोत्रं
१६२१. श्रीपञ्चकोशविमर्शिनी
१६२२. नवाक्षरीस्तोत्रं
१६२३. आर्यापञ्चदशीस्तोत्रं
१६२४. धर्म्माम्बिकास्तोत्रं
१६२५. श्रीराजराजेश्वरीस्तवं
१६२६. उपदेशशिखामणि:
१६२७. श्रीशिवमीडेस्तवरत्नं
१६२८. षट्त्रंशन्नवमल्लिकासमर्चनस्तव-
राजं
१६२९. स्वात्मस्फूर्तिविलासं
१६३०. शान्तिस्तवं
१६३१. संवित्शतकं
१६३२. विरक्तिरत्नावलि:
१६३३. अद्वैतरसमञ्जरी सटीका
१६३४. हरिस्तोत्रं
१६३५. भजगोविन्दं
१६३६. हरिमीडाख्यस्तुतिः सटीका
१६३७. हनूमद्द्वादशनामानि
१६३८. विघ्नेश्वरषोडशनामानि
१६३९. सुब्रह्मण्यत्रंशन्नामानि
१६४०. सुब्रह्मण्यकवचं
१६४१. सुब्रह्मण्यमाला
१६४२. दक्षिणामूर्तिकवचं
१६४३. शिवकवचं
१६४४. शिवानन्दलहरी सटीका
१६४५. शिवमहिम्नस्तुतिः सटीका
४६४६. शिवभुजंगं
१६४७. बोधार्या
१६४८. अनुभवरत्नमाला
१६४९. धेनुवागीश्वरीस्तोत्रं
१६५०. प्रज्ञावर्द्धनसुब्रह्मण्यस्तुति:
१६५१. गणपतिस्तोत्रं
१६५२. गणेशाष्टकं
१६५३. सूर्याष्टकं
१६५४. अच्युताष्टकं
१६५५. जगन्नाथाष्टकं
१६५६. सीतारामाष्टकं
१६५७. गोविन्दाष्टकं
१६५८. पाण्डुरंगाष्टकं
१६५९. गोवर्द्धनाष्टकं
१६६०. लिंगाष्टकं
१६६१. पशुपत्यष्टकं
१६६२. कालभैरवाष्टकं



१६६३. तीक्ष्णदंष्ट्राकालभैरवाष्टकं
१६६४. वाराहीनिग्रहाष्टकं
१६६५. वाराह्यनुग्रहाष्टकं
१६६६. ताराष्टकं
१६६७. लक्ष्म्यष्टकं
१६६८. सरस्वत्यष्टकं
१६६९. सरस्वतीद्वादशनामानि
१६७०. शीतळाष्टकं
१६७१. नेर्म्मदाष्टकं
१६७२. पुष्कराष्टकं
१६७३. मणिकर्णिकाष्टकं
१६७४. गंगाष्टकं
१६७५. गंगाष्टकं
१६७६. गंगाष्टकं
१६७७. यमुनाष्टकं
१६७८. अन्नपूर्णाष्टकं

**धारणा**—(सस्मितम्) अमच्चस्स वाक्यसेसेण तक्कीअदि धीरोदत्तत्तणम् ।
[अमात्यस्य वाक्यशेषेण तर्क्यते धीरोदात्तत्वम् ।]

**मन्त्री**—अस्खलितासाधरणकार्यावधारणधौरेये स्खलितानि तव मनीषितानि भवन्ति । (पुरो विलोक्य) अहो नगरालङ्कारचातुरी पौराणाम् ।

तद्गोचरया-तत्र प्रवृत्तया । (गोचरयेति स्थाने गौरवयेति पाठान्तरम् ।) धिषणया-मत्या । दैत्यगुरुं-असुराचार्यम् उशनसम् । शौर्येण-पौरुषेण च । वृषपर्वाणं-तदाख्यं देवानां परमवैरिणं महाबलम् असुराधिपम् । [वृषपर्वणः पत्नी शुक्रदुहिता देवयानी; वृषपर्वणो दुहिता शर्मिष्ठा, यां च ययातिर्नृप उपयेमे ।] अतिशेषे-अतिशयितो वर्तसे । पाण्डो रोगस्य सुतरामसुरस्वभावत्वात् धिषणया दानवगुरुः, शौर्येण दानवाधिपो वृषपर्वा चास्य क्रमात् दृष्टान्तीकृतः । अस्खलितासाधारणेत्यादिना वक्ष्यमाणरीत्या स्वप्रभावप्रकटने वैलक्ष्यात् मयीत्युक्त्वा मध्ये विरमति । अमच्चस्सेति । वाक्यशेषेण-मध्ये विरतेन वाक्येन । समर्थपदलोपो वाक्यशेषः । धीरः-ओजस्वी । "विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः" इति धीरशब्दनिरुक्तिः । उदात्तः-गंभीरः । तयोर्भावः धीरोदात्तत्वम् । "अविकत्थनः क्षमावान् अतिगम्भीरो महासत्त्वः । स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः" इति धीरोदात्तलक्षणम् । धीरोदात्तत्वात् विकत्थनमाचरितुं सपदि मनसा संकुचन् वाक्यं पूरयितुं न प्रभवति । अस्खलितेति अस्खलितानि-प्रमादविरहितानि, यानि असाधारणकार्याणि-असामान्यानि राजकृत्यानि, तेषाम् अवधारणे-सावहिति परिज्ञानविषये, धौरेये-धुरन्धरे । मयि इति पूर्वावशिष्टमन्त्रिवाक्येनान्वयः । विद्यमाने सतीति शेषः । तव-पाण्डुनाम्नः प्रतीपमन्त्रिण इति यावत् । मनीषितानि-वाञ्छितानि कर्माणि । स्खलितानि-भग्नानि । भवन्ति । अस्खलितवृत्तेः मन्त्रिधूर्वहस्य मम पुरतस्त्वादृशानाम् अव्यवस्थित-

कीर्णान्यम्बुपृषन्ति किङ्करगणै रथ्यान्तरे ताडिता-
न्यातोद्यानि निकेतकेकिनटनप्रारम्भहेतूनि च ।
बद्धा मन्दिरशृङ्गसीमसु हसन्नाथापनीतांशुक-
व्यक्तोरोजसलज्जसिद्धयुवतिव्याकृष्टचेला ध्वजाः ॥ १४ ॥

कर्मणां मनोरथा भग्नमूला भवेयुरिति भावः । (कार्यावधारणधैर्यस्खलितानि इति असमस्तपदपाठो न समञ्जसः ।) अहो इति पौरैरारचितानां नगरालङ्काराणां दर्शनजनितं स्वविस्मयं प्रकटयति मन्त्री ।

नगरालङ्कारप्रकारमेव निरूपयति कीर्णानीति । रथ्यानां वीथीनाम्, अन्तरे-मध्ये, जनसञ्चारमार्ग इति यावत् । (रथ्यान्तरे इति स्थाने अभ्यन्तरे इति पाठान्तरम् ।) किङ्करगणैः-सेवकवर्गैः । अम्बुपृषन्ति-जलकणिकाः । कीर्णानि-समन्ततोऽभ्युक्षितानि । तथा निकेतकेकिनां-गृहमयूराणाम्, नटनप्रारम्भस्य-नर्तनोद्यमस्य, हेतूनि-कारणभूतानि । आतोद्यानि-वीणा-वेणु-मुरज-तालाख्यानि चतुर्विधानि वाद्यानि च । ताडितानि । हसद्भिः-शृङ्गारचेष्टावशात् हासं कुर्वद्भिः, नाथैः-कामुकैर्नायकैः, अपनीतं-आकृष्टम्, अंशुकं-उत्तरीयं येभ्यस्ते; तत एव व्यक्ताः-नग्नीकृताः; उरोजाः-स्तनाः यासां ताः; अत एव सलज्जाः-सव्रीडाः; याः सिद्धयुवतयः-तदाख्यदेववनिताः; ताभिः, व्याकृष्टानि-आहृतानि चेलानि-दण्डाग्रग्रथितवस्त्राणि येभ्यस्ते । तादृशाः ध्वजाः । (व्याकृष्टचेलध्वजाः इति अभिन्नपदप्रयोगो न समीचीनः ।) सहासं स्वकान्तैः स्ववक्षोजावरणवस्त्रेषु क्रीडावसरे समाकृष्टेषु, सविधोद्धूयमानानां सौधाग्रस्थितपताकानाम् वस्त्राणि तात्कालिकावरणार्थं सिद्धवनिताभिः सपदि समाकृष्टानीति भावः । नगरहर्म्याणाम् अत्युन्नतत्वम् अनेन सूचितं भवति । मन्दिरशृङ्गसीमसु-भवनानाम् अत्युच्छ्रितानाम् अग्रभागेषु । (मन्दिरमार्गसीमसु इति पाठान्तरम्) बद्धाः । विद्यन्त इति शेषः । नगरवीथयः समन्तात् सलिलसेचनेन वीतरजस्काः शीतलाश्चापादिताः; वाद्यानां



अपि च ।

मन्ये रम्भाः पुरमृगदृशामूरुसौभाग्यचौर्यात्
बद्धा भृत्यैः प्रतिगृहमपि द्वारपार्श्वद्वयेषु ।
अम्भोदुर्गात् कथमपि हृता यन्त्रितोच्चैर्विताने
तासां वक्त्राम्बुजपरिमलग्राहिणी पद्ममाला ॥ १५ ॥

विविधानां प्रतिसदनं वादनेन प्रजाभिः परमामोदश्च प्रकटितः; सौधाग्रेषु च सप्रमोदम् उच्छ्रिताः पताकाश्च परितो निबद्धाः । इति नगरालङ्कारप्रकारः कविनात्रोपवर्णितः ॥ १४ ॥

अपि चेति अलङ्कारान्तराण्यपि नगरस्य निर्वर्णयति । मन्ये रम्भा इति । पुरमृगदृशां-नगरनिवासियुवतीनाम् । ऊरूणां सौभाग्यस्य-सक्थ्नां सौन्दर्यस्य चौर्यात् हेतोः । भृत्यैः-सेवकजनैः । गृहे गृहे प्रतिगृहं-एकैकस्मिन्नपि भवने । द्वाराणां-गृहप्रकोष्ठानाम्, पार्श्वद्वयेषु । रम्भाः-कदलीस्तम्भाः । बद्धाः-रज्जुभिर्निबद्धाः । इति मन्ये । पुरसुन्दरीणाम् ऊरुकाण्डानुकारिणो रम्भास्तम्भा इति भावः । तासां-पुरसुन्दरीणाम् । वक्त्राम्बुजानां-सरोजसदृशमुखानाम्, परिमलस्य-सौरभ्यस्य, ग्राहिणी-अपहर्त्री । पद्ममाला-तामरसकुसुमानां राजिः । अम्भोदुर्गात्-पौरैर्दुष्प्रापात्-सलिलमयात् निराबाधदेशात् । "दुष्प्रापं तु परं दुर्गं यन्त्रशैलजलादिभिः" इति वैजयन्ती । कथमपि-महता यत्नेन दुर्गं विलङ्घ्य आहरणस्य सुमहद्यत्नसाध्यत्वात् । हृता-बलादानीता । उच्चैः-उन्नते । वितानेउल्लोचाख्ये गृहादीनामुपरितनान्तरालचित्रावरणे । यन्त्रिता-आरोप्य पिनद्धा । मन्ये इत्यत्रापि अनुषज्यते । सरसिजैः नगरसुन्दरीणाम् आननसौरभ्यापहाररूपापराधस्य आचरितत्वात् तेषामिदम् उच्चैर्बन्धनरूपं दण्डनमभूद्विहितमिति भावः ॥ १५ ॥

किञ्च, सुधालेपधवलीकृतसौधवसतयः पौरयुवतयः शारदाभ्रगतपरमाद्भुततडिल्लताविभ्रममुद्भावयन्ति। किञ्च, चञ्चरीकगणश्चित्रलिखितसहकारमञ्जरीकलितोत्कलिकया सञ्चरमाणोऽपि कदर्यमवनीपतिमुपगतो वनीपकलोक इव निष्फल एव निवर्तते। कतिचन निकेतनानि च नूतनानि आलिखितेन अहिनकुलेन, अश्वमहिषेण, गोव्याघ्रेण च भित्तिषु निर्वैरसत्त्वानि अनुकुर्वन्ति चत्वराणि तपोधनाश्रमपदस्य। (अन्यतोऽवलोक्य सहासम्)

सुधालेपेति। सुधालेपेन धवलीकृतानि यानि सौधानि-राजार्हाणि गृहाणि तान्येव वसतयः-वासस्थलानि यासां ताः। पौरयुवतयः। शारदाभ्रं-शरत्काले दृश्यमानः मेघः, तद्गताश्च ताः परमाद्भुताश्च, याः तडिल्लताः, तासां विभ्रमं-विडम्बनं भ्रान्तिं वा। उद्भावयन्ति। सुधालेपधवलितानां सौधानां धवलशारदाम्बुदसदृशत्वम्, तेषु निवसन्तीनां सुवर्णयष्टिगौराणां सुन्दरीणां विद्युल्लतातुल्यत्वं चात्रोद्भावितम्। वीतसलिलत्वादतीव शुभ्राणां शारदाभ्राणां मध्ये तडिल्लतानां सम्भवस्योपपत्त्यभावात् तेषु तथाविधरूपावलोकनस्य परमाद्भुतत्वम् अभिहितम्। चञ्चरीकगणः-भ्रमरवर्गः। चित्रेषु लिखिताः याः सहकारमञ्जर्यः-रसालकुसुमगुच्छाः, तासु कलितया-कृतया, उत्कलिकया-उत्कण्ठया। सञ्चरमाणः-आलेख्यगताम्रमञ्जरीणामुपरि परिभ्रमन्नपि। कदर्यं-कृपणम्। अवनीपतिं-प्रभुम्। उपगतः-उपस्थितः। वनीपकलोकः-अर्थिजन इव। चित्रार्पितानां चूतकुसुमानाम् अकृत्रिमप्रसूनसंबन्धि नैसर्गिकं लावण्यं विना मकरन्दसुगन्धिभ्यां विद्यत इति भावः। भित्तिषु आलिखितेन-चित्रेषु निवेशितेन। अहिश्च नकुलश्च तयोः समाहारः अहिनकुलं तेन। अश्वमहिषेण, गोव्याघ्रेण चेत्यनयोरपि एवमेवैकवद्भावः। "येषां च विरोधः शाश्वतिकः" इति सूत्रेण परस्परशत्रुभूतप्राणिवाचकानाम् अमीषां शब्दानां द्वन्द्वैकवद्भावः। अन्यो-



दृष्ट्वाकृष्टकचामुदस्तचिबुकां पत्या कराभ्यां बलात्
कामप्येणदृशं करौ विधुवतीमास्वाद्यमानाधराम्।
आलेख्ये पुरशिल्पिना विलिखितां भित्तौ बहिर्मन्दिरात्
नार्यः सस्मितनम्रवक्त्रकमलाः कर्षन्ति यूनां मनः॥ १६॥

न्यवैरं स्वाभाविकं सर्वदा चावहताम् अहि-नकुलादीनां मृगाणां सह निवसतिं सूचयन्ति यानि भित्तिगतानि चित्राणि तद्युक्तानि नगरनिकेतनानि। तपोधनाश्रमपदस्य-मुनीनाम् आश्रमस्थलस्य। निर्वैराणि-अपोहितस्वाभाविकविद्वेषाणि, सत्त्वानि-सर्पताक्ष्यं-कुरङ्गशार्दूलादयो जन्तवः। तानि। अनुकुर्वन्ति-स्वरूपतो गुणतश्चानुसरन्ति।

दृष्ट्वेति। मन्दिरात् बहिः। भित्तौ। पुरशिल्पिना-नागरिकेण चित्रकारेण। आलेख्ये-चित्रे। विलिखिताम्। (विलिखितामिति स्थाने विरचितामिति पाठान्तरम्।) कामपि। एणदृशं-मनोहरां युवतिम्। कथंभूताम्, पत्या-स्वभर्त्रा। कराभ्याम्। आकृष्टः कचः यस्याः ताम्-बलात् एकेन करेण गृहीतकेशपाशाम्। अन्येन करेण उदस्तं-उन्नमितं चिबुकं यस्यास्ताम्। बलात् आस्वाद्यमानः अधरः यस्यास्ताम्। अतएव करौ विधुवतीं-बलात्कारोत्पन्नसात्त्विकभावजनितव्रीडाविशेषेण प्रकम्पयन्तीम्। दृष्ट्वा-सर्वजनावलोकनार्हे बाह्यकुड्यस्थले ग्राम्यकर्मायत्तस्य मिथुनस्य चित्रमवलोक्य। नार्यः-तन्मार्गेण यातायातमाचरन्त्यस्तरुण्यः। सस्मितानि-व्रीडासूचकमन्दस्मेरसहितानि, अत एव नम्राणि-आनमितानि, वक्त्रकमलानि याभिस्ताः। तथाविधाः सत्यः। यूनां-तादृशनारीजनावलोकनासक्तानां तरुणानाम्। मनः। कर्षन्ति। महाराजस्य वीथीषु समागमं प्रतीक्षद्भिः पौरजनैः न केवलं नगरमार्गाः चत्वरादिप्रदेशाश्च परं तु स्वात्मनां गृहाणि च सुधालेपन-चित्ररचनादिभिः सुमनोहरमलङ्कृतानीति भावः॥ १६॥

नन्विदानीमत्र नगरालङ्कारदर्शिनो राज्ञः समागमं प्रतीक्षमाणाः पौरास्तस्य परमुपचाराय संनह्यन्ति । तथाहि—

स्थाप्यन्ते गृहवासवेदिषु घटाः संवेष्टितास्तन्तुभिः
प्रत्यग्राम्रदलप्रसाधितमुखा विप्रैः पयःपूरिताः ।
कन्याभिर्घृतसिक्तवर्तिनिकरैर्नीराजनाभाजनैः
साध्यन्ते सममेव लाजसुमनश्चित्राणि पात्राणि च ॥ १७ ॥

(विचिन्त्य) कथमसौ राजा लिप्सितं फलं लब्ध्वा समायास्यति? कथमस्य साम्बशिवप्रसादमन्तरेण लिप्सितफललाभः? कथं वा कठोराणि

**नन्विति** । इदानीं-निर्वर्तितनिश्शेषनगरालङ्कारेऽस्मिन् समये । समागमं आगमनम् । परम् उपचाराय-विशिष्य संमाननाय । संनह्यन्ति-उद्युक्ताः सन्ति ॥

तानेवोपचारोद्यमप्रकारान् तथाहीति विवृणोति । **स्थाप्यन्त इति** । तन्तुभिः संवेष्टिताः-सूत्रैः समन्ततः संवीताः । तथा पयसा-शुद्धोदकेन पूरिताः । प्रत्यग्रैः-तदानीमेवानीतैः अम्लानहरितैः, आम्रदलैः, प्रसाधितानि-अलङ्कृतानि, मुखानि येषां ते । घटाः-पूर्णकुम्भाः । गृहवासवेदिषु-गृहाणां बाह्याङ्गणघटितासु वितर्दिकासु । विप्रैः । स्थाप्यन्ते । सूत्रवेष्टितानां साम्रदलानां शुद्धोदकपूर्णकुम्भानां वहिर्वितर्दिकासु स्थापनं तावत् माननीयजनानां स्वागतरूपपूजनकर्मस्वन्यतममिति आचारज्ञा जानीयुः । तथैव घृतसिक्ताः वर्तिनिकरा येषु तैः । नीराजनाभाजनैः-आरात्रिकोपकरणभूतैः दीपपात्रैः । सममेव-नीराजनासाधनैः सहैव । लाजैः-भर्जिततण्डुलैः, सुमनोभिः-कुसुमैश्च, चित्राणि-शबलीकृतानि ; विचित्रतया अलङ्कृतानीति यावत् । पात्राणि-महतां सभाजनार्थमुपयुज्यमानानि भाजनानि च । कन्याभिः । साध्यन्ते सज्जीक्रियन्ते ॥ १७ ॥

**कथमसाविति** । लिप्सितं-काङ्क्षितम् । समायास्यति-प्रत्यागमिष्यति । लिप्सितफललाभः-अभीष्टफलसिद्धिः । कथं भविष्यतीत्यर्थः । कठोराणि-पञ्चाग्नि-



तपांसि विनानेन सुलभः शिवप्रसादः? कथमनेन स्वकालविकस्वरशिरीषदलकोमलशरीरेण सुकरा कठोरा तपश्चर्या? न चैतस्य तादृशतपश्चरणादृतेऽखिलपुरुषार्थसाधनं भगवतश्चन्द्रकलावतंसस्य निरन्तरध्यानं संभाव्यते । नलिनीदलान्तरालतरलोदबिन्दुसमस्यन्दा दुर्निरोधा हि चित्तवृत्तयः । तदिदानीं मदीयमन्तःकरणं दुरन्तचिन्तोदधौ निमज्ज्य पुनरुन्मज्जति । अथवा कस्य किमसम्भावितम् अनुकूलतामुपगतवत्या नियत्या । (दक्षिणभुजस्पन्दमभिनीय) कथमस्थाने मम विचारः । सर्वं सुघटितं भविष्यति ।

मध्यादिषु निर्वर्तनीयत्वात् अतिकृच्छ्राणि । स्वकाले-समुचिते काले, ग्रीष्मर्ताविति यावत् ; विकस्वराणि-विकासीनि, यानि शिरीषदलानि-शिरीषकुसुमानि, तानीव कोमलं-अतीव मृदुलम्, शरीरं यस्य तेन । तादृशेन मृदुशरीरप्रकृतिना अनेन-राज्ञा । कठोरा-अतिप्रयाससाध्या । तपश्चर्या । कथं सुकरा-कथमनेन सुलघु निर्वर्त्येतेत्यर्थः । अखिलपुरुषार्थानां-धर्मार्थकाममोक्षाख्यानाम्, साधनं-सम्पादकम् । चन्द्रकलावतंसस्य-परमेश्वरस्य । चित्तवृत्तयः-मनसो व्यापाराः । नलिनीदलस्य-पद्मपत्रस्य, अन्तराले-मध्ये, विद्यमान उदबिन्दुः-जलकणिका, तस्य समः, स्यन्दः-प्रसरः, चलनमिति यावत्, यासां ताः ; पद्मपत्राम्बुबिन्दुवत् अतितरां चञ्चला इत्यर्थः । अत एव दुर्निरोधाः-यन्त्रणानर्हाः । चित्तवृत्तिनिरोधेनैव चन्द्रमौलेर्निरन्तरध्यानम्, तादृशध्यानेनैव तपसः कठिनस्याचरणम्, महता तपसैव महेश्वरस्य प्रसादाधिगमः, तत्प्रसादेनैव अभीप्सितार्थलाभश्चेति अमीषाम् अवस्थान्तराणाम् एकैकस्य च दुष्करत्वमालोच्य, दुरन्ते-अपारे, चिन्तोदधौ । मदीयम् अन्तःकरणं-मामकं मनः । निमज्ज्य । पुनः उन्मज्जति-चिन्तारूपकालुष्यमपास्य नैर्मल्यमवाप्य ईप्सितफलप्राप्तिर्महाराजस्य नैव स्यात् दुस्साधेति निश्चेतुं प्रभवतीति भावः । अथवेति चित्तस्यावस्थान्तरमनुकूलरूपं निर्दिशति । अनुकूलतां-आनुकूल्यम् । उपगतवत्या-प्राप्तवत्या । नियत्या-दैवेन । (अनुकूलता-

(नेपथ्ये)

**वैतालिकः—**

वातं प्रावृषिकं निरुध्य सहसा गात्रप्रकम्पप्रदं
संफुल्लानि विधाय चारुकमलान्यासाद्य हंसागमम् ।
दिष्ट्या लब्धवता प्रसादमधिकं वापीजलाधारयोः
सद्यः शारदवासरेण धवलो मेघोऽम्बरं प्रापितः ॥ १८ ॥

मुपगते दैवे इति पाठान्तरम् ।) विचारः-चिन्ता । अस्थाने इत्यव्ययमेतत्; अनुचितमित्यर्थः । सुघटितं-सम्यक् निष्पादितम् । नेपथ्य इति । नेपथ्य-वैतालिकयोः पूर्वमेव विवरणं कृतम् ।

**वातमिति ।** शारदवासरेण-शरत्कालसम्बन्धिना दिवसेन । दिष्ट्या-दैववशात् । गात्राणां-अङ्गानाम्, कम्पस्य-वेपनस्य, प्रदं-उत्पादकम् । प्रावृषिकं-वार्षिकम् । वातं-अतिशीतलं मारुतम् । सहसा-आकस्मिकतया । निरुध्य-निवर्त्य; अपगतवातं कृत्वेत्यर्थः ।'चारुकमलानि-मनोहरसरसीरुहाणि । संफुल्लानि-सम्यक् विकसितानि । विधाय-कृत्वा । वृष्ट्यां विनिवृत्तायां कालाम्बुदेषु च विलयमधिगतेषु पङ्कजानां सङ्कोचावस्थाव्यपगमपूर्वकम् अभिवृद्धिः शारदो विकासश्च स्वयं प्रकृत्यैव प्रादुर्भवतीति भावः । हंसानाम् आगमं-मानसात् इह प्रत्यागमनम् । आसाद्य-प्राप्य । प्रावृडारम्भे हंसा इमं देशं विहाय मानससरसे यान्ति, शरदि च ततस्ते प्रतिनिवर्तन्त इति च कविसमयसिद्धो व्यवहारः । वापी-दीर्घिका, जलाधारः-जलाशयः तयोः । अधिकं प्रसादं-सुतरां नैर्मल्यम् । लब्धवता-प्रापितवता । शारदवासरेणेति पूर्वेणान्वयः । धवलः-शरत्कालवशात् जलसञ्चयराहित्याच्चाधिगतपाण्डुरस्वभावः । मेघः । अम्बरं-आकाशम् । प्रापितः-नीतः । अनेनन च वैतालिकीयवर्णनेन प्रस्तुतकथावस्तुनि मन्त्रिणो मनोरथानु-रोधेन सपदि समुपनतोऽवस्थाविपर्ययः सूचितः । यथा-सर्वेष्वप्यान्तरेषु बाह्येषु चाङ्गेषु जीवराजस्य नगरसीमाङ्गणभूतेषु रिपुप्रहितैः शतसङ्ख्याकैः रोगानीकैः,



[*] वैष्णवैर्वारुणैः[†] सूक्तैः वैष्ण[‡]वैरिन्द्रदेवतैः[§] ।

---

इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः ।
शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्यः ॥
इन्द्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे ।
शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि ॥ ऋ.म.८.सू.९९.व.३१.

[*] विष्णोर्नुकं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजाꣳसि यो अस्क-भायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायः । तै. सं. का. १. प्र. २. अ. १३ ॥ तदस्य प्रियमभि पाथो अश्याम् । नरो यत्र देवयवो मदन्ति । उरुक्रमस्य स हि बन्धुरित्था । विष्णोः पदे परमे मध्व उत्सः । तै. ब्रा. २. प्र. ४. अ. ६ ॥ प्र तद्विष्णुस्स्तवते वीर्याय । मृगोन भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा । तै. ब्रा. २. प्र. ४. अ. ३ ॥

परो मात्रया तनुवा वृधान । न ते महित्वमन्वश्नुवन्ति । उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वम् । परमस्य विथ्से । तै. ब्रा. २.प्र.८.अ.३ ॥ विचक्रमे पृथिवीमेष एताम् । क्षेत्राय विष्णुर्मनुषे दशस्यन् । ध्रुवासो अस्य कीरयो जनासः । उरुक्षितिꣳ सुजनिमा चकार । त्रिर्देवः पृथिवीमेष एताम् । विचक्रमे शतर्चसं महित्वा । प्र विष्णुरस्तु तवसस्तवीयान् । त्वेषꣳ ह्यस्य स्थविरस्य नाम । तै. ब्रा. २. प्र. ४. अ. ११.

[†] उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय । अथा वयमादित्य व्रते तवानागसो अदितये स्याम । तै. सं. का. १. प्र. ९. अ. ११ ॥

अस्तभ्नाद्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्या आसीदद्विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि । तै. सं. का. १. प्र. २. अ. ८.

यत्किञ्चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि । अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः । कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म । सर्वा ता विष्यशिथिरेव देवाथा ते स्याम वरुण प्रियासः । तै. सं. का. ३. प्र. ४. अ. ११ ॥

अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः । क्षयन्नस्मभ्य-मसुर प्रचेतो राजन्नेनाꣳसि शिश्रथः कृतानि । तै. सं. का. १. प्र. ९. अ. ११.

---

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भि: । अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयु: प्रमोषी: । तै. सं. का. २. प्र. १. अ. ११ ॥

‡ सहस्रशीर्षा पुरुष: । सहस्राक्ष: सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् । पुरुष एवेदꣳ सर्वम् । यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशान: । यदन्नेनातिरोहति । एतावानस्य महिमा । अतो ज्यायाꣳश्च पुरुष: । पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि । त्रिपादूर्ध्व उदैत् पुरुष: । पादोऽस्येहाऽभवात् पुन: । ततो विष्वङ्व्यक्रामत् । साशनानशने अभि । तस्माद्विराडजायत । विराजो अधि पुरुष: । स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुर: । यत् पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्म: शरद्धवि: । सप्तास्यासन् परिधय: । त्रि: सप्त समिध: कृता: । देवा यद्यज्ञं तन्वाना: । अबध्नन् पुरुषं पशुम् । तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रत: । तेन देवा अजयन्त । साध्या ऋषयश्च ये । तस्माद्यज्ञात सर्वहुत: । सम्भृतं पृषदाज्यम् । पशूꣳस्ताꣳश्चक्रे वायव्यान् । आरण्यान् ग्राम्याश्च ये । तस्माद्यज्ञात् सर्वहुत: । ऋच: सामानि जज्ञिरे । छन्दाꣳसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत । तस्मादश्वा अजायन्त । ये के चोभयादत: । गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावय: । यत् पुरुषं व्यदधु: । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते । ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्य: कृत: । ऊरू तदस्य यद्वैश्य: । पद्भ्याꣳ शूद्रो अजायत । चन्द्रमा मनसो जात: । चक्षो: सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत । नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौ: समवर्तत । पद्भ्यां भूमिर्दिश: श्रोत्रात् । तथा लोकाꣳ अकल्पयन् । वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचित्य धीर: । नामानि कृत्वाऽभिवदन् यदास्ते । धाता पुरस्ताद्यमुदाजहार । शक्र: प्रविद्वान् प्रदिशश्चतस्र: । तमेवं विद्वानमृत इह भवति । नान्य: पन्था अयनाय विद्यते । यज्ञेन यज्ञमयजन्त देवा: । तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमान: सचन्ते । यत्र पूर्वे साध्या: सन्ति देवा: ॥ तै. आ. प्र. ३. अ. १३

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्या: सप्तधामभि: ॥

ऋ. म. १, सू. २२, व. १६



सप्तभि:* पावमानीभि: यदन्ति यच्चदूरके ॥ २५ ॥

---

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाँ सुरे ।

तै. सं. का. १, प्र. २, अ. १३.

त्रीणि पदा विचक्रमे । विष्णुर्गोपा अदाभ्य: । ततो धर्माणि धारयन् ।

तै. ब्रा. २, प्र. ४, अ. ६.

विष्णो: कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्य: सखा तद्विष्णो: परमं पदꣳ सदा पश्यन्ति सूरय: । दिवीव चक्षुराततम् ॥

तै. सं. का. १, प्र. ३, अ. ६.

§ यत इन्द्र भयामहे । ततो नो अभयं कृधि । मघवं छग्धि तव तन्न उन्तये । विद्विषो विमृधो जहि ॥

स्वस्ति दा विशस्पति: । वृत्रहा विमृधो वशी । वृषेन्द्र: पुन एतु न: । स्वस्तिदा अभयङ्कर: ॥ तै. ब्रा. ३, प्र. ११, अ. ४.

विरक्षो विमृधो जहि विवृत्रस्य हनूरुज । विमन्युमिन्द्रवृत्रहन्नमित्रस्याभिदासत: ॥ ऋ. म. १०, सू. १५२, ३.

इदं सुमे जरितराचिकिद्धि प्रतीपं शापं नद्यो वहन्ति । लोपाश: सिंहं प्रत्यञ्च मत्सा: क्रोष्टा वराहं निरतक्त कक्षात् ॥ ऋ. म. १०, सू. १८, व. ४.

* यदन्ति यच्च दूरके भयं विन्दति मामिह ।
पवमान वि तज्जहि ॥
पवमान: सो अद्य न: पवित्रेण विचर्षणि: ।
य: पोता स पुनातु न: ॥
यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ।
ब्रह्म तेन पुनीहि न: ॥
यत्ते पवित्रमर्चिवदग्ने तेन पुनीहि न: ।
ब्रह्मसवै: पुनीहि न: ॥
उभाभ्यां देव सवित: पवित्रेण सवेन च ।
मां पुनीहि विश्वत: ॥ ऋ. मं. ९. सू. ६७. व. १७.
त्रिभिष्ट्वं देव सवितर्वर्षिष्ठै: सोम धामभि: ।

तथा *सामपवित्रेण तत आङ्गिरसेन† च ।
‡वामदेव्येन साम्ना तु §तद्विष्णोरिति मन्त्रतः ॥ २६ ॥
¶पवित्रं तेति मन्त्रेण ||तच्छंयोरिति मन्त्रतः ।
आत्मानं प्रोक्ष्य विधिवत् ततः स्नायात्प्रसन्नधीः ॥ २७ ॥

---

अग्ने दक्षैः पुनीहि नः ॥
पुनन्तु मां देवजनाः पुनन्तु वसवो धिया ।
विश्वेदेवाः पुनीत मा जातवेदः पुनीहि मा ।

ऋ. मं. ९. सू. ६७. व. १८.

* See under Vāmadeva Sāma in the next line.

† हꣳसः शुचिषद्वसुरन्तरिक्षद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ तै. सं. का. ४. प्र. २. अ. १.; ऋ. म. ४. ४. ९; Compare with *ADS.*, I. i, 2, 2.

‡ कया नश्चित्र आभुवदूती सदावृधः सखा ।
कया शचिष्ठया वृता ॥ सा. सं. १६९. ऐन्द्रं काण्डम् ॥ ऋ. मं. ४. सू. ३१. व. २४; तै. सं. का. ४. प्र. २. अ. ११.
कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु ॥
अभी षु णः सखीनामविता जरितॄणाम् ।
शतं भवास्यूतये ॥
सा. सं, ६८३, ६८४ उत्तरार्चिकः, प्रथमाध्यायः; ऋ.म. ४. ३१. १, २.

§ तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥ तै. सं. का. १. प्र. ३. अ. ६.

¶ पवित्रं ते विततं ब्रह्मणस्पते । प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनूर्न तदा मो अश्नुते । शृतास इद्वहन्तस्तत्समाशत ॥ तै. आ. प्र. १. अ. ११. म. २.

|| तच्छंयोरा वृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवीस्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शंनो अस्तु द्विपदे । शं चतुष्पदे ॥ तै. ब्रा. ३. प्र. ५. अ. ११.



मन्त्रं विना तु यः स्नायात् तस्य स्नानं वृथा भवेत् ।
तस्मान्मन्त्रेण सहितं स्नानं कुर्याद्विधानतः ॥ २८ ॥
अमन्त्रकं तु शूद्राणां स्त्रीणां स्नानं विधीयते ।
द्विजानां मन्त्रतः स्नानं श्रुतिस्मृतिविदो विदुः ॥ २९ ॥
[1]संकल्पः सूक्तपठनं मार्जनं चाघमर्षणम् ।
दे[2]वादितर्पणं चैव स्नानं पञ्चाङ्गमिष्यते ॥ ३० ॥
प्रक्षाल्य पादौ पाणी च प्राङ्मुखोदङ्मुखोऽपि वा ।
दर्भपाणिः समाचम्य ततः संकल्पमाचरेत् ॥ ३१ ॥
संकल्पेन विना यस्तु स्नानं कुर्वीत मानवः ।
तत्स्नानं मूकतां याति तस्मात्संकल्पमाचरेत् ॥ ३२ ॥
मार्जनं सूक्तपठनमघमर्षणतर्पणे ।
स्नाने यदि न कुर्वीत तस्य स्नानं वृथा भवेत् ॥ ३३ ॥
एवं स्नात्वा विधानेन तीरमागत्य संयतः ।
प्राङ्मुखोदङ्मुखो वाऽपि ध्यायेन्नारायणं सुधीः ॥ ३४ ॥
शिरोवारि शरीराम्बु वस्त्रनिष्पीडनोदकम् ।
पिबन्ति देवा ऋषयः पितरो ब्राह्मणस्य तु ॥ ३५ ॥
अप्रायत्यकराः प्रोक्ताः पृष्ठतः केशबिन्दवः ।
त एव पुरतः प्रोक्ताः पुण्यतीर्थजलोपमाः ॥ ३६ ॥
वामे तु रुधिरं विद्यात् दक्षिणे त्वमृतं भवेत् ।

[1] Two lines are cited under *Smṛtyantara* in *SMP.*, p. 246—(Āhnika).

[2] वतात—*ibid.*

स्नात्वा तीरं समागम्य समाचम्य विधानतः ॥ ३७ ॥
स्थित्वोर्ध्वज्ञः पूर्वमुख उत्तरास्योऽथवा द्विजः ।
द्वौ पादौ युगतः कृत्वा पूरयेदुदकाञ्जलीन् ॥ ३८ ॥

([1]स्नानाङ्गतर्पणम्)

देवानृषीन्पितॄन्नित्यं जलमध्ये तु तर्पयेत् ।
देवतीर्थेन देवांश्च ऋषींश्च ऋषितीर्थतः ॥ ३९ ॥
पितॄंश्च पितृतीर्थेन जलमध्ये तु तर्पयेत्* ।

[1] (          )—घ. ङ.

* ब्रह्मादयो ये देवाः तान् देवांस्तर्पयामि
सर्वान् देवान् ,,
सर्वदेवगणान् ,,
सर्वदेवपत्नीः ,,
सर्वदेवगणपत्नीः ,,
} देवतीर्थेन

कृष्णद्वैपायनादयो ये ऋषयः तान् ऋषींस्तर्पयामि ॥
सर्वान् ऋषीन् ,,
सर्वऋषिगणान् ,,
सर्वऋषिपत्नीः ,,
सर्वऋषिगणपत्नीः ,,
} ऋषितीर्थेन

सोमः पितृमान् यमोऽङ्गिरस्वान् अग्निः कव्यवाहनादयो
ये पितरः तान् पितॄंस्तर्पयामि ।
सर्वान् पितॄन् ,,
सर्वपितृगणान् ,,
सर्वपितृपत्नीः ,,
सर्वपितृगणपत्नीः ,,
} पितृतीर्थेन

See Appendix I on the several tirthas.



*ऊर्जं प्रदक्षिणीकृत्य तृप्यतेति स्थले क्षिपेत् ॥ ४० ॥
गोशृङ्गमात्रमुद्धृत्य तर्पणे जलमुत्सृजेत् ।
ऊर्ध्वं तिर्यगधः स्वस्वतीर्थेनैव क्रमाद्द्विजः ॥ ४१ ॥
'यन्मया दूषितं तोयं शारीरमलशङ्कया[1] ।
तत्पापस्य विशुद्ध्यर्थं यक्ष्माणं तर्पयाम्यहम्' ॥ ४२ ॥
इति मन्त्रं समुच्चार्य प्रक्षिपेत्तीरतो जलम् ।
पूर्वाशाभिमुखो देवानुत्तराभिमुखस्त्वृषीन् ॥ ४३ ॥
पितॄंस्तु दक्षिणास्यस्तु जलमध्ये तु तर्पयेत् ।
एकवस्त्रेण न स्नायात् प्रेतकर्म विना क्वचित् ॥ ४४ ॥
यदि स्नायात्तु मोहेन पुनः स्नानं समाचरेत् ।
प्रेतकर्मणि न स्नायादुत्तरीयेण संयुतः ॥ ४५ ॥
[2]अन्तरीयोत्तरीयाभ्यां नित्यं स्नानं समाचरेत् ।

[1] लदूषितम्—घ, ङ, छ, ज.

[2] This is a cardinal point of difference between the S'rivaiṣṇavas of the school of S'ri Rāmānuja and the Smārtas of the school of S'ri S'aṅkara. The insistence on the *antarācchādana* is a Vaiṣṇavite practice. However, *SMP*. though it does not explicitly state that *antarācchādana* should be worn, yet alludes to it under *Snāna* where the water flowing from the *antrācchādana* after a bath is also to be wiped out carefully; Āhnika, p. 251.

जाबालिः—
स्नात्वा निरस्य वस्त्रं तु जङ्घे शोध्ये मृदम्भसा ।
अपवित्रीकृते ते हि कौपीनस्राववारिणा ॥

* ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् । स्वधा स्थ तर्पयत मे पितॄन् ॥ वाज. सं. अ. २–३४.

स्नानं सन्ध्यां जपं होमं देवताराधना[1]शनम् ॥ ४६ ॥

[2]यद्येकवस्त्रं कुर्वीत सर्वं विद्यात्तदासुरम् ।

स्नातो नाङ्गानि संमृज्यात् स्नानशाट्या न पाणिना ॥ ४७ ॥

न च निर्धुनुयात्केशान् न तिष्ठन् परिमार्जयेत् ।

दक्षिणाभिमुखासीनो मूर्धानं परिमार्जयेत् ॥ ४८ ॥

अन्यथा मार्जनं कुर्यात् पुनः स्नानेन शुद्ध्यति ।

स्नानं कृत्वाऽऽर्द्रवासास्तु विण्मूत्रं कुरुते यदि ॥ ४९ ॥

त्रिरात्रमशुचिर्भूयात् स्नानं तस्य वृथा भवेत् ।

प्राणायामशतं कृत्वा पुनः स्नानेन शुद्ध्यति ॥ ५० ॥

आर्द्रवस्त्रेण हस्तेन यो द्विजोऽङ्गं प्रमार्जयेत् ।

शुनालीढेन तत्तुल्यं पुनः स्नानेन शुद्ध्यति ॥ ५१ ॥

आच्छादितैकदेशेन न कुर्यादङ्गमार्जनम् ।

शुनालीढेन तत्तुल्यं पुनः स्नानेन शुद्ध्यति ॥ ५२ ॥

शरीरं शुष्कवस्त्रेण मार्जयेत्स्नानतः परम् ।

मार्जयेदार्द्रवस्त्रेण यदि स्नानं वृथा भवेत् ॥ ५३ ॥

[3]सप्तवाताहतं वस्त्रं शुष्कवत्प्रतिपादितम् ।

आर्द्रं वाऽपि द्विजातीनां आदृतं **गौतमादिभिः** ॥ ५४ ॥

सप्तरात्रोदितां विष्ठां मृत्तिकेत्याह **गौतमः** ।

[1] नाधिकम्—घ, ङ, छ, ज.

[2] Cited under *Smṛtisaṅgraha* in *SMP.*, (Āhnika), p. 251.

[3] The two following lines are cited under *Smṛtiratnāvalī* by *SMP.*, p. 252 āhnika.



एवं स्नात्वा विधानेन वस्त्रं संप्रोक्ष्य वारिणा ॥ ५५ ॥

[1]शुची* वो हव्या मरुत इत्युक्त्वा द्विजसत्तमः ।

देवस्यत्वे† ति तद्वस्त्रमादाय ह्यवधूनयेत् ॥ ५६ ॥

‡ अवधूतꣳ रक्ष इति त्रिवारं मन्त्रमुच्चरेत् ।

[2]उदुत्य§मिति मन्त्रेण आदित्यं दर्शयेत्ततः ॥ ५७ ॥

¶ आवहन्तीत्युदाहृत्य तद्वस्त्रं परिधापयेत् ।

उदङ्मुखः प्राङ्मुखो वा वस्त्रधारणमाचरेत् ॥ ५८ ॥

उत्तरीयं शिरोवेष्ट्यं सूत्रं कृत्वा निवीतकम् ।

अन्तर्वस्त्रं समाच्छाद्य परिदध्यात्ततोऽम्बरम् ॥ ५९ ॥

द्वौ पादौ तु समौ कृत्वा गृहीत्वा शुद्धमम्बरम् ।

[1] Compare *SMP.*, p. 252 Āhnika where almost identical passages are cited under *Smṛtyantara* for the three lines following.

[2] आदित्यमिति म—क, ख, ग.

---

* शुची वो हव्या मरुतः शुचीनाम् । शुचिꣳ हिनोम्यध्वरꣳ शुचिभ्यः । ऋतेन सत्यमृतसाप आयन् । शुचिजन्मानश्शुचयः पावकाः । तै.ब्रा.२.प्र.८.अ.५.

† देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥
तै. सं. का. १. प्र. ३. अ. १.

‡ अवधूतꣳ रक्षोऽवधूता अरातयः ॥ तै. सं. का. १. प्र. १. अ. ६.

§ उदुत्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥
तै. सं. का. १. प्र. २. अ. ८.

¶ आवहन्ती वितन्वाना । कुर्वाणाऽचीरमात्मनः ।
वासाꣳसि मम गावश्च । अन्नपाने च सर्वदा ॥
ततो मे श्रियमावह । लोमशां पशुभिस्सह स्वाहा ॥
तै. आ. प्र. ७. अ. ४. म. १.

आच्छादयेन्मौनयुक्तो नान्यथा शुद्धिमाप्नुयात् ॥ ६० ॥
दैवासुरविभागेन कच्छद्वयमुदाहृतम् ।
पूर्वकच्छं तु दैवं स्यात् पश्चात्कच्छं तदासुरम् ॥ ६१ ॥
पुरःकच्छं पुरो धार्यं पश्चात्कच्छं ततो भवेत् ।
पश्चात्कच्छं पुरो धृत्वा सचेलस्नानमाचरेत् ॥ ६२ ॥
वस्त्रधारणकाले तु यो मोहात्पादमुद्धरेत् ।
ब्रह्महत्यासमं तस्य पापमाहुर्महर्षयः ॥ ६३ ॥
शिखायज्ञोपवीताभ्यां कटिसूत्रेण वा पुनः ।
रहितः सोऽधमो ज्ञेयः सर्वकर्मसु सर्वदा ॥ ६४ ॥
कटिसूत्रं विना यस्तु दैवं पित्र्यं करोति चेत् ।
तत्सर्वं निष्फलं विद्यात् स च नग्न इति स्मृतः ॥ ६५ ॥

([1]उपवीतम्)

[2]उपासने देशिकानां वृद्धानां पूजनेऽतिथेः ।
होमे जपक्रियायां च वैश्वदेवे तु भोजने ॥ ६६ ॥
स्वाध्यायाचामपूजासु वस्त्रं यज्ञोपवीतवत् ।
धार्यं विप्रेण विधिवत् अन्यथा कर्मनिष्फलम् ॥ ६७ ॥
शिखां बद्ध्वा ततःपादौ प्रक्षाल्याचम्य बुद्धिमान् ।

[1] (         )—घ, ङ.
[2] For *v.* 66 compare with *Āpastamba-dharma sūtra*—उपासने गुरूणां वृद्धानामातिथीनां होमे जप्यकर्मणि भोजन आचमने स्वाध्याये च यज्ञोपवीती स्यात्—(I, v, 15, 1); also the Vedic text thereon—दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतम् ।



*'ये के च' इति मन्त्रेण वस्त्रं निष्पीडयेत् स्थले ॥ ६८ ॥
'ये के चास्मत्कुले जाता अपुत्रा गोत्रजा मृताः ।
ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम्' ॥ ६९ ॥
एवं पीड्य स्नानशाटीं द्विराचम्य विशुद्ध्यति ।
पवित्रं विधिवद्धृत्वा सन्ध्यावन्दनमारभेत् ॥ ७० ॥
अपवित्रकरो यस्तु सन्ध्यावन्दनमाचरेत् ।
निष्फलं भवति क्षिप्रमिति स्मृतिविदो विदुः ॥ ७१ ॥
ब्राह्मणानां विशेषेण विश्वामित्रकुशौ स्मृतौ ।
नृपाणां मौञ्जिदर्भौ च वैश्यानामुशिरः स्मृतः ॥ ७२ ॥
शूद्राणां च तथा दूर्वा विपरीते कुलक्षयः ।

[2](पवित्रदर्भसंख्या)

देवकर्मणि दर्भौ द्वौ पित्र्ये दर्भास्त्रयः स्मृताः ॥ ७३ ॥
पौष्टिके पञ्च दर्भाः स्युः द्वौ दर्भौ नित्यकर्मणि ।
आभिचारे [3]पञ्च दर्भा आसने द्वादश स्मृताः ॥ ७४ ॥
कूर्चे षोडश दर्भाश्च प्रोक्षणे विंशतिः स्मृताः ।
ब्रह्मग्रन्थिश्च वलयं पवित्रग्रन्थिरेव च ॥ ७५ ॥
पवित्रं त्रिविधं प्रोक्तं सर्ववर्णेषु नित्यशः ।

[1] चरेत्—क, ख, ग.
[2] (       )—घ. ङ.
[3] चतुर्द—क, ख, ग, घ.

* The mantra is cited in the succeeding two lines.

आचामे ब्रह्मयज्ञे च जपे च स्नानकर्मणि ॥ ७६ ॥
देवताराधने श्राद्धे होमे देशिकपूजने ।
आतिथ्ये वैश्वदेवे च ब्रह्मग्रन्थिर्विधीयते ॥ ७७ ॥
पवित्रग्रन्थिरन्यत्र भोजने वर्तुलं भवेत् ।
अनामिकाद्वये धार्यं पवित्रं सर्वदा द्विजैः ॥ ७८ ॥
धार्यं त्वनामिकामूले पवित्रं ब्राह्मणैः सदा ।
मध्यपर्वणि राजन्यैः वैश्यैरग्रेऽङ्गुलस्य च ॥ ७९ ॥

(सन्ध्यावन्दनम्)

एवं धृत्वा पवित्रं तु ततः सन्ध्यां समाचरेत् ।
प्राङ्मुखोदङ्मुखो वाऽपि सम्यगाचम्य वाग्यतः ॥ ८० ॥
प्रातः सन्ध्यामुपासिष्ये इति संकल्प्य बुद्धिमान् ।
षट्कोणमध्ये ह्रींकारं कोणेषु प्रवणं न्यसेत् ॥ ८१ ॥
कोणाग्रेषु न्यसेच्छक्तिं प्रणवेन तु वेष्टयेत् ।
एवं केचित्प्रकुर्वन्ति मन्मतं तूच्यते पुनः ॥ ८२ ॥
षट्कोणमध्ये परिलिख्य शक्तिं
तामेव कोणेषु पुनर्विलिख्य ।
जले लिखेद्यन्त्रमिदं तु विद्वान्
मुद्रां च योनिं सुरभिं च दर्शयेत् ॥ ८३ ॥
ततोऽभिमन्त्र्य गायत्र्या त्रिवारं [1]यन्त्रमुत्तमम् ।

[1] मन्त्रमु—ख, ग, ङ.



[*]आपो वा इदꣳसर्वमिमं [†] मे गङ्ग इत्यृचा ॥ ८४ ॥
[‡]येन देवाः पवित्रेण [§]शं नो देवीरभिष्टये ।
[¶]द्रुपदादिव मन्त्रेण [‖]यत्किंचेदमृचा तथा ॥ ८५ ॥
[#]ऋतं चेति ऋचा देव्या + कितवास इति द्विजः ।
एतैर्यथाक्रमेणैव यन्त्रस्थं प्रोक्षयेज्जलम् ॥ ८६ ॥
ततो विद्वान् द्विराचम्य सन्ध्योपासनमारभेत् ।
ऋषिश्छन्दो देवताश्च बीजशक्ती च कीलकम् ॥ ८७ ॥
विनियोगं च मन्त्रादौ संस्मृत्य जपमाचरेत् ।
ऋषिं शिरसि विन्यस्य मुखे छन्दांसि विन्यसेत् ॥ ८८ ॥

[1] चरेत्—च.

---

[*] ओम् । आपो वा इदꣳ सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽन्नमापोऽमृतमापस्सम्राडापो विराडापस्स्वराडापश्छन्दाꣳस्यापो ज्योतीꣳष्यापो यजूꣳष्यापस्सत्यमापस्सर्वा देवता आपो भूर्भुवस्सुवराप ओम् ॥ तै. आ. १०. अ. २२.
[†] See page 30 foot-note. [#]
[‡] येन देवाः पवित्रेण । आत्मानं पुनते सदा ।
तेन सहस्रधारेण । पावमान्यः पुनन्तु मा ॥ तै. ब्रा. १. ४. ८. ६.
[§] शन्नो देवीरभिष्टय आपो भवन्तु पीतये ।
शं योरभिस्रवन्तु नः ॥ तै. ब्रा. १. प्र. २. अ. १.
[¶] See page 26 foot-note. [‡]
[‖] यत्किञ्चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि । अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देवरीरिषः ॥ तै. सं. का. ३. प्र. ४. अ. ११.
[#] See page 27 foot-note. ll 12-13.
+ कितवासो यद्रिरिपुर्न दीवि यद्वाघा सत्यमुत यन्न विद्म । सर्वा ता विष्य शिथिरेव देवाथा ते स्याम वरुण प्रियासः ॥ तै. सं. का. ३. प्र. ४. अ. ११.

देवतां हृदि विन्यस्य बीजं नाभ्यां तु विन्यसेत् ।
शक्तिं गुह्ये तु विन्यस्य पादयोः कीलकं न्यसेत् ॥ ८९ ॥
एवं यथावत्कृत्वा तु ध्यात्वा मन्त्रार्थमेव च ।
अनुष्ठानं ततः कुर्यादिति शास्त्रविनिर्णयः ॥ ९० ॥
आपो हि ष्ठादिमन्त्राणामृषिश्छन्दो ऽधिदेवताः ।
बीजशक्ती कीलकं च विनियोगं च तत्वतः ॥ ९१ ॥
प्रवक्ष्यामि मुनिश्रेष्ठा ब्रह्मणोक्तं पुरा मम ।
आपो हि ष्ठेति मन्त्रस्य सिन्धुद्वीप ऋषिः स्मृतः ॥ ९२ ॥
गायत्रं छन्द इत्युक्तमापो वै देवता स्मृता ।
अं बीजं च समाख्यातं [1]पं शक्तिः कीलकं तथा ॥ ९३ ॥
अमृतं प्रोक्षणे विद्वान् विनियोगं च कीर्तयेत् ।
यन्त्राभिमन्त्रितं तोयं गृहीत्वा पाणिना ततः ॥ ९४ ॥
यथावत्प्रोक्षणं कुर्यादन्यथा निष्फलं भवेत् ।
प्रतिप्रणवसंयुक्तं क्षिपेद्वारि पदे पदे ॥ ९५ ॥
विप्रुषो ऽष्टौ क्षिपेदूर्ध्वमधो यस्य क्षयाय च ।
आत्मानं प्रणवेनैव व्याहृत्या परिषेचयेत् ॥ ९६ ॥

## (मार्जनम्)

अष्टाक्षरैर्नवपदैः पदान्ते मार्जनं भवेत् ।
तन्मध्ये मार्जनं कुर्यात् ब्राह्मं तेजो विनश्यति ॥ ९७ ॥

[1] वं शक्तिः—घ, ङ, छ.



नवषट् च तथा तिस्र एकश्चैव यथाक्रमम् ।
एकोनविंशत्प्रोक्षं स्यात् महापातकनाशनम् ॥ ९८ ॥

---

१. ओम् आपो हि ष्ठा मयोभुवः । शिरसि मार्जनं कुर्यात्
२. ,, ता न ऊर्जे दधातन । ,,
३. ,, महे रणाय चक्षसे । ,,
४. ,, यो वश्शिवतमो रसः । ,,
५. ,, तस्य भाजयतेह नः । ,,
६. ,, उशतीरिव मातरः । ,,
७. ,, तस्मा अरं गमाम वः । ,,
८. ,, यस्य क्षयाय जिन्वथ । ,,
९. ,, आपो जनयथा च नः । ,,
१०. ,, आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । शिरसि मार्जनं कुर्यात्
११. ,, महेरणाय चक्षसे ,,
१२. ,, यो व श्शिवतमो रसस्तस्य भाजयतेह नः ,,
१३. ,, उशतीरिव मातरः ,,
१४. ,, तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ ,,
१५. ,, आपो जनयथा च नः ,,
१६. ,, आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन । महे रणाय चक्षसे शिरसि मार्जनम् ।
१७. ,, यो वश्शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः शिरसि मार्जनम् ।
१८. ,, तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः शिरसि मार्जनम् ।
१९. ,, आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन । महे रणाय चक्षसे
,, यो व श्शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः
,, तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः

एवं एकोनविंशवारं (१९) मार्जनं कुर्यात् ॥

आपो हि ष्ठादिभिर्मन्त्रैः दर्भपाणिस्तु मार्जयेत् ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥ ९९ ॥
सौवर्णेन पवित्रेण ह्यापो हि ष्ठादिमन्त्रतः ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥ १०० ॥
नवभिर्मुच्यते पापैः नवभिः प्रोक्षणं द्विजः ।
पादादौ प्रवणं कुर्यादर्धर्चादौ तथैव च ॥ १०१ ॥
ऋगादौ प्रणवं कुर्यात् त्रिचादावपि तु क्रमात् ।
एकोनविंशत्प्रणवैरब्देवत्यत्रिचा पुनः ॥ १०२ ॥
संवत्सरकृतं पापं मार्जनान्ते विनश्यति ।
एवं संप्रोक्ष्य विधिवत् सूर्यश्चेति जलं पिबेत् ॥ १०३ ॥
*सूर्यश्चेत्यनुवाकस्य ऋषिरग्निरिति स्मृतः ।
छन्दो गायत्रमित्युक्तं देवता सूर्य एव तु ॥ १०४ ॥
विनियोगः प्राशनेऽपामित्युक्त्वा कं पिबेद्द्विजः ।
सूर्यश्चेत्यनुवाकेन मन्त्रितं यत्पिबेज्जलम् ॥ १०५ ॥
अन्तर्गतमघं शुद्ध्येदिति वेदानुशासनम् ।
पाणिभ्यां जलमादाय सूर्यश्चेत्यभिमन्त्रितम् ॥ १०६ ॥
तत्पिबेद्ब्रह्मतीर्थेन दक्षिणेन करेण तु ।

---

* सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः । पापेभ्यो रक्षन्ताम् । यद्रात्रिया पापमकार्षम् । मनसा वाचा हस्ताभ्यां । पद्भ्यामुदरेण शिश्ना । रात्रिस्तदवलुम्पतु । यत्किञ्च दुरितं मयि । इदमहं माममृतयोनौ । सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ तै. आ. १०. अ. २९.



दृश्यन्ते च शुभा दूर्वाः १७८. वं. 517
दृष्ट्वा तु मृतकं देवि १४४. व. पु.

दे

देवकार्यं ततः कृत्वा ७०, १२६. द. स्मृ. 2-26
देवकार्यस्य सर्वस्य ७०. द. स्मृ. 2-26
देवकार्याणि पूर्वाह्णे ७०. द. स्मृ. 2-27
देवताप्रतिमां दृष्ट्वा १४१.
देवताभ्यर्चनं चैव ६५. म.
देवतारूपमात्मानं ८६
देवदेव जगन्नाथ ११८. व. पु. 45
देवमिवाचार्यं ९४. आप. ध. 1-6-13
देवादीनां नमस्कुर्यात् ६०, ६१. व्या. स्मृ. 3-5
देवादीन् सलिले तिष्ठन् १११. पा. सं. (च) 13-26
देवानृषीन् पितॄन् ६३. नि. रा.
देवान् ब्रह्मऋषींश्चैव ६३. व्या. स्मृ. 2-37
देवाय देवीयुक्ताय १५६. वं. 486
देवोत्सवाद्यसेवा च १२२
देव्यः श्रियादयश्चापि १०. पा. सं. (च) 19-113
देशं कालं तथा ज्ञानं ९९. बो. स्मृ.
देशिकस्याभिजातस्य १८. पार. सं. 19-579

दो

दोषाय कल्पते राज ११. पा. सं. (च) 19-125

द्र

द्रव्याण्याराधनार्थानि ५४, १२७. ना. मु.
द्रष्टुमिच्छामि ते रूपं १६५. भ. गी. 11-3

द्व

द्वयमर्थानुसन्धानेन ५७. श. ग.
द्वयेन तद्विवरणैः ५४, ५६, १२५. ना. मु.
द्वात्रिंशदपराधांस्तु १४३. व. पु.
द्वादशं चापराधं तु १४४. व. पु.
द्वादशाक्षरतत्त्वज्ञः ५२. म. भा. (आश्व.) 118-83
द्वादशाक्षरनिष्ठो यः ५२. शा. सं.
द्वादशाङ्गुलमात्रं तु १०१. पार. सं. 2-60
द्वारपालाननुज्ञाप्य १२५. ना. मु.
द्वाराङ्गश्रुतिदेवानाम् १७. पार. सं. (प्र.)
द्वाविंशमपराधं तं १४५. व. पु.
द्वितीयमपराधं तु १४३. व. पु.
द्वितीया च तृतीया च ९९. पार. सं. 2-46
द्वितीये च तृतीये च ६९. द. स्मृ. 2-5
द्वितीये तु तथाभागे ७१. द. स्मृ. 2-30
द्वित्र्यादिमुखभेदा वा ११. पा. सं (च) 19-121
द्विषडष्टषडर्णादि १५२. ना. मु.

ध

धर्ममर्थं च चिन्तयेत् ६२, व्या. स्मृ. 1-2
धर्माविरुद्धो भूतेषु ९२. भ. गी. 7-11

धू

धूपावसानिकैर्भोगैः ८६.

धृ

धृतोर्ध्वपुण्ड्रो देवर्षि १११. वं. 73
धृत्या यया धारयते ९१. भ. गी. 18-33

ध्या

ध्यातृध्येयाविभागेन ८५. सा. सं. 6-213
ध्यात्वा तु मनसा देवं ६६. व्या. स्मृ. 2-76
ध्यानयोगेन दृष्ट्वा १६१. वै. ग.
ध्यानानां चैव मुद्राणां पार. सं. (प्र.)
ध्यायते ऽर्च्यते योऽन्यं १४१. क.
ध्यायन् कृते जपन् यज्ञैः १६९. वि. पु. 6-2-17
ध्यायन् जप्त्वोपतिष्ठेत ११२. ना. मु.
ध्यायन्नपि परं देवं ५३, ९१. वं 35
ध्यायन्नारायणं देवं १२४. वं. 82
ध्यायीत मनसेश्वरं ६१. व्या. स्मृ. 1-2
ध्यायेन्नारायणं देवं. ७१ द. स्मृ. 2-14
ध्येयो नारायणः सदा १६८. म. भा. (आनु) 186-11

न

न कदाचिदपि प्राज्ञः १९. ३४. का.
न कुर्याच्छास्त्रसांकर्यं ४१. पार. सं. 10-377
न कुर्यात्तन्त्रसाङ्कर्यं १८. पार. सं. (प्रा.) 19-557
नखरोमाणि यश्चैव ११९. व. पु. 45
नगरप्रवेशनानि च वर्जयेत् ६२
न गृहे करवीरोत्थैः १२८. सा. सं. 21-30
न च कर्तुः करणं २. शा. मी. 2-2-40
न च क्रमण च हसन् १०७. व्या. स्मृ.
न चान्यवस्त्रमाच्छाद्य १०४. म. 4-129
न चेद्रहस्यमत्यन्तं ५०. पा. सं (च) 13-2
न तु तत्पुत्रतद्भृत्य ५. सं सि. 21
न तु द्रव्यान्तरं चैव १७. पार. सं. (प्र)
न तेभ्यो विद्यते तीर्थं १०४. इ. स. 25-20
ननु देव त्वमेवैकः १५७. वं. 495
न पदा पद्माक्रम्य १०७. म. भा. (आश्व) 98
न पूर्वाह्णमध्यन्दिन ९२. गौ. ध. 1-9-46
नमस्कारं न कुर्वीत १४१
नमस्कारार्चनादीनि १४१. अ.
नमस्कुर्यात् प्रभाते तु ९६. पार. .सं. 2-14
नमस्ते चेतनाधार १५३. वं. 469
नमस्ते पञ्चकालज्ञ ५१. जितंते. 32
नमस्ते पद्मनाभाय ९५. पार. सं. 2-10
नमस्ते मन्त्रराजाय १५३. वं. 459
नमस्ते मीनरूपाय ९१. पार. सं. 2-11
नमस्त्रिविक्रमायाथ ९५. पार. सं. 2-9
नमः क्षितिधरायोक्त्वा ९६. पार. सं. 2-17
नमो नमः केशवाय ९५. पार. सं. 2-7
नमो वामनरूपाय ९५. पार. सं. 2-12
नमोऽस्तु प्रियदत्तायै ९७. (मन्त्र.)
नमो ऽस्त्वादिवराहाय ९५. पार. सं. 2-12
न यानपादुकारूढः ११४. सा. सं. 21-13
नयेत्त्रियमत्युग्रं १५. पार. सं. (च) 21-77



नरो नारायणश्चैव ८८. म. भा. (शा.) 342-9
न लक्षणान्तरं कुर्यात् १७. पार. सं. (प्र.)
नवमं चापराधं तु १४४. व. पु.
नवाग्रं ये तु व्रीहीणां १४६. व. पु.
नवानामपि मूर्तीनां १०. पा. सं. (च.) 19-177
न विक्षिप्तमना भूत्वा ११४. सा. सं. 21-14
न विष्ण्वाराधनात् पुण्यं ४९, ६१, ६४, १७३ व्या. स्मृ. 2-42
न शब्दशास्त्राभिरतस्य मोक्षः १४९. आप. स्मृ. 10-6
न शास्त्रार्थस्य शास्त्राणां ५. सा. सं. 21-47
न शौरिचिन्ताविमुख ७५. वि. ध.
न सन्निधानं च हरेः १६. पा. सं. (च.) 21-79
न स्नानमाचरेद्भुक्त्वा १०४. म. 4-129
न स्पृशेन्मामनादृत्य १४१
न हि कल्याणकृत् कश्चित् १७३, भ. गी. 6-40
न हि निन्दा निन्द्यं २५
न हेतुवादाल्लोभाद्वा ७७. म. भा.

ना

नाथयामुनपूर्णादि ८०. पा. र.
नानर्थो न च नैष्फल्यं १७७, वं. 506
नानाव्यूहसमेतं च-६. पौ. सं. 38-295
नानाशयवशेनैव ७. पौ. सं 38-304
नानिवेद्य हरेः किंचित् १५०. भारद्वाज-संहिता (8 अधिकार.)
नान्तरा भोजनं कुर्यात् १५०
नान्यं देवं नमस्कुर्यात् ६४. बा.
नान्यो विमुक्तये पन्थाः ६८. व्या. स्मृ. 2-
नापरः कुलवृत्तादि १७७. वं. 509
नामद्वयं वा सिद्धान्त ७. पौ. सं. 38-303
नाम्नां संकीर्तनं कुर्यात् ९५. पार. सं. 2-5
नारायणं परं ब्रह्म १५४. वं. 465
नारायणात्मकान् देवान् ११२. ना. मु.
नारायणीयमौदध्य ३२. का.
नाविरतो दुश्चरितात् १४२. श्रु.
नाशौचं कीर्तने तस्य १६८. क. व. 2-24
नास्तिक्यादथवालस्यात् ६८. व्या. स्मृ. 2-
नास्ति संगतिरस्माकं ७४
नाहंकाराच्च संरम्भात् ७७. म. भा.

नि

निक्षिपन् जीवितमिव १५७. वं. 491
निक्षिप्य चिरमात्मानं ५४, ५६, १२५. ना. मु.
निखिलं चाप्यधीकुर्यात् ८५. सा. सं. 6-211
निग्रहानुग्रहौ चैव १२२
निजकर्मादिभक्त्यन्तं ८०. गी. सं. 31
नित्यनिर्दोषनिस्सीम १७८. वं. 521
नित्यनैमित्तिकैः काम्यैः ११२. वं. 76
नित्यनैमित्तिकैर्युक्तैः ६९. द. स्मृ. 2-2
नित्यमाराधयेद्धरिं ६५. व्या. स्मृ. 2-42

नित्यं भगवतः पूजां १७५. अ. ब्र. (ना.) 2-42
नित्यं राष्ट्रभयं कुर्यात् १७५
नित्यं विष्ण्वर्चनं परं १७३. शौ. सू. 1-2-21
निदध्यात् स्वं च कर्तृत्वं १५५. वं. 473
निधित्सन्निव चक्षुः स्वं १५७. वं 491
नियोजयेत्ततो विप्रः १००. पार. सं. 2-48
निरञ्जनः परमं साम्यं ८५. मु. 3-1-3
निरुध्य स्वं चित्तं १६२, पा. र.
निर्गन्तुकामो निक्षिप्य १५६. वं. 488
निर्दोषतां प्रयान्त्याशु १२९. सा.सं.21-33
निर्भयः सर्वभूतेभ्यः १५५. वं. 471
निर्मलानन्तविज्ञान १७९, वं. 522
निर्वाहः क्रियते तद्वत् ३. श्री. कृ.
निवेदयीत स्वात्मानं ६४. व्या. स्मृ. 2-45
निवेदितस्य यद्दानं ४९. ज. सं. 22-78
निषेकादींश्च संस्कारान् २१.
निषेधाविषयीभावात् १४२, १७८. वं. 513
निष्ठीवनकरो यस्तु ११९. व. पु. 45
निष्फला च क्रिया तस्य १५. पा. सं. (च.) 21-78

नी

नीरखोपादानसमयं १३०. पा. सं. (च.) 13-34

नृ

नृणां नरपतेश्चापि १६. पा. सं. (च.) 17-32
नृसिंहकपिलक्रोड १२. पार. सं. (प्रा.) 19-576

ने

नेदंविदनिदंविदा ७५. ब. आ.
नेह कालक्रियाकर्तृ १७८. वं. 512

नै

नैवाधिकारिणो गौणाः ४६. पा. सं (च.) 1-9
नैवाभ्यां सदृशो मन्त्रः ६४. व्या. स्मृ. 2-44
नैवेद्यहीने दुर्भिक्षं १७५

न्य

न्यग्रोधोदुम्बराश्वत्थ १०२. पा. सं. (च.) 13-17
न्यस्य कर्तृत्वभोक्तृत्वे ११२. वं. 76
न्याय्यस्तस्य करछेदः ११५. श्री. भा. 10-22-22
न्यासेन वेदमन्त्राणां ८६

प

पञ्चकालविधिज्ञानां ५०. पा. सं. (च.) 13-1
पञ्चकालव्यवस्थित्यै ४४. पा. र.
पञ्चकालास्त्वयोद्दिष्टाः ४७. ज. सं. 22-65
पञ्चकालैकमनसां ५१. (खिलन्ते) 33
पञ्चदशापराधं तं १४५. व. पु.
पञ्चमं त्वपराधं च १४४. व. पु.



पञ्चमे तु तथा भागे ७३. द. स्मृ. 2-46
पञ्चमो योगसंज्ञोऽसौ ४८. ज. सं. 22-74
पञ्च वामकरे देयाः ९९. पार. सं. 2-44
पञ्चरात्रमहाम्भोधि १. पा. र.
पञ्चरात्रस्य कृत्स्नस्य ४३, म. भा. (शा.) 359-68
पञ्चरात्रस्य कृत्स्नस्य प्रसूतिं १. पा. र.
पञ्चरात्रोदितान् वापि २१, ७७
पञ्चविंशापराधं तं १४६, वं. पु.
पञ्चापाने मृत्तिकाः स्युः १००. पार. सं. 2-47
पञ्चैते विधयस्तेषां ५०. पा. सं. (च.) 13-4
पत्युरसामञ्जस्यात् २७. शा. मी. 2-2-35
पत्रं पुष्पं फलं तोयं १७४, भ. गी. 9-26 श्रीभाग 10-81-4
पत्रेक्षितो वा व्यर्थः स्यात् ९३. पा. सं. (.च) 23-81
173. Now if this causality is the nature of a positive thing, like black colour, then it will be common to all. Indeed black colour is nothing other than black colour in respect of certain things. If it is brought about by adjuncts, then in the case of the adjunct also being its own nature, there is occasion for its being so (*i.e.*, common to all). In the case of that (too) being brought about by adjuncts, there is infinite regression.

174. If the not being common is also only its nature, then it shall produce commencing from its generation, since what is persistent has the same nature. If this be said, this is the reply.

**175. Without paying heed to the potency of the cause, even black colour etc. are not existent things. What is associated with it has potency in respect of it there. Hence why cannot it be common?**

176. By one who explains the fanciful nature of the relation of cause and effect, in contrast with black colour etc., which are common to all, black colour etc. have to be accepted even as real; because otherwise the unreality of the relation of cause and effect, in contrast with that, is not reasonable. And in the event of the relation of cause and effect being unreal, black colour etc. do not deserve to be real, because that will

# ॥ भूमिका ॥

श्रीमन्निगमान्तमहादेशिकैः प्रणीतेषु प्राज्ञैः प्रशंसनीयेषु शताधिकेषु ग्रन्थेषु प्रायः पञ्चषा एव परिष्कृतया रीत्या मुद्रणमधिगत्य सहृदयानामाधुनिकानां दृष्टिपथं रञ्जयन्तीति जानन्त्येव वहवस्तद्ग्रन्थश्रद्धालवः । वैष्णवानाम्, विशिष्य शुद्धसात्त्वतसम्प्रदायमार्गमार्गणपराणाम् उपजीव्यतया विद्यमानान् पाञ्चकालिकधर्ममर्मपरामर्शपरान् विषयान् अशेषानप्यधिकृत्य निगमान्तगुरुणा निबद्धोऽयं श्रीपाञ्चरात्ररक्षाग्रन्थः सपरिष्कारं नैवासीत् नागराक्षरैरेतावता संमुद्रितः । अवैमश्च वयम्, यदेष त्रिवारं ग्रन्थाक्षरैः, सकृदान्ध्रलिपिभिः[1], अनन्तरम् उत्तरापथे नातिचिदेव नागराक्षरैश्च[2] मुद्रितोऽभवत् कोश इति; परं तु तथा मुद्रिताः कोशाः सर्वेऽपि ते किञ्चिदुच्चावचतया परस्परं सौभ्रात्रम् अपभ्रंशसंवलितत्वे सुतरामावहन्तीति सावहिति तेषां पठनात् कृतमतयः प्रभवन्त्यवगन्तुम् । कतमं मातृकाग्रन्थमवलम्ब्य, कति च मातृकाकोशान् संनिरीक्ष्य ग्रन्थास्ते समभवन् मुद्रिता इति ग्रन्थप्रकाशकैः किमपि नैवास्ति तेषु सूचितम् । किन्तु सन्त्युपपत्तयः संभावयितुम् एतत्, यदुत विस्रम्भणीयमातृकाकोशानुरोधेन ग्रन्थस्य परिष्करणे वा, मुद्रणदोषाणां परिहरणपुरस्सरं पुस्तकस्य संस्करणे वा, पठितॄणां विशिष्यानुकूल्याभिवृद्धये विषयविभजनानि विधाय मुद्रणसौष्ठवादीनां

[1] भूमिकान्तेऽस्माभिरुपयुक्तानां ग्रन्थानामेतेषां कोशान्तराणां च विवरणं दृश्यताम् ।

[2] धरणीधरशास्त्री, श्रीधराचार्य इति द्वाभ्यां बृन्दावनक्षेत्रे कोशोऽयं मुद्रितः ।

संविधाने वा तैः प्रकाशकैः किञ्चिदपि नैवासीत् आदृतः परिश्रम इति । अतस्तदिदमखिलं समालोचितवद्भिरस्माभिः कोशस्यैवंरीतिकस्यास्य मुद्रणे चाविष्करणे चायमङ्गीकृतः समुद्यमः ।

श्रीपाञ्चरात्ररक्षाया अस्याभिनवमुद्रणकर्मण उपक्रमात् पूर्वं विभिन्नेषु कालेषु विभिन्नैर्व्यक्तिभिर्विलिखितानां विविधानां चिरन्तनानां मातृका-कोशानाम् उपद्वादशानां पठनपरामर्शद्वारा लेखकप्रमादजनितदोषपरिहाराय, पाठभेदानां परिशीलनपुरस्सरं संयोजनाय, संस्कारान्तराणां विविधानां साधु निर्वहणाय च यथाशक्त्यस्माभिरादृतः परिश्रमः । अस्माभिरेवं संस्करणायोप-युक्तेषु पुरातनेषु कोशेषु ख संज्ञिते कोश एवान्ततस्तल्लेखनकालः सम्यगस्ति विलिखितः[1] । श्रीपाञ्चरात्ररक्षाया मुद्रणोद्यतेन केनचित्, अन्येन वा परिशीलकेन अस्मदुपलब्धेषु कोशेषु अतीव प्राचीनौ घ ङ संज्ञितौ कोशौ द्वावपि न ह्येतावता स्यातां पठितचराविति वक्तुमुपपद्यते; यतस्तयोर्दृश्य-मानाः सुबहवो विवेचकैरादरणीयाः पाठक्रमादयो न हि मुद्रितचरेषु कोशेषु क्वचिदप्युपलभ्यन्ते । अस्माभिः घ संज्ञितस्य कोशस्य पाठरीतिरेव कोशान्तरीयपाठेभ्योऽपि प्रशस्तेति समालोच्य सैवास्य ग्रन्थस्य नवीनमुद्रणे विश्वसनीयत्वेन बहुषु स्थलेष्वङ्गचकारि ।

अथास्य ग्रन्थविषयस्य किञ्चिदिव परामर्शाय प्रयतामहे । किमिदं पाञ्चरात्रशास्त्रं नाम? कुत इदं प्रवृत्तम्? क एतस्य कर्ता प्रवर्तको वा? इति बहवः पृच्छन्ति । पञ्चकालपरायणाः पावनचरिता भागवताः पाञ्च-रात्रशास्त्रप्रतिपादितान् विधीन् अनुरुध्यैव वैदिकानि वैष्णवसम्प्रदायमूल-भूतानि नित्यकृत्यानि निर्वर्तयन्तीति नूनमिदं न बहूनां विदितम् । अतः किञ्चिद्विवरणमपेक्षते विषयोऽयम् । पाञ्चरात्राह्वयस्य शास्त्रस्य प्रथमरचयिता

[1] दृश्यताम् अनन्तरं भूमिकायां विषयस्यैतस्य विवरणम् ।



चोपदेष्टा च श्रीमन्नारायण एवेति नैकधा लिखितपठितमेव प्राक्तनैः परमर्षिभिः परमाचार्यैश्चेदं वस्तुतत्त्वम् । भगवता प्रणीतमिति भगवत्सेवा-प्रकारप्रतिपादकमिति च हेतुद्वयेन पाञ्चरात्रमिदं भगवच्छास्त्रमिति नाम्ना च तदभिज्ञैरभिधीयते[1] । एतादृशशास्त्रपथेषु अक्षुण्णमतिभिरपि श्रीवैष्णवैः सामान्यतः स्तोत्रपाठप्रसङ्गेन यतिराजसप्ततिप्रभृतिषु स्तोत्रजालेषु परि-शील्यमानेषु "प्रवक्ता छन्दसां वक्ता पञ्चरात्रस्य यः स्वयम्" इत्यादिभिः प्रयोगैः पञ्चरात्रमिति श्रुतिसदृशं सात्त्वतजनानाम् असदृशं शास्त्रं किमपि विद्यत इति, तस्य च भगवान् आदिमो गुरुः श्रियःपतिरेव स्वयं रचयितेति च शक्यमवगन्तुम् ।[2]

किन्तु नेदमुपलभ्यमानैर्विषयांशैः सुशकं सुव्यक्तं निर्णेतुम्, यदुत सम्प्रदाय एष कदा वा प्रवृत्तिमुपलेभ इति, देशस्यास्य कतमस्मिन् वा भागे प्रथमप्रचारश्चास्य प्राक् समुपनत इति च । भगवता नारायणेन भक्त्युपनताय नारदाय प्रथमतः शास्त्रमिदं समभवदुपदिष्टमिति, तस्माच्च महर्षिपरम्परया महीतले तदिदमुपदेशद्वारा प्रचारमध्यगच्छदिति च पारम्परि-कैतिहासिकविषयविश्वस्तैः साम्प्रदायिकैर्विभाव्यते । तदेतस्य चावष्टम्भनाय

[1] "प्राप्यस्य ब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः ।
प्राप्त्युपायं फलं प्राप्तेस्तथा प्राप्तिविरोधि च ॥
वदन्ति सकला वेदाः सेतिहासपुराणकाः ॥"

इत्यर्थपञ्चकविवरणरूपं परमपुरुषार्थसाधकं सात्त्विकं शास्त्रं भगवान् वासुदेवः स्वयं प्रणीतवानिति, भगवता प्रोक्तत्वात् भगवच्छास्त्रमिति यदिदमस्माभिरुच्यते तदेतत् श्रीरहस्यत्रयसारे अर्थ-पञ्चकाधिकारे श्रीनिगमान्तगुरुप्रतिपादितप्रमाणमूलकमिति च ज्ञातव्यम् । किञ्च तत्रैव "இவ்விக்ரஹம் பர வ்யூஹ விபவ ஹார்தார்ச்சாவதார ரூபேண பஞ்ச ப்ரகாரமா யிருக்கும்படியும் இவற்றிலுள்ள விசேஷங்களும் பகவச் சாஸ்த்ர ஸம்பிரதாயத்தாலே யறியப்படும்" इति च भगवच्छास्त्रत्वमस्य निर्दिष्टम् ।

[2] "वेदान्तेषु यथासारं संगृह्य भगवान् हरिः" इति, "सर्ववेदान्तसारोद्धारेण सर्व-जनहितैषिणा भगवता स्वयमेव प्रणीतं श्रीमत्पाञ्चरात्रशास्त्रं" इति च शास्त्रस्यास्य भगवत्प्र-णीतत्वं वेदान्तसारमयत्वं च निगमान्तगुरुणैव निरूपितमास्ते । (दृश्यतां पुटः २३).

" इदं महोपनिषदं चतुर्वेदसमन्वितम् ।
साङ्ख्ययोगकृतान्तेन पञ्चरात्रानुशब्दितम् ॥
नारायणमुखोद्गीर्णं नारदोऽश्रावयत् पुरा: ।"

इत्येतन्महाभारतवचनमपि (शान्तिपर्व-३४८-६२,६३) प्रमाणयन्ति प्राञ्चो विदितवेदितव्याः श्रीवैष्णवाचार्याः । पञ्चरात्रशास्त्रस्य भगवच्छास्त्रमिति पूर्वम् अन्यदपि नाम व्यवहारे विद्यत इति निर्दिष्टम्[1] । तथा भगवदुपदिष्टमिदं शास्त्रं 'सात्त्वतशास्त्रम्' इति संज्ञान्तरमप्यावहति । तस्यैतस्य संज्ञान्तरस्य ईश्वरसंहितादिषु प्रयोगः परिदृश्यते[2] । अत एव च शास्त्रमिदमवलम्ब्य ये धर्मान् अनुतिष्ठन्ति ते पाञ्चरात्रिका इति, भागवता इति, सात्त्वता इति च साम्प्रदायिकैरभिधीयन्ते । पाञ्चरात्रिकेण विधिना ये वासुदेवमाराधयन्ति ते वासुदेवनाम्ना, एकान्तिकनाम्ना (परमैकान्तिनः), सूरिनाम्ना च सद्भिराहूयन्ते[3] ।

इदमप्यभिधीयते, यत् पाञ्चरात्रमिदं श्रुतिमूलकमिति, विशिष्य चैकायनश्रुत्युपबृंहकमिति च । एकायनमिति नामेदं छान्दोग्योपनिषदि "ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमथर्वणवेदं चतुर्थम्, इतिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाको वाक्यम् एकायनम् . . . . ." इति (६, १-२ ; ६, १-४) दृश्यते निर्दिष्टम् ।

[1] "भगवच्छास्त्रस्य सार्वभौमं प्रामाण्यं" इत्यादिभिः बहुषु स्थलेषु भगवच्छास्त्रमित्येव शास्त्रमिदं निगमान्तगुरुणा निर्दिश्यते ।

[2] "एतेषां सात्त्वतं शास्त्रमुपदेष्टुं त्वमर्हसि ।
इत्युक्त्वान्तर्दधे श्रीमान् नारायणमुनिस्तदा ।
सात्त्वतं विधिमास्थाय गीतः सङ्कर्षणेन यः ।" (ईश्वर. 1-10).

[3] वासुदेवाश्च सात्त्वतैः । (श्रीविष्णुपुराणे ५–१६, १७)
"सूरिः सुहृद्भागवतः सात्त्वतः पञ्चकालवित् ।
एकान्तिकस्तन्मयश्च पाञ्चरात्रिक इत्यपि" । (पाद्मसंहिता ४–२, ८८)



इदम् उपनिषद्वाक्यं तु वेदशाखाभिः सह श्रुतिश्चैकायनाख्या स्वात्मना कथमधीतेति सनत्कुमाराय नारदेन कथितां कामपि कथाम् अभिव्यनक्ति । अतश्चानुमीयते, यत् वैदिकजनबहुमतः प्रमाणतो वेदसमानधर्मा पञ्चरात्राह्वयः प्राक् परमपुरुषोपदिष्टः शिष्टजनोज्जीवनहेतुः अस्त्यनुवर्तमानः कालाद्बहोरेष आगम इति । श्रीनिगमान्तगुरुभिरपि "श्रुतिमूलमिदं तन्त्रं प्रमाणं कल्पसूत्रवत्" इति श्रुतिमूलकत्वमस्य शास्त्रस्य प्रमाणान्तरोल्लेखेन प्रतिपाद्य, "इत्यादिवचनं तु त्रय्यन्तमूलतया एकायनश्रुतिमूलतया च योज्यम्" इति विवरणेन एकायनश्रुतिरप्यस्य मूलमिति निरूपितमास्ते न्यायपरिशुद्धौ शब्दाध्याये[1] । स्पन्दप्रदीपिकानाम्नि पञ्चरात्रागमग्रन्थे "पाञ्चरात्रश्रुतावपि—यद्वत् सोपानेन प्रासादमारुहेत् प्लवेन वा नदीं तरेत् तद्वच्छास्त्रेण हि भगवान् शास्त्रावगन्तव्यः" इति, "पाञ्चरात्रोपनिषदि च—ज्ञाता च ज्ञेयं च वक्ता च वाच्यं च भोक्ता च भोज्यं च" इति च[2] यां पाञ्चरात्रश्रुतिं पाञ्चरात्रोपनिषदं च भट्टोत्पल इति ख्यातः उत्पलाचार्यः (उत्पलवैष्णव इति श्रेडर् महाशयः) स्वयमुदाहरति ते च द्वे शाखामेकायनाख्यामेव विनिर्दिशत इत्यभिप्रयन्ति विमर्शकाः । उत्पलाचार्येण स्वप्रबन्धे समुद्धृतानि तादृशानि वचनानि यदि यथावद्विमृश्यन्ते, तर्हि तदनुरोधेन पाञ्चरात्रश्रुतिः, पाञ्चरात्रोपनिषत्, पाञ्चरात्रसंहिता चेति पाञ्चरात्रशास्त्रमिदं त्रिधा विभज्य व्यवहृतमिति निर्णेतव्यमस्ति । भगवद्यामुनार्यजीवितकालस्य प्रायः सप्ततिसंवत्सरेभ्यः प्राक् दशम्यां क्रैस्तवशताब्द्याम् उत्तरापथे प्राप्तप्रथस्य उत्पलाचार्यस्य कालेऽपि पञ्चरात्रागमः श्रुतिरूपेण प्राप्तप्रचारः समभवदिति, प्रायेण विषयांश एष एव

[1] ऋगादिभेदेन वेदशाखाविभजनात् प्राक् विद्यमाना एकायनशाखैव मूलवेद इति, गृह्यसूत्रमपि किञ्चित् तत्प्रयुक्तकर्मप्रतिपादकमिति, मूलवेदे त्रय्यन्ते च प्रतिपादितांशानाम् उपबृंहणायैव भगवता पञ्चरात्रशास्त्रं स्वयं प्रणीतमिति च निगमान्तगुरवोऽभिप्रयन्ति ।

[2] दृश्यतां विजयनगरसंस्कृतग्रन्थावली. (पुटौ 2, 40)

पाञ्चरात्रसंहितासु प्राक्तनैर्ग्रन्थकर्तृभिः एकायनशाखात्वेन निर्दिश्यत इति च संभाव्यते । "स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुमपश्यत्" इति पञ्चरात्रयज्ञस्य शतपथब्राह्मणे (१३-६-१) पठ्यमानत्वात्, पञ्चरात्रमिति प्रथितं शास्त्रमिदं महाभारतकालादपि चिरन्तनं स्यादिति, तच्छास्त्रस्य पुनर्नवीकरणाय लोके परितः प्रवर्तनाय च सात्त्वत-जयाख्य-पौष्कर-पाद्मादयः सुबहवः संहिताग्रन्थाः कालेन प्राक् प्रादुरभवन्निति च विमर्शनपरा विद्वांसो विविधा उपपत्तीरुपपादयन्ति । इदं च शतपथब्राह्मणे परिदृश्यमानं पञ्चरात्रशब्दसंवलितं वचनमेव तादृशशास्त्रसंज्ञासूचनविषये प्राचीनतममिति प्रतिभाति ।

एवम् उत्तरापथे शरदां सहस्रस्य प्राक् काश्मीरेषु तदुपान्तेषु चोत्पलवैष्णवप्रभृतिभिः[1] पाञ्चरात्रशास्त्रं प्रचारमध्यगच्छत् इत्यवगम्यते । अनन्तरं च दक्षिणभारते क्षैण्यं तस्य शास्त्रस्य विपक्षवादिनां विवृद्धिं च विलोकितवता श्रीयामुनार्येण पाञ्चरात्रस्य प्रामाण्यस्थापनाय आगमप्रामाण्याभिधः प्रौढो ग्रन्थः प्रणीत इति, श्रीभाष्यकारैः श्रीभाष्यस्य पाञ्चारात्राधिकरणे स एव विषयः प्रपञ्चितोऽनन्तरमिति च विदितमेव विश्वेषां वैष्णवसाम्प्रदायिकानाम् । सत्यप्येवं परस्तात् पुनरपि हायनशतकैः त्रिचतुरैः हानिमस्य शास्त्रस्य आपातमतिप्रसरकलुषितात् स्वपक्षात् परपक्षादपि महतीं समुपनतां प्रतीक्षितवता निपुणमतिना निगमान्तगुरुणा निश्शेषतः श्रुति-स्मृति-पुराणेतिहाससम्बन्धिनां प्रमाणग्रन्थानां विमर्शपूर्वकं तत्तद्ग्रन्थेभ्यः प्रमाणानि शतशश्चोदाहृत्य, तस्यैतस्य शास्त्रस्य स्थूणानिखनन्यायेन वैदिकजनपरिग्राह्यत्वस्थापनार्थम्, सामयिकानां बहूनामपरेषामत्र विश्वासोपजननार्थम्, वैदिकैः विशिष्य श्रीवैष्णवैः प्रत्यहम् अनुष्ठेयानां पाञ्चकालिकप्रक्रियाणां परिस्फुटतया प्रदर्शनार्थं च श्रीपाञ्चरात्ररक्षाभिधः प्रबन्ध एष प्रणीतः । इममाशयमेव ग्रन्थस्योपसंहारे स्वयं

[1] एष चोत्पलः शैवमार्गमपरवयसि स्वयमवालम्बतेति श्रूयते ।



"विदितनिगमसीम्ना वेङ्कटेशेन तत्त-
दुहुसमयसमक्षं बद्धजैत्रध्वजेन ।
प्रतिपदमवधानं पुष्यतां सात्त्वतानां
परिषदि विहितेयं पञ्चकालस्य रक्षा ॥"

इति पद्येन विशदयति श्रीमान् वेङ्कटनाथः[1] । भगवद्रामानुजमुनिभिः अनुगृहीतस्य नित्यग्रन्थस्य निश्शेषतो विवरणम्, तत्रानाविष्कृतानां श्रीभाष्यकार-तच्छिष्यवर्गाणाम् अभिमतत्वेन निगमान्तार्येण निर्णीतानां च पाञ्चकालिककृत्यानां[2] प्रपञ्चनं च ग्रन्थस्यास्यापरो निबन्धनोद्देश इति च निश्चीयते । अस्य ग्रन्थस्यावतरणे हेत्वन्तराणि चाग्रतो दृश्यन्ताम् ।

एतदागमावलम्बिनः पण्डिताः पाञ्चरात्रशब्दस्य नैकविधानि निर्वचनानि निर्दिशन्ति । तत्र चेमानि कानिचन प्रधानानि प्रमाणवचनानि—

(१) रात्रयो गोचराः पञ्च शब्दादिविषयात्मिकाः ।
महाभूतात्मका वात्र पञ्चरात्रमिदं ततः ॥
अवाप्य तु परं तेजो यत्रैताः पञ्च रात्रयः ।
नश्यन्ति पञ्चरात्रं तत् सर्वाज्ञानविनाशनम् ॥ (विष्णुसंहिता)

(२) पञ्चायुधांशास्ते पञ्च शाण्डिल्यश्चौपगायनः ।
मौञ्ज्यायनः कौशिकश्च भारद्वाजश्च योगिनः ॥
पञ्चापि पृथगेकैकं दिवारात्रं जगत्प्रभुः ।

[1] स्वपक्षात् परपक्षादपि सर्वधर्मनिरासकल्पापायः समुपनत इति, तदपायात् पञ्चरात्रस्य रक्षणमावश्यकमासीदिति च ग्रन्थस्य नामान्ते योजितो रक्षाशब्दः सम्यगावेदयति ।

[2] दृश्यन्तां ५२ पुटे "तथाहि—भाष्यकाराव्यवहितशिष्यैः वंगिवंशेश्वरैः * * *" इत्यादीनि वाक्यानि । आगम-मन्त्र-तन्त्र-तन्त्रान्तराभिधेषु चतुर्षु सिद्धान्तेषु मन्त्रसिद्धान्तमवलम्ब्य नित्यग्रन्थं प्रणिनाय भगवान् भाष्यकारः ।

अध्यापयामास यतस्ततस्तान् मुनिपुङ्गवान् ।
शास्त्रं सर्वजनैर्लोके पञ्चरात्रमितीर्यते ॥ (ईश्वर० सं० २१)

(३) पञ्चेतराणि शास्त्राणि रात्रीयन्ते महान्त्यपि ।
तत्सन्निधौ समाख्याऽसौ तेन लोके प्रवर्तते ॥ (पाद्म सं० ज्ञान. १)

(४) तत्परव्यूहविभवस्वभावादिनिरूपणम् ।
पाञ्चरात्राह्वयं तन्त्रं मोक्षैकफललक्षणम् ॥ (अहिर्बुध्न्य सं० ११)

रात्रम् अथवा रात्रिरिति शब्दस्य ज्ञानार्थ एवमुपकल्प्यते नारदपञ्चरात्रे—"रात्रं च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम् । तेनेदं पञ्चरात्रं हि प्रवदन्ति मनीषिणः" इति। इदं तत्र प्रथमरात्राख्येऽध्याये प्रतिपादितं वचनम् । पञ्चविधानि रात्राणि ज्ञानानि यस्मिन्निति नारदपाञ्चरात्रीया पञ्चरात्रव्युत्पत्तिरियम् आदावुदाहृतं विष्णुसंहितावचनोपपादितं निर्वचनं निकाममवष्टम्भयति। पञ्चायुधानाम् अंशत्वेन परिगण्यमानेभ्यः पञ्चभ्यः शाण्डिल्यादिमुनिपुङ्गवेभ्यः पञ्चभिरहोरात्रैः परमेण पुंसा नन्वस्य प्रागध्यापितत्वात् 'पञ्चरात्रम्' इति नाम्ना सर्वत्र शास्त्रमिदं प्रथितमिति नवीनाः श्रीएम्बार्प्रभृतयः पण्डिता अभिप्रयन्ति। अतिप्राचीनत्वेनावगम्यमानेषु पाञ्चरात्रसंहिताग्रन्थेषु अन्यतमेन अहिर्बुध्न्यसंहिताग्रन्थेन यदुपपादितं तत्परव्यूहेतिवचनेन पञ्चरात्रशब्दस्य निर्वचनं तदेव सुतरां साधीय इत्याधुनिकप्रणाल्या विचारणपरस्य श्रीभट्टाचार्यादिविमर्शकवर्गस्य भवत्याशयः । [1]अभिगमनम्, उपादानम्, इज्या, स्वाध्यायः, योगः इति पञ्चानां भगवत्कैङ्कर्यरूपाणां कर्मणां प्रत्यहमनुष्ठानार्थं प्रतिनियताः पञ्च कालाः शास्त्रेऽस्मिन् यतः सन्ति संविभक्ताः, तत इदं नामेति नातिविचारितविषयतत्त्वाः केचित् कथयन्ति । "पञ्चकालरतश्चैव

[1] दृश्यतां बरोडाराजकीयैर्मुद्रिताया जयाख्यसंहिताया उपोद्घातः ।



ञ्चरात्रार्थवित् तथा । विष्णुतत्त्वं परिज्ञाय एकं चानेकभेदगम्" इति जयाख्यवचनं तदिदम् असदिति विशदयति । यद्यभिगमनादिपञ्चकर्मणाम् अनुष्ठानाय विहितान् पञ्च कालानेव निर्दिशेत् पञ्चरात्रमिति संज्ञा, तर्हि पञ्चकालरत इति, पञ्चरात्रार्थवित् इति पञ्चकाल-पञ्चरात्रशब्दयोर्विभिन्नः प्रयोगो नैव समञ्जसः स्यात्, यतस्तद्वचनमेव तयोः शब्दयोर्विभिन्नार्थत्वं व्यनक्ति । किञ्च विधिनियमितानि विविधभगवत्कैङ्कर्याणि अनुरुध्यैव दिनमेकं पञ्चधा विभक्तम्, न तु कालस्यान्यथा पृथग्विभागस्यास्त्यवकाश इति स एव ग्रन्थः साधु निर्धारयत्यपरत्र । यथा—"एकस्यैव हि कालस्य वासरीयस्य नारद । आप्रभातान्निशान्तं वै पञ्चधा परिकल्पना । पृथक् कर्मवशात् कार्या न काला बहवः स्मृताः" (जयाख्य० २२-२५, २६) इति । अतो हेतोः पञ्चापि वासरीया विभागाः, कालेषु तेषु वैधत्वेन प्राप्ताः पञ्च धर्मा वा पञ्चरात्रशब्दस्याकिञ्चित्करा निर्वचनविषय इति निश्चिनुमः । साङ्ख्य-योग-वैशेषिक-न्याय-मीमांसाख्यानि पञ्च इतराणि शास्त्राणि यत्र रात्रीयन्ते (अदृश्यानि भवन्ति) इति या व्युत्पत्तिः पाञ्चरात्रशब्दस्य पाद्मानुसारेण प्रकल्प्यते सापि क्लिष्टकल्पनेति, न ह्यार्या आर्जवावलम्बिनस्ताम् अभिनन्देयुरिति चाभिप्रयन्ति केचन विचक्षणा विमर्शकाः । परञ्च—पूर्वनिर्दिष्टस्य शतपथब्राह्मणमन्त्रस्य पूर्वतन एष "पुरुषो ह नारायणोऽकामयत्" इति मन्त्रः पुरुषसूक्ते नारायणोपनिषदि च प्रतिपादितस्य नारायणस्य स्वरूपमेव निरूपयतीति, स्वात्मनैव तेनाविर्भावितानां पर-व्यूह-विभवान्तर्याम्यर्चाख्यानां पञ्चानां मूर्तीनां स्वरूपनिरूपकपरं भगवच्छास्त्राख्यं पाञ्चरात्रशास्त्रं स एव प्रणीतवानिति,[1] शतपथब्राह्मणोक्तरीत्या स एव यज्ञरूपधरः पाञ्चरात्रसत्र-

[1] सदागममयात् तस्मात् केवलाद्दिव्यशासनात् ।
निर्ममे सारमुद्धृत्य स्वयं विष्णुरसङ्कुलम् ॥
तत्परव्यूहविभवस्वभावादिनिरूपणम् ।
पाञ्चरात्राह्वयं तन्त्रं मोक्षैकफललक्षणम् ॥ (अहिर्बु. ११-६२, ६३).

पुरुषः[1] स्वयं संपद्यत इति च षेडरमहाशयः कथमप्यभिप्रैति[2] । कालपञ्चकस्य च, पञ्चसु कालेषु द्वितीयाधिकारे प्रतिपादितेषु निर्वर्तनीयस्य नित्यकृत्यपञ्चकस्य च निर्णयपरं शास्त्रमेव पाञ्चरात्रशब्दप्रतिपाद्यमिति निगमान्तगुरुभिरेव प्रथमाधिकारस्य निगमनावसरे निर्णीतमस्ति । यथा—

"पञ्चकालव्यवस्थित्यै वेङ्कटेशविपश्चिता ।
श्रीपाञ्चरात्रसिद्धान्तव्यवस्थेयं समर्थिता ॥" इति ।

पञ्चरात्रशास्त्रस्य वेदस्येव सर्वविद्याभ्योऽपि सर्वथा चिरन्तनत्वं तच्छास्त्रप्रतिपत्तिमद्भिः संभाव्यते । आधुनिकाः चारित्रतत्त्वविमर्शनपरा विद्वांसश्च शास्त्रमिदं क्रिस्तुजन्मतः प्रायः शताब्दानां चतुष्टय्याः पूर्वमेव बहुभिर्ज्ञातमिति, तत्सम्प्रदायश्च वासुदेवपरायणैस्तत्र तत्र प्रवर्तित इति च सहेतुकमुपपादयन्ति । क्रिस्तुतः प्राक् चतुर्थ्यां शताब्द्यां स्थितवता पाणिनिना भगवान् वासुदेवः 'वासुदेवार्जुनाभ्यां वुन्' इति सूत्रेण सूचित इति, तत्समयेऽपि वासुदेवाराधकानां सद्भावस्य तदेतत् ज्ञापकमिति, स च वासुदेवशब्दः चतुर्षु व्यूहेष्वन्यतमं भगवन्तमेव निर्दिशति न वसुदेवसुतं श्रीकृष्णमिति, वुन्प्रत्ययविधानवैयर्थ्यं परिजिहीर्षतो भगवत्संज्ञेयमिति प्रतिपादितवतः पतञ्जलेः महाभाष्यवाक्यं प्रमाणमस्येति च स्वसिद्धान्तस्य ते ह्युपकल्पयन्ति हेतून् । "तद्धि वासुदेवाख्यं परं ब्रह्म" इति यत् श्रीभाष्ये (२-२-४१) अभिहितं तदपि नूनमेतद्वासुदेवपरमिति निरूपयति वचनम् । शतपथब्राह्मणे, ऐतरेयब्राह्मणे च सात्त्वतविषयस्य (पञ्चरात्रपरायणानां निर्देशकासु संज्ञास्वन्यतमस्य) प्रयोगोपलम्भात्, पाञ्चरात्रशास्त्रस्यातिचिरन्त-

[1] यज्ञरूपधरं देवं यजते स्वात्मनैव यः ।
तेन सर्वे कृता यज्ञा भवन्तीह महात्मना ॥ (अहिर्बु. ३१-३९).

[2] Introduction to the Pancaratra of Prof. Schrader, P. 25.



नत्वनिर्णयविषये तादृशेषु स्थलेषु विद्यमानस्तादृशो निर्देशोऽपि नितरां भवति गरीयान् । अद्योपलभ्यमानेषु ब्राह्मणाख्येषूपनिषद्ग्रन्थेषु कालैर्बहुतिथैः प्रवृत्तेषु नन्विदम् ऐतरेयब्राह्मणम् अन्यतम इति, तथाविधे प्रबन्धे च सात्त्वतानां नामनिर्देशो नाम निस्संशयतया पाञ्चरात्रसंप्रदायस्य क्रिस्तुजननात् प्राक् दशम्यां शताब्द्यां ततोऽपि पूर्वं वा प्रचारमिह देशे निरूपयतीति च विषयस्यास्य विमर्शनपरा विश्वसन्ति । अस्मदीयाः साम्प्रदायिकास्तावत् यथा कथञ्चित् 'चतुर्वेदसमन्वितं पञ्चरात्रानुशब्दितं महोपनिषदमिदं भक्तानुकम्पया भगवता हरिणा संगृहीतं' वेदा इव उपनिषद इव चानादिकालप्रवृत्तमिति सविस्रम्भम् अभिप्रयन्ति ।

स्वधर्मपरित्यागवादिनां केषांचन स्ववर्गीयाणाम्, मृषावादमभिदधतां परकीयानां च कक्ष्ययोः द्वितीयायाः श्रीभाष्यादिषु प्रपञ्चितैः प्रमाणैः परिहृतत्वात्, स्ववर्गीयैः कैश्चन अविचारितोपात्तानाम् आशयानां निरसनाय प्रवृत्तोऽयं ग्रन्थः त्रिभिरधिकारैः परमैकान्तिनामावश्यकान् पाञ्चकालिकधर्मान् सप्रमाणमुपदिशति । प्रथमाधिकारे भगवन्मन्दिरेषु भगवतोऽर्चारूपिणः पूजानिर्वर्तनोपयोगिनां विधीनां विविधानां विवरणपुरस्सरं आगमसिद्धान्त-मन्त्रसिद्धान्त-तन्त्रसिद्धान्त-तन्त्रान्तरसिद्धान्तभेदेन पञ्चरात्रस्य चतुर्विधत्वं प्रदर्श्यते । एते च सिद्धान्ताश्चत्वारोऽपि पुनः स्वयंव्यक्तसिद्धान्तः, दिव्यसिद्धान्तः, सैद्धसिद्धान्तः, आर्षसिद्धान्तश्चेति संज्ञान्तरैरपि व्यवह्रियन्ते । चतुर्विधमपीदं पञ्चरात्रं वेदमूलांशस्य भवत्युपबृंहणम्[1] । किञ्च भगवता प्रोक्तं पञ्चरात्रशास्त्रमनुसृत्य प्रवृत्तासु शतद्वयाधिकपाञ्चरात्रसंहितासु[2] काश्चि-

[1] "चतुर्विधं पञ्चरात्रम्—आगमसिद्धान्तः, दिव्यसिद्धान्तः, तन्त्रसिद्धान्तः, तन्त्रान्तरसिद्धान्तश्चेति । चतुर्विधं चेदं वेदमूलभूतांशस्य उपबृंहणम् । तदभिप्रायेण ह्युक्तं महाभारते—'महतो वेदवृक्षस्य मूलभूतो महानयम्' इत्यादि ।" इति न्यायपरिशुद्धौ ।

[2] जर्मन्देशीयविदुषा षेडर्महाशयेन आङ्गलभाषायां विरचिते पाञ्चरात्रागमोपोद्घा-ताख्ये विमर्शग्रन्थे दशाधिकद्विशतसङ्ख्याकाः पाञ्चरात्रसंहिताग्रन्थाः तत्तन्नामनिर्देशादिपूर्वकं सन्ति

दिव्या इति, काश्चित् सात्त्विका इति, काश्चित् राजसा इति, अथ काश्चित् तामसा इति चोच्यन्त इति। चातुर्विध्यं तासामपि विशदयन्[1], कतमत्संहिता अनुरुध्य केषु केष्वालयादिषु पूजादिकमनुष्ठेयमिति चाधिकारोऽयं निरूपयति नियमान्। अतः सिद्धान्तानाम्, संहितानाम्, शास्त्राणाम्, आलयानाम्, पूजाद्यधिकारिणाम्, बिम्बानाम्, पूजाविधीनां चासाङ्कर्यमावश्यकमिति निरूपयन्, सुव्यवस्थितस्य तत्तद्वर्णाश्रमसमुचितस्य पाञ्चरात्रिकपाञ्चकालिक-समाराधनस्य वैधत्वं च स्थापयन्, तद्विधायकपाञ्चरात्रागमस्य कार्त्स्न्येन प्रामाण्यमपि प्रथमाधिकारे प्रदर्शयति। द्वितीयाधिकारे कर्मानुरोधेन काल-विभागान् अहोरात्रस्य पञ्चधा विधाय[2], ब्राह्मान्मुहूर्तादारभ्य आनिशान्तं परमैकान्तिभिरनुष्ठेयानि भगवत्कैङ्कर्यभूतानि अभिगमनोपादानेज्या-स्वाध्याय-योगाख्यानि पञ्च कृत्यानि सप्रमाणं प्रतिपादयति। अत्रैव श्रीभाष्यकार-

निर्दिष्टाः। आगमग्रन्थानाम् आकरविवृतिरूपस्य तादृशकोशस्य (Introduction to Pāncarātra and Ahirbudhnya Samhitā) रचनेन पाञ्चरात्राभिमानिनां मन्ये, ष्रेडर्महाशयेन बहूपकृतम्।

[1] (1) सात्त्वत-पौष्कर-जयाख्यादयो दिव्याः, (2) ईश्वर-भारद्वाज-सौमन्तवादयः सात्त्विकाः, (3) सनत्कुमार-पद्मोद्भव-शातातपादयो राजसाः, (4) पञ्चप्रश्न-शुकप्रश्न-तत्त्वसागरादयस्तामसाः संहिता इति विभक्ताः सन्ति। सिद्धान्ता एते प्रयोजनविशेषापेक्षया स्वयंव्यक्त-सैद्ध-दिव्यार्षभेदेन वा, वेदसिद्धान्त-दिव्यसिद्धान्त-तन्त्रसिद्धान्त-पुराणसिद्धान्तभेदेन वा विभज्यन्ते। क्षेत्राणि च स्वयंव्यक्त-दिव्य-सैद्ध-मानुषभेदेन चतुर्धा। पाञ्चरात्रपूजाक्रमश्च वैदिक-तान्त्रिक-श्रौत-मिश्रभेदेन चतुर्विधः। तत्प्रतिपादकं शास्त्रमपि स्वयंव्यक्त-दिव्य-मुनिभाषित-मानुषभेदेन चतुर्धा। [स्वयंव्यक्तं शास्त्रं मूलागमः। दिव्यं नाम साक्षात् भगवत्प्रणीतं ब्रह्मरुद्रादिभिः प्रवर्तितम्। मुनिभाषितं तु सात्त्विक-राजस-तामसात्मना त्रिधा—भगवतः श्रुतार्थस्य केवलप्रतिपादकं सात्त्विकम्। एकदेशतो भगवतः श्रुतं स्वयोगमहिमसिद्धं चावशिष्टं राजसम्। स्वयोगमहिमोपलब्धार्थैरुपनिबद्धं तामसम्। दिव्य-मुनिभाषिताभ्यां व्यतिरिक्तं मनुजैः प्रणीतं मानुषम्।]

[2] "एकस्यैव हि कालस्य वासरीयस्य नारद। आप्रभातान्निशान्तं वै पञ्चधा परिकल्पना। पृथक् कर्मवशात् कार्या न काला बहवः स्मृताः॥" इति जयाख्यसंहिता।



नित्यग्रन्थे सम्यगनुपलभ्यमानानां पाञ्चकालिकानां धर्माणां सर्वेषामपि तदभिमतत्त्वनिर्धारणपरः सिद्धान्तश्च सोपपत्तिकमस्ति निरूपितः। अपि च स्मार्तानां पाञ्चरात्रिकाणां च कर्मणां[1] परस्परं विसंवादः समुपनमेदिति वादम्, कुलक्रमेणागमसिद्धान्तमनुरुध्य पाञ्चरात्रिकं भगवत्सेवादिकम् अनुष्ठेयं कर्म त्रयीमार्गानधिकारिणाम् एकान्तिनां च भवतु, अस्तु चेतरेषां त्रयीमार्ग एवेति विवदतामाशयं चास्मिन्नधिकारे निरासयति[2]। तृतीयोऽधिकारः पूर्वाधिकारविहितानि पञ्चकालकृत्यानि सर्वाणि सप्रमाणं प्रपञ्चयति। निद्रान्त-प्रबोध-हरिकीर्तन-शौच-स्नान-सन्ध्योपासन-पितृतर्पण-ब्रह्मयज्ञोपादान-भगवत्पूजादीनां विविधानां नित्यानुष्ठानानां यथावद्विवरणमत्रास्ति विधिनिषेध-प्रमाणप्रदर्शनैः प्रतिपादितम्।

सत्स्वपि शतद्वयाधिकसङ्ख्याकेषु पञ्चरात्रसंहिताग्रन्थेषु, श्रीनिगमान्त-गुरोः सात्त्वत-पौष्कर-जयाख्यनामसु त्रिष्वेव सुमहती संभावना। संहितान्तराण्यपि — पारमेश्वर-पाद्म-भारद्वाज-भार्गव-वासिष्ठ-विहगेन्द्रेश्वराहिर्बुध्न्यादयो बह्व्यः संहिताः—यद्यपि प्रमाणत्वेन तत्र तत्र ग्रन्थेऽत्र सन्त्युपात्तानि, तथापि मूलवेदानुसारेण साक्षाद्भगवत्प्रणीतास्तास्तिस्र इति कृत्वा, तासु मन्महे प्रावर्तत महान् पक्षपातोऽस्य। "सात्त्वताद्यं त्रिकं चैतत् व्यापकं मुनिसत्तम" इति ईश्वरसंहितावचनम्, "स्वयंव्यक्ते तथा दिव्ये दिव्यशास्त्रोक्तवर्त्मना। मूलागमसमेतेन मुख्यैर्भागवतैः सदा" इति संहितात्रयस्य दिव्यत्वोपपादकं जयाख्यसंहितावचनं च श्रीनिगमान्तगुरोराशयस्योपष्टम्भकं भवतीति भावयामः। तिसृणामासां दिव्यत्वस्य पारम्यस्य च प्रमापकत्वप्रतिपादनार्थमेव सात्त्वत-

[1] केवलं त्रयीनिष्ठाः केचन, केचन चागमनिष्ठाः।

[2] मूलवेदाधिकारिणां (एकायनशाखाध्येतॄणाम्) आगमसिद्धान्तेऽप्यस्याधिकारः। एत एव पाञ्चरात्रस्य मुख्याधिकारिणः। सिद्धान्तान्तरेषु त्रयीनिष्ठानामपि तत्तदुक्तदीक्षामूलतो विद्यतेऽधिकारः।

पौष्कर-जयाख्यसंहितानां विवरणरूपतया क्रमेण तत्तत्संहितामार्गावलम्बिनो महान्त ईश्वर-पारमेश्वर-पाद्माख्यास्तिस्रः पृथक् संहिताः प्रणिन्युरिति साम्प्रदायिका अभिप्रयन्ति। अथ नैष्ठिकानां परमैकान्तिनां नित्यानुष्ठानविधिनिर्णायकत्वेन भगवतो भाष्यकारस्य नित्यग्रन्थविवरणद्वारा तस्याव्यवहितशिष्यस्य वङ्गिवंशेश्वरस्य भूयस्यः कारिकाः, तथा नंजीयरिति नामान्तरेण प्रथितस्य नारायणमुनेः पञ्चकालकल्पनाविधायिकाः कारिकाश्च ग्रन्थेऽस्मिन् सन्ति भूरिश उदाहृताः[1]।

नारायणैकपरायणैः परमादरणीयं पाञ्चरात्रशास्त्रमिदम् इति साम्प्रदायिकानामाशयः। पाञ्चकालिककृत्यैः परमपुरुषमेव ये सन्ततमुपासते त एव परमैकान्तिनः। परमैकान्तिशब्दस्यार्थविवरणावसरेऽस्य ग्रन्थस्य तृतीयाधिकारे निगमान्तगुरुभिः परमैकान्तिशब्दस्य निर्वचनमेवमेवास्ति विहितम्[2]। अनन्यदेवताकत्वमेव परमैकान्तिनां परमा निष्ठा। "चतुर्विधा मम जना भक्ता एव हि ते श्रुताः। तेषामेकान्तिनः श्रेष्ठास्ते चैवानन्यदेवताः" इति खलु महाभारतमावेदयति।

"कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः।"
"अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्।"
"जरामरणमोक्षाय मामाश्रित्य यतन्ति ये।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम्॥"
"तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च।
मय्यर्पितमनोबुद्धिः मामेवैष्यस्यसंशयः॥"

[1] श्रीवत्साङ्कमिश्रस्य अभिगमनसारः, श्रीभट्टपराशरस्य नित्यग्रन्थः, वङ्गिवंशेश्वरस्य कारिका, नारायणमुनेः नित्यार्चनकल्पः इत्येतेषां ग्रन्थानां विशिष्य वङ्गिवंशेश्वरकारिकाग्रन्थस्य च कृतमुपबृह्मणम्। [वङ्गिवंशेश्वरः श्रीरङ्गनारायणाचार्याख्यया च व्यपदिष्टः श्रीभाष्यकाराणाम् अव्यवहितशिष्यः पञ्चकालप्रक्रियया नित्यकर्मसंग्राहकः प्रधानः पुरुषः।]

[2] द्रष्टव्यतां श्रीपाञ्चरात्ररक्षायां १३९ पुटः।



"मत्कर्मकृत् मत्परमः मद्भक्तः सङ्गवर्जितः।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव॥"
"बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥"
"आब्रह्मभुवनाल्लोकात् पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते॥"

इत्यादिभिः भगवन्मुखोद्गतैरेव विश्वेषामपि विश्वसनीयैर्वचनैः प्रतिपादितरीत्या परस्मिन् पुरुष एव नैरन्तर्येण निवेशितमतीनां पाञ्चरात्रपरायणानां परमैकान्तिनां तस्यैव भगवतो मुखात् प्रवृत्तं पाञ्चरात्रशास्त्रं नित्यकर्तव्यसद्धर्मोपदेशकं मुक्तानामिव स्वयंप्रयोजनभूतं च भवतीति निरूपणार्थमेव निगमान्तगुरुरोः एतद्ग्रन्थनिबन्धने समुद्यमः।

ग्रन्थस्यास्य सपरिष्कारं मुद्रणाय प्रवृत्तैरस्माभिः का प्रक्रिया आदृता इति च किञ्चिन्निवेदयामः। ग्रन्थेऽस्मिन् प्रत्यधिकारं विषयाणां नैकविधानां तत्र तत्र विभागाः सन्ति विहिताः; ततस्तत्तदुचितानाम् विषयनिर्देशानाम् 'मङ्गलाचरणम्', 'पञ्चरात्राणां प्रमाणम्', 'चत्वारः सिद्धान्ताः', 'सिद्धान्तानाम् असाङ्कर्यस्थापनम्' इत्येवमादीनां योजनानि च तत्र तत्र पुटानां पर्यन्तेषु यथामति सन्ति निर्वर्तितानि। ग्रन्थस्यास्य पठने प्रवृत्तिमतां विषयविभागरूप एष परिष्कारः परमुपकुर्यादिति वयमिममुद्यममङ्गचकुर्म।

अस्य प्रबन्धस्य संस्कारायादृतेषु कठिनेषु कार्येषु पाठशोधनमप्यन्यतमम्। विशेषशोधनार्थं विभिन्नेभ्यः स्थलेभ्यः कोशा एकादश श्रीपाञ्चरात्ररक्षायाः सम्पादिताः। एकादशस्तु नागरलिपिमुद्रितो य उपोद्घातस्योपक्रमे सूचितः स गुणैः नैवास्मदभिप्रेतार्थसमर्थनाय प्रकल्पेतेति अन्ततोऽनादृतः। अवशिष्टेषु दशसु कोशेषु ग्रन्थाक्षरैस्त्रयः, आन्ध्रलिपिभिरेक इति चत्वारो

मुद्रिता गृहीता ग्रन्थाः । ग्रन्थाक्षरमयाः तालपत्रलिखिताः प्राचीनाः षट् च परस्तात् सम्पादिताः । ग्रन्थाक्षरैः प्रभिन्नेषु समयेषु मुद्रितास्त्रयोऽपि ने कोशाः प्रायः पाठतः समानाः । आन्ध्राक्षरमुद्रितस्तु तेभ्यः किञ्चिदिव विभिन्नः कियान् शुद्धश्च । तालपत्रलिखितेषु षट्सु कोशेषु "घ" संज्ञकस्य पाठतः कालतश्च गरिष्ठत्वमालोच्य तदीयाः पाठा एव भूयसास्माभिराहृता इति पूर्वमुक्तम् । तथास्य ग्रन्थस्य शोधनाय सम्पादितानां पुस्तकानाममीषां विषयान् कांश्चनेह विवृणुमः । एतेषु "च" कोश एवान्ध्राक्षरमयः । तदितरे सर्वेऽपि नव ग्रन्थाक्षरमयाः ।

१. "क" **संज्ञितः कोशः** विलम्बिवत्सरे (कलौ ४९९९-क्रैस्तवे-१८९९) मुद्रितः । इदमेव प्रथमोपलब्धं पुस्तकम्[1] । 'शंखपुरं राघवाचार्यपरिशोधितपुस्तकानुसारेण मुद्रितः' इति कोशस्य मुखपत्रे मुद्रितमास्ते । अनन्तरं सम्पादितानां पुस्तकान्तराणां परामर्शानन्तरं प्रथमोपलब्धं पुस्तकमिदम् अपभ्रंशबाहुल्यविषयेऽपि प्रथमगणनीयमित्यवगतम् ।

२. "क(अ)" **संज्ञितः कोशोऽयं** अडयार् पुस्तकभाण्डागारात् उपलब्धः । "क" कोशात् षोडशवर्षेभ्यः पूर्वं चित्रभानुवत्सरे (कलौ ४९८३-क्रैस्तवे १८८२-८३) चेन्नपुर्यां व्यवहारतरङ्गिणीमुद्रालये मुद्रितः । 'शंखपुरं राघवाचार्यैः परिष्कृतशुद्धप्रतिवत् सम्यक् परिष्कृत्य मुद्रितोऽयं ग्रन्थः' इति पूर्वस्मिन् पुस्तक इवात्रापि मुखपत्रे मुद्रितमास्ते । इतः किञ्चिदूनवर्षद्वयात् प्राक् मुद्रिते "ज्ञ" संज्ञिते (अन्ततो निर्दिश्यमाने) कोशे शोधनपत्रेषु अन्ततः सूचिताः शोधनांशाः प्रायेणात्र साधिता दृश्यन्ते । क्वचित् "ज्ञ" कोशं "क" कोशं चानुरुध्यैव मुद्रितोऽयं कोश इति समालोच्य, नास्य पृथक् पाठभेदादिबोधकं किमप्यकारि सूचनमस्मिन् ग्रन्थे । वयमतः प्रायेण "ज्ञ" कोशस्थाने पुस्तकमिदं परिगणयामः ।

३. "ख" **संज्ञितः कोशः** मद्रपुरराजकीयहस्तलिखितपुस्तकभाण्डागारात् प्राप्तः । D. 5280 अङ्कचिह्नितः । शोभनैरक्षरैर्युक्तः । द्विनवतिवत्सरेभ्यः

[1] इदं तोट्टालं श्रीवेणुगोपालाचार्यस्य । मदीयमपि तथाविधमेव पुस्तकमन्यद्भवति । भेदरहितत्वात् एतयोरेकत्वमुपकल्प्यते ।



प्राक् तिरुमलै वेदान्तरामानुजाचार्याख्येन केनचित् तालपत्रेषु दिवसैः द्वादशभिरेव विलिख्य समापितोऽयं कोश इति ज्ञायते । '४९९० कल्यब्दे सौम्यवर्षे कार्तिकमासस्य पञ्चदशेऽह्नि लेखनमारभ्य तस्य मासस्य सप्तविंशे दिवसे एकादशीतिथौ वृषभलग्ने लेखनसमापनं कृतम्' इति, 'श्रीपाञ्चरात्ररक्षा लिखिता श्रुत्यन्तलक्ष्मणाख्येन । पठितव्या द्विजवर्यैः दातव्या तत्समक्षमेवेयम्' इति च तेनैव लेखकेन पुस्तकस्यावसाने विलिखितमास्ते । यद्यप्ययमक्षरतः सुन्दरः, तथापि पाठत एष न विस्रम्भमर्हति । अस्मिन् परिदृश्यमानान् दोषान् मुद्रितपुस्तकस्थैः तैः समं विन्यस्य विषये विमृश्यमाने, कोश एष एव स्वमुद्रितानां प्रायशो मातृकात्वेन भूतपूर्वैः मुद्रापकैः स्वीकृतः स्यादिति संभावयामः । यद्यप्यामूलात् पुस्तकमिदम् अशिथिलं समग्रं चास्ते, तथापि त्रिचतुरेषु स्थलेषु लेखकप्रमादेन वा एतन्मूलभूते मातृकाकोशे समुपनतेन वैकल्येन वा कतिचन पङ्क्तयो दृश्यन्ते विसृष्टाः ।

४. "ग" **संज्ञितः कोश** एष च तालपत्रेषु सुव्यक्तं लिखितो मद्रपुरराजकीयहस्तलिखितपुस्तकभाण्डागारसंबन्धी, 5281 (M. 49-1) अङ्कचिह्नितः । समग्रोऽयम् । केन कदा लिखित इति नावगम्यते । "ख" कोशस्य समानवयस्को वा ततः किञ्चिदर्वाचीनो वा स्यादिति संभाव्यते । अस्य च "ख" कोशस्य च पाठरीत्यां पार्थक्यं न प्रायः परिदृश्यते । अस्मिन् "इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य . . ." इत्यादिकं साम्प्रदायिकं ग्रन्थसमाप्तिवाक्यं क्वचिदप्यधिकाराणाम् अवसानेषु ग्रन्थावसाने वा न दृश्यते ।

५. "घ" **संज्ञितः कोश** एष च तालपत्रमयो मद्रपुरराजकीयहस्तलिखितपुस्तकभाण्डागारादधिगतः । R. 4227 अङ्कचिह्नितः । अतीव पुरातनः । किञ्चिदूनवर्षशतकादर्वाक् लिखितयोः "ख" "ग" कोशयोः पत्राणां लिपीनां चावस्थितिम् अदसीयानां पत्राणामवस्थां च सममेकत्र निरीक्षितवद्भिरस्माभिः कोश एष वर्षाणां शतत्रयेण तयोः स्याज्ज्यायानिति विभाव्यते । दिष्ट्या न ह्यस्य दलानि कालेनैतावता घुणमुखैः क्षतानि ; न वा वयोवशात् विदीर्णानि । पाठतः प्रशस्तमिममेव कोशमनुरुध्य श्रीपाञ्चरात्ररक्षायाः पाठपरिष्कारे वयमभवाम प्रभविष्णवः । अत्र दृश्यमानाः साधुसंमताः पाठाः सुबहवः पुस्तकान्तरेषु मुद्रितेष्वमुद्रितेषु च न विलोक्यन्ते ।

C

६. "ङ" संज्ञितः कोशः सुतरां पुरातनः मद्रपुरराजकीयपुस्तकभाण्डागारादुपलब्धस्तालपत्रलिखितः। M. 34-3 अङ्कचिह्नितः। पाठैर्भूयसा "घ" कोशसदृशः। शैथिल्यम् अधिजिगमिषूणाम् अदसीयानां—क्वचित् क्वचित् विलुप्तानां च—दलानां रीतिमवलोकितवद्भिरस्माभिः कोश एष "घ" संज्ञितादपि प्राचीनतरं स्यादिति आलोच्यते। आरम्भे कोशस्यास्य कानिचन पत्राणि लुप्तानि, कानिचनान्ततश्च त्रुटितानि। अक्षराणि किञ्चिदिवास्पष्टानि। मुद्रापकान्तरैरदृष्टपूर्वं वयोवशात् विशिष्य शैथिल्यं प्रतीक्षमाणमिदं पुस्तकं दिष्ट्या समुचिते समये दृष्टमस्माभिः। साधुपाठाः समुद्धृता अस्मादपि कोशात्।

७. "च" संज्ञितः[1] कोशो विंशतिवत्सरेभ्यः पूर्वं १९१९ क्रैस्तवाब्दे तूप्पुल् श्रीवेङ्कटाचार्येण बेङ्गळूरनगरे आन्ध्राक्षरैर्मुद्रितः। ग्रन्थाक्षरैर्मुद्रितेभ्यः पूर्वनिर्दिष्टपुस्तकेभ्यस्त्रिभ्योऽपि पाठरीत्या मुद्रणशैल्या च कोशोऽयं कियानिव विशिष्यते। तत्र तत्र सन्दिग्धेषु बहुषु स्थलेषु सविमर्शमर्थनिर्वचनपूर्वकं विषयपरिशोधनाय यद्यप्यस्य मुद्रापकाः श्रममावहन्निति न ज्ञायते, तथापि यावच्छक्ति आगमशास्त्रस्यास्य शोधनाय तैः प्रवृत्तमिति अवगम्यते। महीशूरपुरादेव राजकीयपुस्तकभाण्डागारात् अस्मत्परिशीलनार्थं ये हि नाम कोशा आनीताः तेष्वेकोऽपि पुस्तकस्यास्यान्ध्रस्य मुद्रापकाणां दृष्टिपथमुपयात इति प्रतिभाति; यतः सुबहुषु स्थलेषु तत्कोशस्थाः पाठा मुद्रितस्यान्ध्रपुस्तकस्यास्य पाठेभ्यो विसंवदन्ति।

८. "छ" संज्ञितः कोशः सुस्पष्टैरक्षरैरन्वितो महीशूरपुरराजकीयपुस्तकभाण्डागारात् संपादितः। तालपत्रमयः। २४९८ अङ्कचिह्नितः। समग्रः। पाठैः अक्षरशुध्द्या च "घ" "ङ" कोशौ भूयसा अनुवर्तते। केन कदा लिखितोऽयमिति न ज्ञायते। अद्यैवास्य घुणभक्षणमारब्धम्। "घ" "ङ" कोशाभ्यामेतस्य लेखनकालः स्यादर्वाचीन इति प्रतिभाति।

९. "ज" संज्ञितः कोशोऽयम् असमग्रः। महीशूरपुरराजकीयपुस्तकभाण्डागारात् उपलब्धस्तालपत्रलिखितः। ३०२८ अङ्कचिह्नितः। लेखनसमयलेखकनामादिकम् अस्यापि नोपलभ्यते। पुस्तकस्य स्वरूपम्, अत्र समुपनतानां घुणक्षतादिशैथिल्यादीनां रीतिम्, पाठक्रमादींश्च सम्यगभिवीक्षतवद्भिरस्माभिः

[1] एष कोशः श्रीमतां तोट्टालं राजगोपालाचार्याणां सविधात् संपादितः।



प्रायेण "घ" कोशस्य समकालिकतास्य अनुमीयते। "विस्तरेण चाह योगमन्ते दक्षः। तत्र चैष सारः प्रोक्तः। सर्वोपाधि . . . ." इति[1] द्वितीयाधिकारान्तिमभागस्य किञ्चित् पूर्वं विद्यमानाया वाक्यपङ्क्तेरनन्तरम् अस्मिन् ग्रन्थलोपः संजातः। अदसीयस्य पाठादिसौष्ठवस्यावलोकनेन अवशिष्टस्य एतदीयस्य नष्टांशस्यापि परामर्शे परमाकाङ्क्षा नः समुत्पन्ना।

१०. "झ" संज्ञितः कोशः[2] श्रीपाञ्चरात्ररक्षायाः प्रथममुद्रित एष एवेति वयमेतावता जानीमः। वेळियनूर् शङ्खपुरम् श्रीराघवाचार्येण, कोन्दमूर् कोयिलिप्युणि श्रीराघवाचार्येण च शोधितः, कुम्भकोणम् तट्टै श्रीकृष्णमाचार्यप्रार्थनया माडपूषि श्रीपार्थसारथ्याचार्येण विक्रमसंवत्सरे (क्रैस्तवेऽब्दे १८८०) चैत्रमासे मद्रपुर्यां व्यवहारतरङ्गिणीमुद्रालये मुद्रितः। षष्ट्यधिकवर्षदेशीयमिदमेव पुस्तकं पूर्वनिर्दिष्टयोः ग्रन्थाक्षरमयपुस्तकयोः मुद्रणमूलम् आसीत्। एतन्मुद्रणे कृतयत्नैः प्रथमतो यं कमप्युपलब्धं कोशमनुरुध्य विनैव विमर्शश्रमं वीतपरिशोधनोद्यमं च ग्रन्थमुद्रणायारब्धमिति, अनन्तरं च पुस्तकान्तरप्राप्त्या स्वविहितेषु मुद्रणेषु दोषबाहुल्यमवलोक्य पुटाष्टकपरिमितं शुद्धिपत्रमन्ततः संयोजितमिति च संदृश्यते। अपभ्रंशबहुलस्यास्य कोशस्यान्ते योजितं शोधनपत्रमपि अन्यत् शोधनपत्रमपेक्षते। "क" कोशः सर्वथा पन्थानमेतदीयमेवानुरुणद्धि, यत एष एव तन्मुद्रणस्य मूलमभूत्। अत्रान्ततो विद्यमानानि शोधनपत्राण्यपि "क" कोशमुद्रापकैः नैव दृष्टानीति स्पष्टीभवति। तथापि श्रीपाञ्चरात्ररक्षायाः प्रथमतो मुद्राक्षरारोपणोपनतां प्रतिष्ठां श्रीशङ्खपुरं राघवाचार्यप्रभृतय एवार्हन्ति।

श्रीनिगमान्तगुरुभिः पाञ्चरात्ररक्षायां सुबहुभ्यो ग्रन्थान्तरेभ्यः समुद्धृत्योदाहृतानां सर्वेषामपि प्रमाणवचनानां ग्रन्थस्यास्यावसाने काचन विस्तृता वर्णानुक्रमणिकास्ति संयोजिता; यत्र च प्रमाणभूतानां सर्वेषामपि श्लोकार्धानाम् अन्येषामपि प्रमाणवाक्यानाम् आदिमा भागाः सन्ति समुद्धृत्य मुद्रिताः। एष चास्य परिष्कारायादृतेषु अभिनवेषु समुद्यमेष्वन्यतमः।

[1] दृश्यताम् अस्य ग्रन्थस्य ७६ पुटः।

[2] ग्रन्थ एष काञ्चीपुरं तायार्सन्निधि वरदाचार्यस्वामिनां सविधात् संपादितः।

अस्याम् अनुक्रमणिकायां तथोद्धृत्य सूचितानां प्रमाणवचनानाम् आकरकोशनामानि, कर्तृनामादीनि च तत्तद्वयञ्जकैः सङ्केताक्षरैः सन्ति संदर्शितानि ; येषां च (सङ्केताक्षराणां) विशेषविवरणम् अपरयोस्ततः पूर्वमायोजितयोः अनुक्रमणिकयोरस्त्याविष्कृतम् । पाठानां संदिग्धविषयाणां च विमृश्य शोधनार्थं यावान् परिश्रमः कालव्ययश्च समभूत्, किञ्चिदुच्चावचतया तावान् आकरग्रन्थानाम् अन्वेषणाय तत्तन्नामसंग्रहाय चासीद्विनियोक्तव्यः । एवमादृत्य च सुदुर्भरं क्लेशम्, ग्रन्थान् कांश्चन—अभिगमनसारः, आचमननिर्णयः, कालविधानम्, कालोत्तरम्, भोजदेव-बलदेवाचार्यग्रन्थाः, सन्मार्गदीपिका, कृष्णकल्पः, प्रयोगपद्धतिरत्नावली, श्रीकरसंहिता इत्यादीन्—नैवोपलब्धुमशक्नुम । आदौ आकरग्रन्थानाम् अन्वेषणे सत्युपक्रान्ते, सुबहूनां वचनानां मूलभूतग्रन्थानां तत्तद्ग्रन्थप्रकरणानां चाधिगमे महदेव विस्रम्भवैकल्यमजनि । इदमद्य महदस्माकं प्रमोदस्थानम्, यदुत बलवतोऽस्मदुद्यमस्य समुचितफलत्वेन प्रमाणवचनानाम् ऋतेऽतिपरिमितसङ्ख्याकेभ्यो वचनेभ्यः सर्वेषामितरेषामुपलब्धा आकरा इति । ते च प्रमाणवचनादीनां वर्णानुक्रमणिकायां सन्ति संयोजिताः । ग्रन्थेऽस्मिन् उदाहृतानां प्रमाणाकरसङ्ख्यानां मध्ये प्रतिशतकं पञ्चषा एवाकरा अभूवन् अनुपलब्धा इति च निर्देष्टुं शक्यते ।

प्रपत्तिधर्माणां तत्त्वनिरूपणाय निक्षेपरक्षां प्रथमतः प्रणीय,[1] ततश्च प्रपन्नजनैस्तदितरैश्च भागवतैः प्रत्यहमनुष्ठेयानां भगवत्कैङ्कर्यरूपधर्माणां निरूपकं पाञ्चरात्रशास्त्रं निःश्रेयसकाङ्क्षिणाम् अनुजिहीर्षया व्याख्यातवान् श्रीवेदान्तगुरुः, अनया रक्षया शास्त्रं च तद्रक्षितवान् । पाञ्चरात्रशास्त्रं परम-

[1] "प्रपञ्चितं चैतत् पूर्वस्मिन्नधिकारे निक्षेपरक्षादिषु च" इति ग्रन्थेऽस्मिन् तृतीयाधिकारस्यारम्भे दृश्यते । अतो निक्षेपरक्षाया अनन्तरं श्रीपाञ्चरात्ररक्षा प्रणीतेति सम्यक् ज्ञायते । (दृश्यतां ८१ पुट:).



सात्त्विकसंप्रदायप्रवर्तकमिति पारे गिरां खलु निगमान्तगुरोस्तस्मिन् बहुमानातिशयः ; यतो हि नाम पाञ्चरात्रशब्दस्य पूर्वं श्रीशब्दमायोजयन्नेव तच्छास्त्रमेष सर्वत्र व्यवहरति । अत एवामुमपि ग्रन्थं—न हि पाञ्चरात्ररक्षेति अपि तु—श्रीपाञ्चरात्ररक्षेति श्रीशब्देन सहैव सर्वत्र निर्दिशति । महति शास्त्रग्रन्थे [1]न्यायपरिशुद्धौ, प्रपन्नानामुपजीव्ये [2]रहस्यत्रयसारे च ग्रन्थस्यास्य समाख्या नन्वेवमेवास्त्युदाहृतेति विदन्त्येव साम्प्रदायिकाः ।

श्रीमन्निगमान्तगुरुभिः अनुगृहीतेषु तत्त्वहितपुरुषार्थप्रवर्तकेषु सुबहुषु ग्रन्थेषु केचन मतान्तरनिरासकाः, कतिचन स्वमतसंस्थापकाः, अपरे केचन प्रपत्तिशास्त्रप्रतिष्ठापकाः, अन्ये च कतिचन तच्छास्त्रसम्मतसंप्रदायसंरक्षणपराश्चेति मन्ये श्रीदेशिकग्रन्थविमर्शकपराणां विदितमेव । एतेषु चान्तिमनिर्दिष्टाः श्रीवैष्णवैर्बहुमता अभ्यर्हिततमाः पञ्चरक्षाग्रन्थाः । ते च सच्चरित्ररक्षा, निक्षेपरक्षा, गीतार्थसंग्रहरक्षा, रहस्यरक्षा,[3] श्रीपाञ्चरात्ररक्षा चेति प्रसिद्धाः । साङ्गस्य न्यासविद्यास्वरूपस्य विविधैः प्रकारैः प्रतिपादकाः प्राथमिकाश्चत्वारो रक्षाग्रन्थाः प्रपत्तिमार्गप्रवृत्तैः सुतरामुपजीव्यतयानुष्ठेयस्य स्वयंप्रयोजन-

[1] "तत् सर्वं श्रीपाञ्चरात्ररक्षासिद्धान्तव्यवस्थायां सर्वपरामर्शेन साधितमस्माभिः" इति न्यायपरिशुद्धौ शब्दाध्यायस्य द्वितीयाह्निके ।

[2] "ஸாக்ஷாந் மோக்ஷாபாயமும் மோக்ஷப்ராப்தியு முண்டென்றும் ஸ்ரீபாஞ்சராத்ரரக்ஷையிலே யுபபாதித்தோம்" इति मध्येचरमश्लोकाधिकारं श्रीरहस्यत्रयसारे ।

अतश्चावगम्यते—न्यायपरिशुद्धिः, श्रीरहस्यत्रयसारश्च श्रीपाञ्चरात्ररक्षाया अनन्तरं प्रणीतौ ग्रन्थाविति ।

[3] **सच्चरित्ररक्षा**—श्रीवैष्णवानाम् अनन्यप्रयोजनानां सच्चरितसंबन्धिनां विषयाणां प्रतिपादिका । **निक्षेपरक्षा**—न्यासविद्यायाः प्रतिपक्षप्रतिक्षेपपूर्वकं संस्थापनाय प्रवृत्तोऽयं ग्रन्थः । **गीतार्थसंग्रहरक्षा**—न्यासविद्याप्रतिपादकशास्त्रतत्त्वस्यार्थविवरणपूर्वकं तच्छास्त्ररक्षणाय प्रवृत्तेयम् । **रहस्यरक्षा**—न्यासविद्यायाः स्वरूपादीनामपवादान् अर्वाचीनैः प्रवर्तितान् परिहरन् प्रपत्तिधर्मानुष्ठानस्वरूपस्य प्रतिपादनाय प्रवृत्तोऽयं ग्रन्थः ।

भूतस्य भगवत्कैङ्कर्यधर्मस्यापवादगोष्ठीनाम् अपोहपूर्वकं संरक्षणाय, पाञ्च-कालिकप्रक्रियाणां परिष्कृतप्रयोगप्रदर्शनाय च प्रपन्नजनहितैषिभिः श्रीमद्वेङ्कट-नाथगुरुभिः प्रणीतोऽयं श्रीपाञ्चरात्ररक्षाग्रन्थः सर्वैरपि सत्सम्प्रदायाहितश्रद्धैः सविमर्शं परामृश्येतेति परमोऽस्माकं अभिसन्धिः ।

इदं तावदन्ततो विशिष्य विषादावहं नः समभिधातुम्, यदुत तृतीयाधिकारे इज्याविधेर्विवरणावसरे हन्त ग्रन्थलोपः सञ्जात इति, तत्र कियत्परिमितो वा ग्रन्थांशो लोपमवापेति न ज्ञातुं शक्यत इति च[1] । अस्माभिः सम्पादितेषु सर्वेष्वपि पुस्तकेषु "सर्वेषामन्ततो भगवत्प्राप्तिः समानाविकलानामपि भागवतानाम् . . . ." इति वाक्यस्यानन्तरं विषयलोप एकरीत्यैव दृश्यत इत्येतद्विचार्यमाणे, संवत्सराणां शतत्रय्याः प्रागेव, आहोस्वित् श्रीवेदान्तदेशिकविरचितमूलकोश एव वा हेतुभिरस्मन्मनसोऽगोचरैः कैश्चित् एष च प्रतिसंधातुमशक्यः समुपनतो मध्ये ग्रन्थलोप इत्यवगम्यते ; येन च मनागिव मनस्यस्माकम् आशाभङ्गः सपदि पदं निदधे । श्रीभाष्यकारप्रणीतनित्यग्रन्थविवरणमुखेन इज्याया व्याख्याने श्रीवेङ्कटनाथेन सत्यपि सम्यक् प्रतिज्ञाते[2] "अथ परमैकान्तिनः" इति भाष्यकारोक्तस्य परमैकान्तिशब्दस्य—तदीयनित्यग्रन्थोपक्रम एव विद्यमानस्य प्रथमपङ्क्तिवाक्यस्य—विवरणप्रकरणारम्भ एव विषयलोपस्य विलोक्यमानत्वात्, नित्यग्रन्थविवरणात्मकस्य विस्तृतस्य विशिष्टस्यापि विषयस्य विलोपः प्रायः समुपनत इति, यत्सत्यं साम्प्रदायिकेषु विषयेषु सारभूतो निगमान्तगुरुभिर्निरूपित इज्याविधिः प्रायो विलयमशेषतश्चावापेति च नैराश्यविसंस्थुलेन मनसा निर्णेतव्यमस्ति ।

[1] दृश्यतां ग्रन्थेऽस्मिन् १३८ पुटादारभ्य १४७ पुटं यावत् विषयस्यास्थावस्थितिः ।

[2] दृश्यतां १३८ पुटे प्राथमिकं पङ्क्तिद्वयम् ।



ग्रन्थरत्नमिदं नवीनया रीत्या परिष्कृत्याविष्कुर्वतां नः संप्रति परां कोटिमारूढः प्रमोदपरीवाहः । निगमान्तगुरूणां वैदुष्यम्, वैष्णवजनधुरीणत्वम्, वैराग्यम्, वैभवमन्यदपि निस्समाभ्यधिकमिति निखिलवैष्णवजनानां विशिष्य विदुषां विदितचरमेव । एष च महान् वेदान्तिनामग्रणीः, निबन्धकर्तॄणां नेता, दार्शनिकानां मार्गदर्शी, सर्वकवीनां संस्कर्ता, भक्तकोटीनां मकुटमणिः, वादिनां वाचस्पतिः, शान्तानामग्रेसरः, कर्मठानाम् प्राग्रहरः, प्रपन्नानां प्रेष्ठश्च आसीदिति सर्वाभिमतेन हेतुना खलु सर्वतन्त्रस्वतन्त्राख्या सर्वतोऽस्य ववृधे समाख्या । आचार्याणाममीषां ग्रन्थस्यास्य संशोधने च, विविधानां विषयानुपूर्वीणां विभजनपूर्वकं नामनिर्देशविधाने च, बहुविधानां पाठभेदानां संयोजने च, प्रभिन्नानां प्रमाणाकराणां प्रसमीक्ष्य संघटने च, मुद्रणदोषाणां परितः परिहरणे च वीततन्द्रम् आदृतेऽपि परिश्रमे, यत्सत्यं स्खलितानि कानिचन सन्त्येवात्र समुपनतानि ; यानि च गुणपक्षपातिनः प्रगुणमतयः, विश्वस्यते, तितिक्षेरन्निति ।

श्रीनिगमान्तगुरोः प्रबन्धरत्नस्यास्य सोत्कण्ठं संस्करणाय चा. विष्करणाय च सति मया समुद्यमे विहिते, कदाचित् आकस्मिको विद्वद्वर्यैः अस्मत्सुहृद्भिः वेदान्तशिरोमणिभिः श्रीवेणुगोपालाचार्यैः सह समागमः सल्लापश्च सङ्घटितः । विषयमिममधिकृत्य यथाविनिश्चितं मदभिप्रेतार्थे सत्यभिहिते, ते च ग्रन्थस्यास्य शोधनकर्मणि सपदि साहाय्यमाचरितुं स्वकीयं मनोभावमनुकूलम् आविरकुर्वन् । विविधानां निर्दिष्टपूर्वाणां दशाधिकानां मुद्रितानां हस्तलिखितानां च कोशानाम् आमूलात् पठनपुरस्सरं ग्रन्थस्यास्य परिशोधनविषये तैरापादितस्य सुमहतः साहाय्यस्य सर्वदानुस्मरणादृते नान्यत् प्रतिविधातुं प्रभवामः । सन्दर्भेऽस्मिन् सप्रेमातिशयं प्रमाणवचनानाम् आकरग्रन्थाद्यन्वेषणाय सोत्साहम् अनुपदम् उपकृतवतां तत्रभवतां

भूतपूर्वन्यायाधिकारिणां मत्प्रियसुहृदां तोट्टालं श्रीराजगोपालाचार्यमहोदयानां विषयेऽपि हार्दं कार्तज्ञ्यमावहामः। ऐहिकामुष्मिकतत्त्वविषयकज्ञानाभिवर्धनहेतूनां ग्रन्थसंग्रह-ग्रन्थप्रचारादिकार्याणां बहूपयोगिनां निर्वहणाय निपुणमतिभिः लोकहितैषिभिः स्थापितस्य अडयार्-पुस्तकभाण्डागारस्याध्यक्षैः, संस्कृतभाषायां वैदिकधर्मेषु च विशिष्य विहितश्रद्धैः, वैद्यरत्नबिरुदभाग्भिः सुगृहीतनामभिः जि-श्रीनिवासमूर्तिमहाशयैः मदावेदनम् अनुपदमेवाव्याक्षेपमनुरुध्य ग्रन्थस्यास्य मुद्रणमभ्युपगम्य तच्च कार्त्स्न्येन यथावन्निर्वर्तनाय साहाय्यं सर्वमप्याचरितमिति तेषां च धन्यवादपुरस्सरम् अभ्युदयपरम्परामाशासे ॥

श्रीमद्वेदान्तसूरेश्चरणकमलयोश्चञ्चरीकायमाणः
तत्सूक्त्यास्वादनैकप्रवणनिजमनाः श्रीदुरैस्वामिनामा ।
रक्षां श्रीपाञ्चरात्रागमविधिनियतां शोधितां नव्यरीत्या
नित्यानुष्ठानविद्भ्यो वितरति विनतो वीरराघवीशसूनुः ॥

कलिवृजिनसमुत्थैर्विप्लवैर्व्याहताथ
प्रमितिभिरमिताभिः पाञ्चरात्रव्यवस्था ।
कविकथकमृगेन्द्रैः स्थापिता यत्प्रबन्धे
तमहमुपहरामि प्रश्रितोऽभ्यर्हितेभ्यः ॥

"आर्यगृहम्"
वेपेरि—मदरास्
१८-२-१९४२

वैद्यरत्नम्
मेल्पाक्कम् दुरैस्वामि अय्यङ्गार्.

# । विषयसूचिका ।


| विषयाः | पुटाङ्काः |
|---|---|
| भूमिका | १—२४ |
| प्रथमोऽधिकारः—सिद्धान्तव्यवस्थापना | १—४४ |
| मङ्गलाचरणम् | १ |
| पञ्चरात्राणां प्रामाण्यम् | २ |
| चत्वारः सिद्धान्ताः | ३ |
| सिद्धान्तानाम् असाङ्कर्यस्थापनम् | ,, |
| सिद्धान्तानाम् असाङ्कर्ये पौष्करवचनविचारः | ६ |
| चतुर्णामपि सिद्धान्तानां मोक्षप्रदत्वम् | ७ |
| सिद्धान्तसङ्करे तन्त्रसङ्करे च पाद्मवचनविचारः | ९ |
| सिद्धान्तानां पाद्मोक्तं लक्षणम् | १० |
| मन्त्रसिद्धान्तः | ,, |
| आगमसिद्धान्तः | ,, |
| तन्त्रसिद्धान्तः | ११ |
| तन्त्रान्तरसिद्धान्तः | ,, |
| एकत्र सिद्धान्ते दीक्षितस्य अन्यत्राधिकारः | १३ |
| उपरितनतन्त्राधिकारिणाम् अधस्तनतन्त्रेषु तत्तन्मार्गेण करणेऽधिकारः | ,, |
| एकायनविधानस्यान्यत्र प्रवेशो प्रत्यवायः | १४ |
| प्रदक्षिणप्रणामादिषु सर्वेषां सर्वत्राधिकारः | ,, |

| विषयाः | पृष्ठाङ्काः |
| --- | --- |
| सिद्धान्तसङ्करे दोषप्रपञ्चनम् | १६ |
| वैखानसेन पाञ्चरात्रस्य सङ्करे दोषः, पाञ्चरात्रं तु सर्वोपजीव्यम् | २० |
| वैखानस-पाञ्चरात्रयोः परस्परनिन्दावचनानां प्रक्षिप्तत्वपक्षः | २३ |
| परस्परनिन्दावचनानि स्वशास्त्रप्रशंसापराणि | २५ |
| शैवागमकारणतन्त्रवचनानामपि स्वशास्त्रप्रशंसापरत्वम् | २६ |
| अप्रकृष्टसिद्धान्तत्यागेनापि उत्कृष्टसिद्धान्तप्रवेशकवचनानां प्रक्षिप्तत्वपक्षः | २८ |
| उत्कृष्टसिद्धान्तस्वीकारवचनानां मन्त्रसिद्धान्तस्तुतिपरत्वपक्षः | ३० |
| तन्त्रान्तरसिद्धान्तस्य श्रीकरत्वं मोक्षप्रदत्वं च | ,, |
| उत्कृष्टसिद्धान्तस्वीकारवचनानां स्वयंव्यक्तस्थानविषयत्वपक्षः | ३१ |
| आगमादिसिद्धान्तानां स्वयंव्यक्तादिनाम्नापि निर्देशः | ३२ |
| उत्कृष्टसिद्धान्तस्वीकारवचनानां स्वयंव्यक्तस्थानविषयत्वम् | ३३ |
| स्थानविशेषमधिकृत्य शास्त्राधिकारिणोः नियमपराणां वचनानाम् अर्थविचारः | ३५ |
| दिव्यशास्त्रेण पूजनस्य सर्वत्र संभवः | ३६ |
| मुनिवाक्यपरित्यागपूर्वकदिव्यमार्गपरिग्रहवचनस्य दिव्यमार्गप्रशंसापरत्वम् | ३७ |
| दिव्यमार्गपरिग्रहवचनानां मुनिवाक्यपूजितस्वयंव्यक्तस्थानविषयत्वम् | ३८ |
| शास्त्रस्य दिव्यादिनाम्ना विभागः | ३९ |
| संहितानां दिव्यसात्त्विकादिभेदेन विभागः | ४० |
| अपकृष्टशास्त्रस्थाने उत्कृष्टशास्त्रपरिग्रहवचनस्य स्वयंव्यक्तक्षेत्रपरत्वम् | ,, |
| प्राक्प्रवृत्तापकृष्टशास्त्रप्रत्यभिज्ञानेऽपि दिव्यस्यापरित्याज्यत्वं वा | ४१ |
| उत्कृष्टशास्त्रपरिग्रहस्य अधिकारिविशेषविषयत्वं वा | ४२ |
| सात्त्विकादिशास्त्रत्रयमपि प्रमाणमेव | ,, |
| कृत्स्नं पञ्चरात्रं प्रमाणम् | ४३ |
| असाङ्कर्येण सिद्धान्तानाम् अनुवर्तने फलम् | ,, |





| विषयाः | पृष्ठाङ्काः |
| --- | --- |
| द्वितीयोऽधिकारः—नित्यानुष्ठानव्यवस्थापना | ४५—७९ |
| अभिगमनादिना भगवत्सेवनं सर्वेषां समानम् | ४५ |
| एकायनिनां मुख्यमधिकारित्वम् अन्येषां तु दीक्षया | ४६ |
| जयाख्यसंहितायां पञ्च कालाः पाञ्चकालिककर्माणि च | ४७ |
| अभिगमनम् | ४८ |
| उपादानम् | ,, |
| इज्या | ,, |
| स्वाध्यायः | ,, |
| योगः | ,, |
| यागस्य अष्टावङ्गानि | ,, |
| पञ्चकालविधौ पाद्मवचनानि | ५० |
| भोजोक्ताः सङ्गवादयः पञ्चकाला अन्यार्थाः | ५१ |
| पाञ्चकालिकधर्मे सच्छिद्राच्छिद्रविभागः | ५२ |
| पाञ्चकालिकधर्मः श्रीभाष्यकारादीनाम् अभिमतः | ,, |
| प्रपन्नैः पञ्चकालक्रमः त्याज्य इति पूर्वपक्षः | ५५ |
| प्रपन्नैः पञ्चकालक्रमो ग्राह्य इति सिद्धान्तः | ,, |
| पञ्चकालप्रक्रिया श्रीभाष्यकाराभिमतेति समर्थनम् | ५६ |
| पाञ्चकालिकयोगशक्तौ प्रपत्तिनिष्ठाविरोधपरिहारः | ५९ |
| पाञ्चकालिकधर्मस्य स्मृत्युक्तकर्मभिर्नोपरोधः | ६० |
| व्यासस्मृतौ अभिगमनसंवादनम् | ,, |
| व्यासस्मृतौ उपादानसंवादनम् | ६१ |
| व्यासस्मृतौ इज्यासंवादनम् | ६३ |
| पाञ्चरात्रोक्तं समाराधनमेव सर्वेषां मुख्यम् | ६५ |
| भगवत्समाराधनस्य नित्यत्वम् | ,, |
| व्यासस्मृतौ स्वाध्यायसंवादनम् | ६७ |

| विषया: | पुटाङ्का: |
|---|---|
| व्यासस्मृतौ योगोऽपि आक्षेपलभ्य: | ६७ |
| दक्षोक्तकालाष्टकविभागोऽपि पाञ्चकालिककर्मानुगुण: | ६९ |
| दक्षस्मृतौ प्रथम-द्वितीयकालकर्तव्यस्याभिगमनेऽन्तर्भाव: | ७० |
| दक्षोक्ततृतीयकालकृत्यस्य उपादानेऽन्तर्भाव: | ७१ |
| दक्षोक्तचतुर्थ-पञ्चमकालकृत्यस्य इज्यायामन्तर्भाव: | ७३ |
| दक्षोक्तषष्ठ-सप्तमकालकृत्यस्य स्वाध्यायेऽन्तर्भाव:। अष्टमकालोक्तलोकयात्रा तु न परमैकान्तिनाम् | ७४ |
| दक्षस्मृतौ वेदाभ्यासस्य योगेनाविरोध: | ७६ |
| पञ्चकालधर्मावश्यकतानिगमनम् | ,, |
| पाञ्चकालिकधर्मानुष्ठानप्रयोजनम् | ७८ |
| **तृतीयोऽधिकार:—नित्यव्याख्यानम्** | **८०—१८१** |
| सर्वकर्मसाधारणानि अङ्गानि | ८० |
| ब्राह्ममुहूर्तकर्तव्यानाम् उपक्रम: | ८१ |
| ब्राह्ममुहूर्तप्रबोध: तत्फलं च | ८२ |
| निद्रान्ताचमनादिकम् | ८३ |
| अपररात्रयोग: | ,, |
| योगे तादात्म्यभावनस्य उपपत्ति: | ८४ |
| योगस्वरूपे शाण्डिल्यस्मृति: श्रीकृष्णमुनिश्च | ८७ |
| योगमध्ये श्रान्तौ विश्रमाभ्यनुज्ञा | ,, |
| ब्राह्ममुहूर्ते विशेषकर्तव्यानि, हरिकीर्तनं च | ८७ |
| निर्वेदानुसन्धानम् | ८९ |
| सात्त्विकधृत्यवलम्बनम् | ९० |
| सात्त्विकधृतिप्रकार: | ९१ |
| पाञ्चकालिकधर्माणां स्वयंप्रयोजनत्वम् | ९२ |



| विषया: | पुटाङ्का: |
|---|---|
| निर्विघ्नकैङ्कर्यसिद्धिप्रार्थनम् | ९३ |
| निर्विघ्नकैङ्कर्यसिद्धये गुरुपरम्पराप्रपत्तिपूर्वकहरिध्यानम् | ,, |
| योगान्तर्गतं ध्यानम् | ९४ |
| सप्रणवं व्यूहादिनामसंकीर्तनम् | ,, |
| सन्ध्यापूर्वकालकर्तव्यक्रम: | ९६ |
| स्नानाय निर्गमनं केशवध्यानं च | ९७ |
| विण्मूत्रविसर्जनं शौचविधिश्च | ९८ |
| आचमनं दन्तधावनं च | १०१ |
| स्नानार्हतीर्थम् | १०३ |
| स्नानविधि: | १०४ |
| गौणस्नानानि | ,, |
| सन्ध्योपासनम् अर्घ्यदानं च | १०६ |
| प्राणायाम-गायत्रीजपौ | ,, |
| अष्टाक्षरजप: | १०७ |
| सूर्योपस्थानम् | १०९ |
| आधारशक्त्यादितर्पणम् | ११० |
| स्वसूत्ररीत्यैव सन्ध्या अनुष्ठेया | ,, |
| सन्ध्यार्घ्ये भगवदर्घ्यत्वभावनम् | ११२ |
| सन्ध्यानादरे दोष: | ११३ |
| ब्रह्मयज्ञ: | ,, |
| तीर्थासन्नभगवदालयप्रणाम: | ,, |
| प्रणामप्रकारा: | ११४ |
| भगवत्सेवाप्रकार: | ११६ |
| भगवत्प्रसादस्वीकारप्रक्रिया | ११७ |
| द्वात्रिंशदपचारा: | ११८ |

| विषयाः | पुटाङ्काः |
| --- | --- |
| प्रकारान्तरेण द्वात्रिंशदपचाराः | १२२ |
| प्रातर्होमाभिगमने | १२३ |
| उपादानम् | १२७ |
| उपादानार्हाणि अनर्हाणि च द्रव्याणि | ,, |
| पुष्पेषु वर्ज्यानि अवर्ज्यानि च | १३० |
| उपादाने प्रतिग्रहनियमः | १३४ |
| प्रतिग्रहोपायनियमाः | १३५ |
| पूर्वसिद्धद्रव्यस्य आन्तरगुणोपादानम् | १३६ |
| इज्याव्याख्यानप्रतिज्ञा | १३८ |
| नित्यग्रन्थस्थस्य अथशब्दस्य विवरणम् | ,, |
| परमैकान्तिशब्दार्थः | १३९ |
| परमैकान्तिनां देवतान्तरवर्जनम् | १४० |
| निषेधानुवर्तने समाराधनानर्हत्वम् | १४१ |
| अकर्मण्यतापादका दोषाः | १४३ |
| जात्यादिनिबन्धनोऽप्यधिकारविशेषः | १४६ |
| स्वाध्यायविधिः | १४७ |
| स्वाध्यायमध्ये गुर्वादिपुरस्कारः | १४८ |
| सायंसन्ध्यादिकम् | १५० |
| महाप्रदोषे मौनाचरणम् | ,, |
| स्वाध्याय-योगयोः अनुयागात् पूर्वमेव समाहृत्यानुष्ठानम् | १५२ |
| योगविधिः | १५८ |
| योगे अनुसन्धेया विषयाः | १५९ |
| योगे गद्यत्रयस्य प्रत्येकमुपयोगविशेषः | १६१ |
| प्रपन्नानामपि योगानुष्ठानम् | १६२ |
| योगस्य पञ्चप्रकारभगवद्रूपविषयत्वम् | ,, |





| विषयाः | पुटाङ्काः |
| --- | --- |
| योगे प्रपन्नस्य अर्चावतारानुसन्धानं मुख्यम् | १६३ |
| सात्त्वताद्युक्तं सायंसन्ध्यादिकम् | १६४ |
| योगस्य यथाशक्त्यनुष्ठेयत्वम् | १६५ |
| भगवत्कैङ्कर्यरूपनिद्रानुभवप्रकारः | १६६ |
| पञ्चकालपरस्य सर्वो व्यापारः कैङ्कर्यरूपः | १६७ |
| पञ्चकालानुष्ठानक्रमस्य क्वचित् अपवादः | ,, |
| आशौचादिष्वपि भगवत्संकीर्तनादि कार्यम् | १६८ |
| ब्रह्मविदामपि आशौचानुष्ठानम् | १७० |
| धर्मानुष्ठानप्रकारस्य दुरूहत्वम् | १७२ |
| भगवत्पूजनस्य नित्यत्व-सुकरत्वादिकम् | ,, |
| नित्यार्चने वैकल्येऽपि दोषाभावः | १७५ |
| भगवदाराधने आन्तरपुष्पादीनां मुख्यत्वम् | १७९ |
| पूर्णानुष्ठातुः समाहृत्यानुष्ठातुश्च तुल्यफलत्वम् | १८० |
| ग्रन्थानां ग्रन्थकर्तॄणां च वर्णानुक्रमणिका | १८३ |
| तत्तद्ग्रन्थ-ग्रन्थकर्तृनामनिर्देशकानां सङ्केताक्षराणां विवरणसूची | १८८ |
| प्रमाणवचनादीनां वर्णानुक्रमणिका | १९१ |

# । शोधनसूची ।

[ग्रन्थमुद्रणानन्तरम् उपलब्धा मुद्रणदोषाः केचन पाठभेदाश्चात्र तेषां ोधितपाठैः सह निर्दिश्यन्ते । ग्रन्थस्यास्य पठनसमये विषया एते पाठकमहाशयैः ाथमतः शोधनीया इति विज्ञाप्यते ।]

| पुटः | पङ्क्तिः | अंशः | शुद्धम् |
|---|---|---|---|
| २ | ७ | अनुपपत्ति | अनुक्ति इति साधीयान् पाठः । |
| ४ | ८ | परस्परशाखा | परशाखा इति साधीयान् । |
| ११ | २० | —" सर्वतन्त्र | सर्वतन्त्र |
| १३ | ५ | नाघिकारः | नाधिकारः |
| ,, | ९ | तन्त्राघिका | तन्त्राधिका |
| १६ | ४ | समाराधनमुच्यते | समाराधनमच्युत इति साधीयान् पाठः । |
| १७ | ९ | कर्म बिम्बानां | कर्मबिम्बानां |
| ३ | ११ | तथा वैखानसे न तु | त्यक्त्वा वैखानसेन तु इति साधीसान् पाठः । |
| ८ | २२ | पवेशो | प्रवेशो |
| ६ | ७ | च्छास्र | च्छास्त्र |
| ८ | ४ | कर्म काल | कर्मकाल |
| ६ | १० | पूर्वी समर्पणीय | पूर्वीसमर्पणीय |
|  | १३ | भाष्याकार | भाष्यकार |
| ९ | १५ | भ्यर्चतं | भ्यर्चनं |
|  | १५ | इति । | इति |
| १ | १३ | चेहा जायते | चेहाजायते |

| पुट: | पङ्क्ति: | भ्रंश: | शुद्धम् |
|---|---|---|---|
| ७४ | १ | देवतार्चन | देवतार्चनं |
| ,, | १३ | उक्तं ज | उक्तं च |
| ७६ | ५ | योगमन्त्रे | योगमन्ते |
| ,, | १७ | स्वाध्याय | स्वाध्याया |
| ७९ | १ | मनुरुन्धन् | मुपरुन्धन् (पाठभेद:) |
| ८१ | १३ | बाह्य | ब्राह्म |
| ८२ | १० | मुहर्त | मूहूर्त |
| ८३ | १४ | विधीगते | विधीयते |
| ८७ | २४ | शयतस्थ | शयनस्थ |
| ८८ | १२ | गजेन्द्रमोक्षकश्चैव | गजेन्द्रमोक्षके च (पाठभेद:)* |
| ,, | १४ | व्याघूर्णन् माल्य | व्याघूर्णन्माल्य |
| ,, | १६ | संहतेर्न: " ॥ | संहतेर्न: ' ॥ इति ।* |
| ९१ | ७ | द्रव्वाणि | द्रव्याणि |
| १०३ | १ | द्वाद्वश | द्वादश |
| १०७ | १० | शोवैष्णव | श्रीवैष्णव |
| ११८ | ५ | कृत्वा योग्यतां | कृत्वायोग्यतां |
| १२४ | ४ | अथवा मुनि: इत्यस्यानन्तरं ' स्ववर्णस्वाश्रमार्हेण विधिना श्रद्धयान्वितः ' इत्येकमर्धं क्वचित् अधिकं दृश्यते ।* | |
| १२५ | १४ | समाराधनं | समिदाधानं (पाठभेदः) |
| १३९ | २ | एवात्रा | एवात्र |
| १४४ | २ | देवी | देवि |
| १४६ | ५ | अष्टा | अष्ट |
| १४७ | ३ | वैभवेऽवि | वैभवीये (पाठभेद:) |
| ,, | ९ | समाना- | समाना |
| १५८ | ४ | तमेवैनं | तमेवैकं |

* एतच्चिह्नयुक्ताः केचन पाठाः ग्रन्थस्यास्य मुद्रणानन्तरं मन्नसालघट्टं श्रीवेङ्कटाचार्यस्वामिनां सविधे विद्यमानात् कोशादुपलब्धाः ।



| पुट: | पङ्क्ति: | भ्रंश: | शुद्धम् |
|---|---|---|---|
| १६७ | ७ | काल इति | काल इति । |
| १६८ | १७ | ' तस्मात् सर्वेषु कालेषु ',' मामनुस्मर ' | ' तस्मात् सर्वेषु कालेषु मामनुस्मर ' |
| १७१ | ९ | ब्रह्मविदथापि | ब्रह्मविदपि इति पाठः साधीयान् । |
| १७४ | १० | पादावने जनात् | पादावनेजनात् |
| १८४ | १६ | संग्रहसर्ता | संग्रहकर्ता |
| १८८ | १४ | तैत्तरीय | तैत्तिरीय |
| ,, | १५ | (एतत्पङ्क्त्याः पूर्वं तै. सं—तैत्तिरीयसंहिता इति योजनीयम् ।) | |
| २०२ | १५ | चतुर्विंशापराधं तु | चतुर्विंशापराधं तं |

## भूमिकायाम्

| पुट: | पङ्क्ति: | भ्रंश: | शुद्धम् |
|---|---|---|---|
| १ | ८ | नातिचिदेव | नातिचिरादेव |
| २ | ५ | व्यक्तिभि: | व्यक्तिविशेषै: |
| ३ | २४ | निदिष्टम् । | निर्दिष्टम् । |
| १५ | ११ | निगमान्तगुरुरोः | निगमान्तगुरोः |
| १६ | २ | ने | ते |
| २४ | ७ | तच | तस्य |

**APPENDIX I**

# INDEX OF HALF-VERSES

अ

अक्षीणं दृगहणिमाननव्यवस्थाम् xi, 15
अखिलं रहस्यमवदज्जनाग्रतः ix, 62
अखिलापगान्तरभिपूरणोत्सुकः ix, 27
अग्रतः प्रचलितस्य खरांशोः viii, 11
अग्रे दृशो विदधतीव जगत्त्रयैक्यम् x, 25
अङ्कनं विरचयन्निव भूयः viii, 9
अङ्के पादावर्पयित्वा रमाया vii, 30
अङ्गजागमलिपेरनुनाम्नो viii, 19
अङ्घ्रयोर्भ्रमादञ्जनमञ्जिताक्षी xii, 7
अज्ञाताशनिपतनादिशाञ्जुलीलाम् xi, 6
अत्यल्पस्यात्तमौखर्यपूर्तेः vii, 10
अतिदीनमर्हति न गाढबन्धनानि ix, 68
अतिरेकतः प्रणयपूरपूरिता ix, 46
अथ दत्तमप्यगमि न श्रवःपदम् ix, 74
अथ दूतिका हरिणशावचक्षुषा ix, 27
अथ नाभिमण्डलसुरङ्गमाविशन् ix, 75
अथ मानिनी रजहिमं समं प्रियैः ix, 57
अथवा कथं नु निगदेदपास्तभीः ix, 22
अथवास्ति चेदयि नताङ्गि सह्यताम् ix, 40
अदसीयबिम्बमधिरम्भितिगम् ix, 67
अद्रीन्द्रस्तदभिहितक्रियास्फुलिङ्गैः xi, 5
अधरं गृहीतवति कामुके हठात् ix, 69
अधरं हठात्कृतवति त्रपामुखोः ix, 71
अधिगण्डमर्पितकराञ्चलच्छलात् ix, 16
अधिगम्य सान्त्वयितुमाशु दूतिका ix, 42
अधिपदमपि विष्णोश्चारयन्गोप्रपश्चान् vii, 59
अधिफालमायतदृशान्ययावृतम् ix, 12
अधिवासशालि मधु योषिता(दा)शयम् ix, 59
अधुना कया विधुतपक्षपातया ix, 47
अध्वश्रान्तामिव निजचमूमग्रतो वीजयन्तीम् xi, 57
अनभिज्ञता परिचितेष्वभिज्ञता ix, 63
अनयोः कदाऽपि विरहो न संभवेत् ix, 1
अनिदानहासमयकौमुदीं दिशन् ix, 61
अनुचिन्तनात्मकमजानती सखीम् ix, 23
अनुद्रुता कामपि (चन) हंसिकाऽस्याः xii, 22
अनुवादतो गृहशुके प्रकाशयति ix, 35
अन्तरिक्षफणसीम्नि विकीर्णैः viii, 37

अन्तर्निश्चितमतिरादरात्सपादो xi, 50
अन्तःपुरस्याविशतोऽवनीन्दोः xii, 29
अन्ते वसन्तमपसारितपाशबन्धम् x, 12
अन्धकारभरकर्दमजातैः viii, 38
अन्धकारविजयादमृतांशोः viii, 68
अन्यश्चमूनिबिडितानविषह्यमार्गान् x, 35
अन्यं कश्चित्त्वां विनाम्नाय मार्गा vii, 42
अपदिश्य किञ्चन सखीषु गत्वरीषु ix, 73
अपदे मदेन हसितञ्च रोदनम् ix, 63
अपराधजातमधिरोपयन्तु मयि ix, 40
अपरा सखीमभिनवामिवादरात् ix, 26
अपरेत्य संशयमवेत्य हंसिका ix, 37
अपहृत्यवैरमितरेतराश्रितम् ix, 15
अपालयत तत्क्षणादभयहस्तचक्रोदयात्
xi; 56
अपि तत्कलाश्रयमजीजयद्यतः ix, 13
अपि दीपिकार्चिषि मुहुस्स तर्जनम् ix, 63
अपि मुक्त एष कुरुते न किं व्यथाम् ix, 51
अपि विप्रयोगमधिगम्य भाविनम् ix, 31
अबलास्वलङ्कृतितरङ्गितादरा ix, 16
अभिके तवाभिरतिरस्तु वा न वा ix, 48
अभ्येतुं जिगमिषुमैक्यतः प्रस्थात् xi, 26
अभ्येत्य प्रतिघमधीश्वरश्शकानाम् xi, 19
अभ्रश्रियैव विजिहीषति भानुमालिनि x, 14
अम्बरे नवयवाञ्चितलाक्षा viii, 45
अम्भः क्रीडारम्भिणो दिङ्मदेभा vii, 7
अम्भोजिनीपरिषदः किमिहानुकुर्वन्ति x, 10
अम्भोवाहानम्बुपातुं समेतान् vii, 9
अम्भोवाहानर्भकानङ्कभाजो vii, 2
अयि किं बिभेषि भवदन्तिके सखी ix, 67
अयि खेदखिन्न युवयोरमेलनम् ix, 50
अयि नैव वाञ्छति परामसौ तथा ix, 45
अयि मार्ज्यते लगति चेदपाङ्ग इति ix, 68
अयि मां विबोधयसि मोहजल्पितानि
ix, 24
अरुन्ध यान्तीं बत मध्यमस्या xii, 4
अर्कहेमकलशेर्णवमग्ने viii, 43
अर्घ्योदकानि महसामधिपाय दातुम् x, 10
अर्दितस्य किरणैरहिमांशोः viii, 55
अर्दितस्य जगतस्तिमिरौघैः viii, 41
अर्यम्णो हरिति तथा यथांशु धोरणी xi, 2
अलक्तरागादपि रक्तिमानम् xii, 34
अलघुस्तनस्पृशि ततो नवा वधूः ix, 69
अलसालसालपित वर्णसन्ततेः ix, 62
अवलम्ब्य रोमलतिकामवातरत् ix, 75
अवलोकयेत्प्रियमनेनसंलपेत् ix, 26
अवलोक्य हंसकुलमञ्चितैर्गतैः ix, 5
अवितुं मनोजनिधिमात्तवेष्टनः ix, 7
असन्निपत्यायतलोचनानाम् xii, 24
अस्तशैलतटकाननलीनैः viii, 11
अस्त्रौघैरपि निवारिताक्रमासीत् xi, 36
अस्माकं परिभव इत्यपाङ्गितरसन् xi, 40
अंशुकन्दलरसादमृतांशोः viii, 34
अंशुमालिनि विशल्यपराञ्चिम् viii, 28
अंशुसन्ततिरशीतमरीचेः viii, 3

आ

आकर्ण्य कर्णमधुरामिति मागधोक्तिम् x, 20
आकृष्टकोदण्डमनुद्रुता किम् xii, 33
आकृष्टासीत्कर्कशेनार्ककन्या vii, 53



आक्रन्दन्तः स्वैरमन्तस्त्रपन्ते vii, 6
आक्रम्य त्वद्राज्यमाजानसिद्धम् vii, 25
आगच्छदेतदधिकं न खलु व्यरंसीत् x, 28
आच्छिद्य कङ्कणनियन्त्रितमङ्घ्रिसूत्रम्
x, 38
आजानेयस्याङ्घ्रिनिर्घातधारा vii, 57
आततान भुवनान्तरयात्रा viii, 7
आतन्वन्नयमयथातथं यथावत् xi, 20
आतन्वन्नर्मगोष्ठीं कविभिरविरतामच्युत-
क्षोणिपालः xii, 39
आत्तवत्युदयम्बुजबन्धौ vii, 2
आत्मन्याराद्न्तरीयायमाने vii, 12
आत्मीयैरभिमतभाषिभिस्सदस्यैः xi, 52
आदरेण कुसुमैरिव कीर्णैः viii, 36
आनङ्गमस्त्रं किमलङ्घयेताम् xii, 37
आनन्दाब्धौ क्रीडति स्माङ्गलक्ष्माम् vii, 58
आनन्देनोत्तालभभ्रान्तसंवित् vii, 29
आनम्रानवतितमां क्षमाभृदस्मान् xi, 51
आनम्रीभवदतिनम्रपूर्वकायः xi, 55
आनीलानामङ्गभासां विलासात vii, 32
आनृत्यत्तुरगखुराभिघातहस्ति xi, 36
आबद्धभ्रुकुटिरयं वितानमालाम् xi, 18
आबद्धाः परिशिथिलातपत्रकूर्मैः xi, 39
आबुद्धय तथ्यमिति कूटकृतं भटानाम् x, 30
आभोगवत्प्रथमशैलकुचाग्रलीनम् x, 18
आभोगिनं मेखलया कुचाग्रिम् xii, 5
आमील्यन्मीनदृगक्षि काचित् xii, 14
आयतान्किमपि दीधिति दण्डान् viii, 4
आयातो विजयमनोरथाधिरूढो xi, 45
आयान्तीमथ यवनावनीशसेनाम् xi, 29
आयान्ती स्वयमवनीव यावनीयम् xi, 25
आरादालोक्यैनमौत्सुक्यभाजः vii, 23
आराधितोऽथ प्रतिमामनोभूः xii, 21
आराध्या ते तावदाज्ञेति चोक्त्वा vii, 27
आरुह्य द्रुतमपरेऽपतञ्छकानाम् xi, 8
आरूढवाहनिवहैरनुबद्धरागम x, 21
आरोपिता तुरगमाशु नियम्य कण्ठम् x, 31
आर्द्रासृक् तुमुल निषद्वरावसीदत् xi, 34
आलक्ष्यतः क्षितिधराक्रमणापदेशात x, 25
आलम्बं त्वामन्तरेण श्रुतीनाम् vii, 41
आलम्ब्यायतपृथुशुण्डयाङ्घ्रिकाण्डे xi, 35
आलवालमनुरागलतायाः viii, 54
आलापभङ्गिभिरतीव तरङ्गिताभिः x, 44
आलिप्तमूर्धसि गवांकुलमञ्चपङ्कैः x, 42
आलीढांबरमपदिश्य धूमजालम् xi, 11
आलोकनायाऽस्य निरस्य कार्यम् xii, 1
आलोकिन्नवदसृजारुणोश्वसादी xi, 45
आलोक्य क्षितिपमणेरथायुधीयैः xi, 1
आलोक्य दूरमितरेतरमश्रुयोगात् x, 7
आवर्तकर्णविवरार्पितफेनकूल x, 22
आविर्मिथः कलकलारवमन्तराले x, 29
आविश्याहतविमतेषु ते बलानाम् xi, 9
आवृते तमसि गाढमधस्तात् viii, 16
आशङ्क्य धावनमरातिमहीपतीनाम् x, 26
आशङ्क्य स्वयमनुरागिणीं नरेन्द्रे xi, 15
आशान्तदिग्गजमदाम्बुविलम्बिनिर्यत्
x, 27
आशाभागानीषदाक्रम्य भूयो vii, 3
आशास्वहंप्रथमिकोल्लसितैरनीकिनि x, 26
आशां कुबेरभरितामवगाहमानः x, 46

आश्लिष्यति स्वमचिरेण हरिद्विलारे: x, 18
आश्लेषविच्युतिसहानवकल्प्य मुग्धान् x, 9
आसाद्यासावाद्यमभ्यर्च्यपुष्पै: vii, 34
आसाद्योर्वीनायकस्यौपकार्याम् vii, 15
आसीदति क्ष्माभुजि काचिदन्त: xii, 19
आस्फाल्यान्तर्बिम्बितादिन्दुकोणात् vii, 8
आस्वाद्य तोयमधिवर्त्म जनानजस्रम् x, 27
आस्वाद्य पूर्वमविशङ्कमभीशुमिन्दो: x, 2
आहन्ति कोऽपि कशया न पुनर्युगान्ते x, 43

इ

इतरस्त्रियस्सरस यावकार्पणात् ix, 8
इतरस्त्रिया वदनमिन्दुमण्डलम् ix, 13
इति दूतिका हृदयहारिणीगिरा ix, 38
इति मे न सूक्तिपटिमावगम्यताम् ix, 44
इतीव मौग्ध्यादितरा ययाचे xii, 15
इत्युक्त्वा परिषदमीशिता हयानाम् xi, 23
इत्युक्त्वाऽसावेतदीयानुमत्या vii, 16
इत्येतस्य प्रायशो हेतुरासीत् vii, 46
इत्येव तानि परिहृत्यवलन्ति मन्दम् x, 13
इत्वरीजनहितं करवाणी viii, 15
इत्वरीभिरपि चत्वरकोणे viii, 27
इन्दीवराण्युदयदीशितरश्मिहाणाम् x, 13
इन्दुबिम्बनिभनीविविराजत् viii, 66
इन्दुबिम्बमिदमैक्षिविहायो viii, 57
इन्दुरागलहरीहृयहेम्न: viii, 67
इयतीं क्षमेत किमयं विलम्बनाम् ix, 25
इह वेहि वीक्षणमितीरितालिभि: ix, 32

ई

ईर्ष्यया किमुदधौ हरिदैन्द्री viii, 47
ईषत्सहस्व त्वरितोऽस्मि सोऽहम् xii, 12

उ

उच्चण्डान्मण्डलाग्रान् मलिनतरतम: कण्टकान्खण्डयित्वा viii, 72
उच्चैर्भूतं राशिमुच्चावचानाम् vii, 21
उच्छेषीकृतमिदमामिषं हि केनापि xi, 46
उत्क्षिप्य क्षितिकुहरादुपात्तदृप्तै: xi, 1
उत्थितोऽयमितारोद्धृतरश्मि: viii, 43
उत्पलिन्यधिभुवार्पितमङ्के viii, 60
उत्पलेष्विव विकस्वरमुखै: viii, 20
उदञ्चितं न्यञ्चितमुत्तरङ्ग xii, 16
उदरस्य मध्येन पुनर्यथावत् xii, 16
उद्धृतान्युपलमृद्दर्पणेन राम xi, 7
उदयौ जलनिधेरुडुजाने: viii, 41
उपजातमेकमुपरीव बुद्बुदम् ix, 11
उर्वीपुत्र्या योजयित्वा जगत्याम् vii, 11
उर्वीयोषिच्चेलमुत्तंसिपुष्प vii, 1
उर्वीं ममामुद्धरन्ती न केषाम् vii, 48
उर्व्यां दुर्वारोर्मिका कङ्कणाङ्कम् vii, 12
उल्लङ्घ्य वासगृहमासददुत्तमाङ्ग xii, 38

ए

एकस्योपरि शरमेकमेव मुक्त्वा xi, 46
एकं मुक्त्वोर्वीमगुर्वीं दधाना vii, 54
एतत्प्रयातु बलमेतदपि प्रयायात् x, 28
एतन्न पश्यति ममोपरि पातु कोऽपि: x, 40

औ

औत्सुक्येनानीतकक्ष्याविशेष: vii, 15



दार्येणावेदयन्तं किलोर्व्याम् vii, 20

क

कक्ष्यान्तरेऽथ मगधा: करजाग्रयोत् x, 1
कक्ष्यान्तरेषु कलितस्थितिभि: पुरैव x, 21
कमलालिकपटेन तदीयम् viii, 16
कटकेन मौक्तिककरम्बितश्रिया ix, 15
कठिनाशयस्तमिति कापि गर्हणा ix, 20
कथमप्यसौ कमललोचना मम ix, 34
कथयामि किं नु सखि कामिन: कृते ix, 24
कबरीकलापतमसा बिसारिणा ix, 76
कयाऽपि मुग्धेति गवाक्षमेका xii, 36
कर्णायुष्यस्बन्दिभि: काव्यबन्धै: vii, 17
कर्णोत्पलं हस्तमभूत्प्रयान्त्या: xii, 32
कलुषीकृताक्षियुगलेव सा किरति ix, 33
कल्लोलजालधिशिरेण कलेरजाया: x, 45
कश्चिच्छ्वा: कलकलाकुलमेव लोकै: x, 37
कश्चिद्भयेन सह कापथधावितेन x, 33
क्षमसे त्वमाशयमलीकलैष किम् ix, 54
क्षिप्तो भार: शिक्षणादुर्मदानाम् vii, 57
कान्तोपगूढचरमाङ्गतया गजस्य x, 40
कामभूरमणविजययात्रा viii, 66
कारानिभात्कमलकुड्मलतश्चिराय x, 4
कारुण्याम्भोराशिजीमूतमुर्व्या: vii, 33
कालयूनि दिवि कर्षति धाणे viii, 69
किमपि प्रियाय गदितुं प्रियोत्तमा ix, 23
किमयं निरागसि किमङ्गसागसि ix, 49
किमहं वदामि तदिहेति मन्मुखात् ix, 21
किमुत श्रुतं किमुत वीक्षितं कुतोऽपि ix, 34
किमु ताभिवारयितु मायतायतम् ix, 29
किं माधव: किं मदनोऽयमित्थम् xii, 8
किं वाऽयं तव पतिरेष वा किमु स्यात् xi, 12
किं व्यपोहितुमना भृगुपातात् vii, 3
कृतमीरितेन बहुना कृशोदरी ix, 37
कृपणां चिराय कमलेव वार्षिकी ix, 56
कृष्णरूपमपि सङ्कुचदब्जम् viii, 24
कृष्णायां कृतवसतिं दिनैस्सकैश्चित् xi, 49
कृष्णायां न्यचितबलं क्षितौ शमौलि: xi, 52
कुक्षौ निक्षिप्यैव लोकानवन्तम् vii, 43
कुङ्कुमेन रजसा कुलटीनाम् viii, 46
कुचशैलसीमनि कुरङ्गनाभिना ix, 6
कुचशैलसीम्नि कुटिलालका परा ix, 14
कुटिलभ्रुवा कुटजसूनगर्भकम् ix, 9
कुटिलाक्षि शोधयितुमेव मे मन: ix, 52
कुत्रचिन्निलयकोणनिलीने viii, 14
कुरु मे प्रसादमिति कोपनिर्णय: ix, 19
कुसुमेषुणाभिहतगुम्फिताशरा: ix, 29
कूजतस्समपुषन्कुमुदिन्यो viii, 61
कूजति क्वचनकौशिकलोके viii, 7
कूलमुद्रजमलीयत सन्ध्या viii, 51
केचित्स्वामिन्केरलेशप्रयुक्ता: vii, 16
केनाप्यक्ष्णो: नैवलक्ष्मीकृताब्धि: vii, 55
कौमुदीकलशसागरमध्य viii, 56
कौमुदीपयसि कल्पितभूय: viii, 40
कौमुदीहदजुषा हृतमुख्यै: viii, 34
क्रीडतां किमपि कीटमणीनाम् viii, 28
क्रोधाग्नौ हृदि निहितोदयेशकेन्द्रो: xi, 1
क्व गतामतिस्तव रते कृते मनो ix, 4'
क्वापि कलोपचितकूजनघोरणीका x, 9

ग

गतागतानि ग्रथयांबभूवुः xii, 25
गतित्वराकेशगलत्प्रसूनम् xii, 23
गदितुं न गद्गदिकया नृशंसताम् ix, 22
गदितुं प्रियागममुदं समागतो viii, 2
गन्धर्वैर्हेषितरवैर्गजगर्जितैश्च x, 23
गम्भीरध्वनिलघुलोहनालकीर्णा xi, 6
गम्भीराम्भोगाधतत्वं समस्तम् vii, 48
गाण्डीवाङ्कनमपि खाण्डवावतीर्णम् xi, 41
गाधतत्वमधिगत्यगभीरे viii, 4
गीर्वाणावसथगिरेः गरीयसस्स्यात् xi, 22
गोपस्त्रीणां त्वद्भुजङ्गोसि विष्णो vii, 55
गोपालकोऽयममृतं गुरुमप्रमेयम् x, 12

च

चकार बिम्बाधरसाम्यहेतोः xii, 35
चक्रवाकमिथुनस्य सरस्याम् viii, 8
चन्द्रहासः पल्लवं चामराणाम् vii, 18
चञ्चरीककुलझङ्कृतिमन्त्रा viii, 36
चञ्चुकोटिमिषदंशिकयाशा viii, 49
चञ्चुविश्लथबिसाञ्चितमार्गः viii, 9
चञ्चूपुटेषु कलयन्ति चकोरकान्ताः x, 2
चमूमयपयोनिधौ सगरकुञ्जरं साध्वसा
xi, 56
चरमाङ्गमेत्य सहचारिणाऽपरा ix, 41
चर्मान्तप्रतिकलसङ्कुचच्छरीराः xi, 29
चातुर्याद्बटुलमृगेन्द्रशातदंष्ट्रा xi, 27
चालयन्स्वनिनदं भ्रमराली viii, 63
चिन्तामन्तस्त्वन्निबन्धां कदाचित् vii, 38
चुक्रुशुः शकुनयः किमशक्ताः viii, 13

छ

छायया निवव्रुते जगति स्यात् viii, 2

ज

जम्बालमग्नचरणे शकटे चिराय x, 43
जानीमस्ते विस्तृतं जैत्रलक्ष्म्याः vii, 52
जाने शुकं जहिहि खेदमपाशमास्ते x, 38
जेताकश्चिन्मीनलक्ष्मा जगत्याम् vii, 46
ज्योत्स्नापूरैरपारैः विशददशदिशस्स्फूर्तिमत्येव
कीर्त्या viii, 72
ज्योत्स्नाम्बुपूरमपसार्य दिशावकाश x, 5

त

ततान तद्व्याहतयेव सेर्ष्यो xii, 31
तत्राऽपि सङ्कुचददश्छदपीडितोऽभूत् x, 4
तत्रावकाशमनवाप्य तथा विमर्दात् x, 35
तत्त्ववाक्यमिव तारकरूप viii, 23
तत्त्वं तदात्व जनितं स जनोपदिश्य x, 30
तत्स्रुतजतु किलाजनि सन्ध्या viii, 32
तत्सेनावलयितमैक्षिदण्डपाणे xi, 3
तद्दूरोपरिपरिलुनमुण्डषण्डम् xi, 35
तद्दृढस्थितिवशेन तमीशे viii, 53
तद्वैरिव तथा दधुराशाः viii, 69
तन्निर्गतस्तदनु तौलवभूमिपालः x. 46
तन्निश्चयज्ञानकृते किमग्रे xii, 11
तन्त्रविद्गतिपतेर्द्विजराजो viii, 48
तमिमं विहाय तवरूपमीदृशम् ix, 50
तयोः परीक्ष्यातिजवं सदेयो xii, 6
तरुणे गृहाश्रयिणि तत्कृतां व्यथाम् ix, 39
ताडितो नु करतामरसाभ्याम viii, 1





तारकाङ्कुरपयः परिवाहः viii, 65
ते जात्यन्धा ये न पश्यन्ति हि त्वाम्
vii, 40
त्यक्त्वा दैत्यान् त्वज्जुषो जैत्रलक्ष्म्याः
vii, 50
त्रपतेस्म सा तदभिधानशंसने ix, 41

द

दक्षस्याध्वरदलनात्तकक्ष्यमीशम् xi, 41
दत्वा पाणिं दक्षिणं मौलिदेशे vii, 30
दत्वा बलिस्सहरये त्रितयं पदानाम् x, 41
दत्वाहारं देवताभ्योऽवतीर्णम् vii, 22
ददती श्रुती चतुरदूतिकावचसि ix, 17
दयिताजनस्य दृढमानकर्कशे ix, 61
दयिते करस्पृशि दरानुरागयोः ix, 71
दाशेरकत्वरितदर्शनतो महोक्षम् x, 32
दिक्षु विश्लथभवेक्ष्यतरक्षोः viii, 6
दिदृक्षयामुष्य मृगेक्षणाभिः xii, 2
दीपपङ्क्तिरिव भिद्यतमिस्रम् viii, 14
दीपास्सजाड्यमवपत्यदशांशुकान्ते x, 17
दीपिका इव दिशाभिरुदस्तात् viii, 18
दीप्तायां भुजमहसा द्विपेन्द्रहस्तान् xi, 43
दुर्वारा यवनबलस्य धूलिरग्रे xi, 24
दुर्वारैरपि शरतोरणै रणोर्वी xi, 38
दृशमर्पयन्त्यपि च दीपिकार्चिषि ix, 70
दृश्यते स्मतिमिरं दिवसान्ते viii, 15
देदीप्यन्ते भक्तिदिव्याञ्जनेन vii, 37
देया दृष्टिः पूर्वमत्रेति पात्रे vii, 19
देवं दूरादेव देदीप्यमानम् vii, 34
द्योतलं ततमिवोपरि नीतम् viii, 42
द्योमणिर्नह्रत इत्युडुराज viii, 37

ध

धन्यं मान्यं कोपि देवैस्त्वदन्यैः vii, 42
धृत्वागमत्तद्वपुषो विशेषान् xii, 10
धृत्वाऽग्रे यवनशिरांसि दर्शयद्भिः xi, 12
धृत्वा पिञ्छं देवविद्यात्वयाग्रे vii, 56
ध्याता ध्येयः पूजकः पूजनीयः vii, 44
ध्वान्तपङ्क्तिभिरभूयतमेघैः viii, 27
ध्वान्तभूतशमनाय दिनान्त viii, 55
ध्वान्तौघमुद्गरखरांशुखनित्रपातान् x, 5

न

नखश्रिया नाटितकैतवान्तः xii, 27
न च दृश्यते कथमिदं नवं नवम् ix, 48
न तावदन्या मुमुदे नताङ्गी xii, 19
न निवर्तसे पुनरसौ निरागसः ix, 53
न परं तवैव ननु मानविभ्रमः ix, 49
नरेन्द्रवीक्षात्वरया न मार्गम् xii, 7
नर्ममारुतपटस्तटिनीनाम् viii, 57
नवमेखलानिनदनाभ्युदञ्चनम् ix, 78
न विमुच्यते त्वयि नतभ्रुसायकः ix, 50
न व्यलोकि नलिनी परिणेतुः viii, 6
न हि वेद्मिकृत्यमिति मौग्ध्यनाटिका
ix, 20
नाकयोषिदुपभुक्तनखाग्रो viii, 38
नाकसीम्नि नलिनीदलकीर्णैः viii, 40
नाथं भुवो भणितिभिः नयजागरूकम् x, 1
नाथेऽङ्गभारमतनिष्टनतभ्रुवोऽस्या x, 31
नाधारश्चेन्नाथकूर्माकृतिस्ते vii, 47

नाभीभाजो नायकस्योक्तिदेव्या vii, 32
नालीकाक्षत्वत्कनाराचधारा vii, 52
नाळीकाक्ष प्राक्कृताश्नाटयन्ते vii, 9
नासीरसीम्नि चलिता नरपालमौलेः x, 44
निक्षिप्तमात्मनि सुरक्षितमाप्रभातम् x, 17
निखिलफणाधरेन्द्रनयनान्ध्यनिबन्धनकृत्
x, 47
निखिलं निगूहनवचो बहिः स्वयम् ix, 59
निगदामि खेदमिति नैपुणीगिरा ix, 18
निजावमानान्नियतं स तस्याम् xii, 9
निरुन्धती स्वान्तमिवाग्रतस्त्वम् xii, 20
निर्गच्छतां कलकलैर्निबिडं भटानाम् x, 23
निर्गच्छतो निखिलसन्तमसं नियन्तुम् x, 19
निर्भर्त्स्यमानकुलिशारभटीनिरूढिम् x, 22
निर्भिन्दन्निजभुजनैपुणेन सोऽयम् xi, 42
निर्मातुं पुनरपि तान्यथा विधातुम् xi, 47
निर्याते मलुकनिबर्हणाय तस्मिन् xi, 10
निर्व्यूढाहवनियमप्रवर्तनेऽस्मिन् xi, 48
निवेदयन्तीव निजामवस्थाम् xii, 28
निशामयामास नृपं प्रशान्तम् xii, 28
निशाम्य तं दूरितसाम्यमन्तः xii, 14
निश्वासबन्ध इव नीरजलोकबन्धोः x, 15
निस्त्रिंशव्यतिहननस्फुलिङ्गदीपैः xi, 38
निस्त्रिंशैः नृपतिचमूभटा निहन्तुम् xi, 31
निस्सृतैरिव निदाघकणौघैः viii, 39
निःसरत्तिमिरदस्युसहस्रा viii, 33
नीडसीम्नि च निधाय कटाक्षान् viii, 10
नीत्या दण्डं नीयतां कश्चिदेव vii, 25
नीलारविन्ददलवन्दनदामलक्ष्मीम् xii, 38
नूनमुत्पलदलेषु सुमेषोः viii, 63
नृत्यतः पुरहरस्य निटाल viii, 17
नृपागमाकर्णनतः परस्याः xii, 37
नृपालकोत्तंसनिरूढमन्तः xii, 26
नेक्ष्यते दिनपतिर्नलिनीनाम् viii, 12
नेतुः भूजामातुरिष्टानि दातुम् vii, 13
न्यायशास्त्रमिव साध्वनुमान viii, 22

प

पङ्कजेषु वसतिं भ्रमराणाम् viii, 62
पतिरवनेः क्रमेण परिलङ्घ्य निजान्विवयाम्
x, 47
पतिरिव कमलायाः पाथसि क्षीरसिन्धोः
ix, 79
पत्युर्निजस्य परिपालयतीव बोधम् x, 6
पत्युः क्षमायाः पतके सरक्ते xii, 30
पदपङ्क्तिभिः स्वपरिपन्थिपङ्कज ix, 8
पदे पदे कीर्णविभूषणान्या xii, 33
पद्माबन्धो ते हि बाधिर्यवन्तो vii, 40
पद्मिनीततकरं हिमभासा viii, 59
पद्मिनी पतिशुचा मकरन्द viii, 61
पन्थानं कमपि विलङ्घ्य पारसीक xi, 26
परया कयापि मृगनाभिपङ्किले ix, 4
परा कुचाग्रात् पतितामुदार xii, 18
परा त्वरायत्ततया प्रयान्ती xii, 3
परा नृपालोकनपारवश्यात् xii, 34
परिचारिकांसभुवि बाहुवल्लरीम् ix, 17
परिरम्भणे वलयितौ भुजाविव ix, 3
परिश्लथा मण्डनपद्मराग xii, 35
पर्यस्तस्तदुभयसैन्ययोः पराग्रो xi, 54
पर्यस्तहारस्तबकं प्रयान्त्या xii, 29



**तस्य भेदास्तु बहवस्तत्र स्थायिगतान्ब्रुवे ।**
**येषामाद्यन्तयोरेकः स्वरस्ते स्थायिवर्णगाः ॥ ४ ॥**
**प्रसन्नादिः प्रसन्नान्तः प्रसन्नाद्यन्तसंज्ञकः ।**
**ततः प्रसन्नमध्यः स्यात्पञ्चमः क्रमरेचितः ॥ ५ ॥**
**प्रस्तारो ऽथ प्रसादः स्यात्सप्तैते स्थायिनि स्थिताः ।**
**मन्द्रः प्रकरणे ऽत्र स्यान्मूर्च्छनाप्रथमः स्वरः ॥ ६ ॥**
**स एव द्विगुणस्तारः पूर्वः पूर्वो ऽथ वा भवेत् ।**
**मन्द्रः परस्ततस्तारः प्रसन्नो मृदुरित्यपि ॥ ७ ॥**
**मन्द्रस्तारस्तु दीप्तः स्यान्मन्द्रो बिन्दुशिरा भवेत् ।**
**ऊर्ध्वरेखाशिरास्तारो लिपौ त्रिर्वचनात्प्लुतः ॥ ८ ॥**
**मन्द्रद्वयात्परे तारे प्रसन्नादिरुदीरितः ।**
**सं सं सं । (१)**

भिर्नारी काव्ये वा ऽनुप्रासादिभी रसादिस्तद्वत् । तथा चाह भरतः प्रकारान्तरेण—

'शशिना रहितेव निशा विजलेव नदी लता विपुष्पेव ।
अविभूषितेव कान्ता गीतिरलंकारहीना स्यात् ॥' इति ।

**येषामाद्यन्तयोरिति** । येषामलंकाराणामाद्यन्तयोः कलानामुपक्रमोपसंहारयोरेकः स्वरो मूर्च्छनावशेन षड्जादीनां मध्ये यस्तूपक्रान्त उपसंहारे स्थानान्तरगतो ऽपि स एवेत्यर्थः । एतेन स्थायिवर्णादिवृत्तिरेतेषु दर्शिता । अतस्ते स्थायिवर्णगाः स्थाय्यलंकाराः ॥ उक्तेष्वेव मन्द्रादिस्थानेष्वलंकार-

लक्षणार्थं प्रतिमूर्च्छनं तारमन्द्रव्यवहारमन्यथा ऽनेकधा करोति—**मन्द्रः प्रकरण** इति । द्विगुणो ऽष्टमः ॥ ३—८ ॥

(सु०) वर्णमुक्त्वा तदनुगतालंकारलक्षणमाह—**विशिष्टमिति** । केनचिल्लक्षणविशेषेण विशिष्टं वर्णसंदर्भं वर्णसमुदायमलंकारं प्रचक्षते भरतादयः । मतङ्गेनाप्यलंकारस्य लक्षणव्युत्पत्ती कथिते । यथा—"नन्वलंकारशब्देन किमुच्यते, व्युत्पत्तिर्वा तस्य कीदृशी? उच्यते—अलंकारशब्देन मण्डनमुच्यते । यथा कटककेयूरादिना ऽलंकारेण नारी पुरुषो वा मण्डितः शोभामावहेत्तथैतैरलंकारैः प्रसन्नादिभिरलंकृता वर्णाश्रया गीतिर्गातृश्रोतृणां सुखावहा भवतीति । व्युत्पत्तिश्च यथा—'डुकृञ् करणे' इत्यस्माद्धातोरलंशब्दपूर्वाद् घञ्प्रत्यये ऽलंकारशब्दः" इति ॥ तस्य बहुभेदत्वे ऽपि कियतांचित्कथनार्थं प्रतिजानीते—**तस्येति** ॥ स्थायिवर्णालंकाराँल्लक्षयति—**येषामिति** । आदावन्ते च येषामेक एव स्वरस्ते स्थायिवर्णालंकाराः । तान्परिगणयति—**प्रसन्नादिरिति** । एते सप्त स्थायिनि वर्णे स्थिताः, स्थाय्यलंकारा इत्यर्थः ॥ अलंकारप्रकरणोपयोगिनीं परिभाषामाह—**मन्द्र** इति । अत्रास्मिन्नलंकारप्रकरणे मूर्च्छनायाः प्रथमः स्वरो मन्द्रशब्देनोच्यते । स एव मूर्च्छनाप्रथमस्वरो द्विगुणस्तारशब्देनोच्यते । यदा मूर्च्छनाप्रथमस्वरो मन्द्रो भवति तदा स एव मध्यस्तारशब्देनोच्यते । यदा तु मूर्च्छनाप्रथमस्वरो मध्यस्तदा स एव तारस्तारशब्देनोच्यते । विकल्पेनान्यथा मन्द्रतारादिशब्दवाच्यत्वमाह—**पूर्वः पूर्व** इति । पूर्वस्थानस्थः स्वरो मन्द्रः परस्थानस्थस्तार इति । यदा मन्द्रस्थानस्थः पूर्वस्तदा मध्यस्थानस्थस्तारः । यदा मध्यस्थानस्थः पूर्वस्तदा तारस्थानस्थस्तारः । अत्र मूर्च्छनाऽऽदिस्वरेणैव पूर्वेण भवितव्यमिति नियमो नास्तीति पूर्वमुक्तात्पक्षाद्भेदः । मन्द्रतारपर्यायानाह—**प्रसन्न** इति । प्रसन्नमृदुमन्द्रशब्दैर्मन्द्रो ऽभिधीयते । दीप्ततारशब्दाभ्यां तारः । मन्द्रतारयोर्लिपिविशेषं कथयति—**मन्द्र** इति । लिपौ मन्द्रः स्वरो बिन्दुशिराः शिरसि बिन्दुसहितो लेखनीयः, तारस्तु शिरस्यूर्ध्वरेखया सहितः । त्रिर्वचनात्स्वरः प्लुत इत्युच्यते । स त्रिरुच्चारणीय इत्यर्थः ॥ ३—८ ॥



**तद्वैलोम्ये प्रसन्नान्तः**

सं सं सं । (२)

**प्रसन्नद्वयमध्यगे ॥ ९ ॥**

**दीप्ते प्रसन्नाद्यन्तः स्यात्**

सं सं सं । (३)

**तारयोर्मध्यगे पुनः ।**

**मन्द्रे प्रसन्नमध्याख्यमलंकारं विदो विदुः ॥ १० ॥**

सं सं सं । (४)

**आद्यन्तयोर्मूर्च्छनाऽऽदिश्चेत्स्वरो ऽन्तर्द्वितीयकः ।**
**सैका कला ऽथ चेन्मध्ये स्तस्तृतीयचतुर्थकौ ॥ ११ ॥**
**सा द्वितीया पञ्चमाद्यास्त्रयो ऽन्तश्चेत्कला परा ।**
**एवं कलात्रयेणोक्तो ऽलंकारः क्रमरेचितः ॥ १२ ॥**

(क०) उद्देशक्रमेण त्रिषष्टिमलंकारान्दर्शयति—**मन्द्रद्वयात्पर** इत्यादिना **त्रिषष्टिरुदिता मयेत्यन्तेन** । इह ग्रन्थकारेण दिङ्मात्रप्रदर्शनार्थमुत्तरमन्द्रामधिकृत्य प्रसिद्धालंकाराणां प्रस्तारो लिखितः । तद्वन्मूर्च्छनाऽऽन्तरेष्वप्यलंकारप्रस्तारा द्रष्टव्याः ॥ ९—६३ ॥

(सु०) प्रसन्नादिं लक्षयति—**मन्द्रद्वयादिति** । मन्द्रस्वरद्वयमुच्चार्य यदि सकृत्तारस्वर उच्चार्यते तदा प्रसन्नादिरलंकारः । **तद्वैलोम्य** इति । तस्य प्रसन्नादेर्विपरीतत्वे पूर्वं सकृत्तारः पश्चाद् द्विर्मन्द्रश्चेत्, तदा प्रसन्नान्तः । **प्रसन्नद्वयेति** । यदि पूर्वं मन्द्रः पश्चाद्दीप्तः पुनरपि मन्द्रस्तदा प्रसन्नाद्यन्तः । **तारयोरिति** । यदि पूर्वं तारः पश्चान्मन्द्रः पुनरपि तारस्तदा प्रसन्नमध्यः ॥ ९, १० ॥ क्रमरेचितं लक्षयति—**आद्यन्तयोरिति** । मूर्च्छनायाः प्रथमः स्वरो यद्यादावन्ते च तिष्ठति, द्वितीयः स्वरो मध्ये, एवमेका कला; द्वितीयकलायां तु मूर्च्छनाप्रथमस्वर एवा-

संरिसं संगमसं संपधनिसं । (५)
दीप्तान्तश्चेत्प्रतिकलं प्रस्तारः सो ऽभिधीयते ।
संरिसं संगमसं संपधनिसं । (६)
तारमन्द्रविपर्यासात्तं प्रसादं प्रचक्षते ॥ १३ ॥
संरिसं संगमसं संपधनिसं । (७)

इति स्थायिगतालंकाराः ।

स्यातां विस्तीर्णनिष्कर्षौ बिन्दुरभ्युच्चयः[1] परः ।
हसितप्रेङ्खिताक्षिप्तसंधिप्रच्छादनास्तथा ॥ १४ ॥
उद्गीतोद्वाहितौ तद्वत्त्रिवर्णो वेणिरित्यमी ।
द्वादशारोहिवर्णस्थालंकाराः परिकीर्तिताः ॥ १५ ॥
मूर्च्छनाऽऽदेः स्वराद्यत्र क्रमेणारोहणं भवेत् ।
स्थित्वा स्थित्वा स्वरैर्दीर्घैः स विस्तीर्णो ऽभिधीयते ॥ १६ ॥
सा री गा मा पा धा नी । (१)

द्यन्तयोः, मध्ये तृतीयचतुर्थौ ; तृतीयस्यां तु कलायां प्रथमः स्वर एवाद्यन्तयोः, मध्ये पञ्चमषष्ठसप्तमस्वराः ; एवं कलात्रयेण क्रमरेचितो ऽलंकारो भवति ॥११, १२॥ दीप्तान्त इति । क्रमरेचितस्य तिसृष्वपि कलासु यद्यन्तिमो दीप्तो भवति तदा प्रस्ताराख्यो ऽलंकारः ॥ १२- ॥ तारेति । प्रस्तारस्य तारमन्द्रविपर्यासात्प्रसादालंकारः । क्रमरेचितस्य कलात्रये पूर्वस्तारो ऽन्तिमस्तु मन्द्र एवेति ॥-१३॥ इति स्थायिगतालंकाराः ॥ आरोह्यलंकारान्परिगणयति—स्यातामिति ॥ १४, १५ ॥ विस्तीर्णालंकारं लक्षयति—मूर्च्छनाऽऽदेरिति । मूर्च्छनायाः प्रथमस्वराद्दीर्घैः स्वरैः स्थित्वा स्थित्वा विलम्ब्य विलम्ब्य क्रमेण यत्रारोहणं भवेत्स विस्तीर्णालंकारः ।

[1] ॰रभ्युच्छ्रयः



ह्रस्वैः स्वरैः स निष्कर्षो द्विर्द्विरुक्तैर्निरन्तरैः ।
सस रिरि गग मम पप धध निनि । (२)
त्रिश्चतुर्वा स्वरोच्चारे गात्रवर्णमिमं विदुः ॥ १७ ॥
ससस रिरिरि गगग ममम पपप धधध निनिनि ॥
सससस रिरिरिरि गगगग मममम पपपप धधधध निनिनिनि । (२)
निष्कर्षस्यैव भेदौ द्वौ केचिदेतौ बभाषिरे ।
प्लुतं ह्रस्वं प्लुतं ह्रस्वं प्लुतं ह्रस्वं प्लुतं स्वरम् ॥ १८ ॥
कुर्वन्क्रमाद्यदा ऽऽरोहेत्तदा बिन्दुरयं मतः ।
स३रि ग३म प३ध नि३ । (३)
एकान्तरस्वरारोहमाहुरभ्युच्चयं[1] बुधाः ॥ १९ ॥
सगपनि । (४)
यत्रैकोत्तरवृद्धाभिरावृत्तिभिरुदीरिताः ।
आरुह्यन्ते स्वराः प्राह हसितं तं शिवप्रियः ॥ २० ॥

स्वराणां दीर्घत्वाद्विलम्बितत्वाच्च क्रमाद्भेदः ॥ १६ ॥ ह्रस्वैरिति । ह्रस्वैः स्वरैर्द्विर्द्विरुक्तैः क्रमेणोच्चारितैर्निष्कर्षालंकारः ॥ १६- ॥ त्रिरिति । स्वराणां त्रिश्चतुर्वोच्चारणे गात्रवर्णालंकारः ॥ -१७ ॥ मतान्तरेण गात्रवर्णस्य निष्कर्षान्तर्भावमाह—निष्कर्षस्यैवेति । एतौ द्वौ भेदौ त्रिश्चतुःस्वरोच्चारणरूपौ ॥ १७- ॥ प्लुतमिति । प्रथमस्वरं त्रिरुच्चार्य द्वितीयस्वरं सकृत्, तृतीयस्वरं त्रिः, चतुर्थस्वरं सकृत्, पञ्चमस्वरं त्रिः, षष्ठस्वरं सकृत्, सप्तमस्वरं त्रिरुच्चारयेत्, तदा बिन्द्वाख्यो ऽलंकारः ॥ -१८, १८- ॥ एकान्तरेति । एकान्तरस्वरारोहणेनाभ्युच्चयाख्यो ऽलंकारः ॥ -१९ ॥ यत्रेति । यत्र स्वराणामेकोत्तरवृद्ध्या ऽऽवृत्तिः, प्रथमः स्वरः सकृत, द्वितीयो द्विः, तृतीयस्त्रिः, चतुर्थश्चतुः, पञ्चमः पञ्चकृत्वः, षष्ठः षट्कृत्वः, सप्तमः सप्तकृत्व उच्चार्यते तमलंकारं शिवप्रियः शार्ङ्गदेवो हसितमिति

[1] ॰रभ्युच्छ्रयम् .

स रिरि गगग मममम पपपपप धधधधधध निनिनिनिनि-
निनिनि । (५)

स्वरद्वयं समुच्चार्य पूर्वं पूर्वयुतं परम् ।
यदान्दोलितमारोहेत्प्रेङ्खितो ऽसौ क्रमो ऽथ वा ॥ २१ ॥

सरि रिग गम मप पध धनि । (६)

एकान्तरं स्वरयुगं तादृक्पूर्वयुतं परम् ।
क्रमादारोहति यदा तदा ऽऽक्षिप्तं प्रचक्षते ॥ २२ ॥

सग गप पनि । (७)

त्रिस्वरा ऽऽद्या कला ऽन्ये च पूर्वपूर्वान्तिमादिमे ।
कले स्तस्त्रिस्वरे यत्र संधिप्रच्छादनस्तु सः ॥ २३ ॥

सरिग गमप पधनि । (८)

यदा ऽऽद्यायस्त्रिरावृत्तः कलयोस्त्रिस्वरात्मनोः ।
तदोद्गीतः

सससरिग मममपध । (९)

भूते ॥ २० ॥ स्वरद्वयमिति । पूर्वं स्वरद्वयमुच्चार्य परं पूर्वयुतम्, पूर्वापेक्षया परो द्वितीयः स्वरस्तद्युतं परं तृतीयमारोहेत् । पुनरपि तृतीययुतं चतुर्थं चतुर्थयुतं पञ्चमं पञ्चमयुतं षष्ठं षष्ठयुतं सप्तममान्दोलयन्यदा ऽऽरोहति तदा ऽसावलंकारः प्रेङ्खितनामा ऽथ वा क्रमनामा भवति ॥ २१ ॥ आक्षिप्तं लक्षयति—एकान्तरमिति । पूर्वोक्तरीत्या यदैकान्तरं स्वरयुगमारोहति, प्रथमसहितं तृतीयं तृतीयसहितं पञ्चमं पञ्चमसहितं सप्तमं यदा ऽऽरोहति तदा ऽऽक्षिप्तालंकारः ॥२२॥ संधिप्रच्छादनं लक्षयति—त्रिस्वरेति । आद्या कला त्रिस्वरा, अन्ये द्वे कले पूर्वपूर्वान्तिमादिमे पूर्वस्याः पूर्वस्याः कलाया यो ऽन्तिमः स्वरः स आदिमो ययोस्ते तथाविधे त्रिस्वरे यस्मिन्स त्रिकलः संधिप्रच्छादनः ॥ २३ ॥ उद्गीतं लक्षयति—यदेति । त्रिस्वरयोः कलयोर्यदा ऽऽद्याद्यः स्वरस्त्रिरावर्तते तदोद्गीता-



मध्यमेन तादृशोद्वाहितो मतः ॥ २४ ॥

सरिरिरिग मपपपध । (१०)

अन्त्यस्य तु त्रिरावृत्तौ त्रिवर्णं वर्णयन्त्यमुम् ।

सरिगगग मपधधध । (११)

त्रयाणां तु त्रिरावृत्तौ पृथग्वेणिरुदीरितः ॥ २५ ॥

ससस रिरिरि गगग, ममम पपप धधध । (१२)

इत्यारोह्यलंकाराः ।

अवरोहक्रमादेते द्वादशाप्यवरोहिणि ।

इत्यवरोह्यलंकाराः ।

मन्द्रादिर्मन्द्रमध्यश्च मन्द्रान्तः स्यादतः परम् ॥ २६ ॥
प्रस्तारश्च प्रसादो ऽथ व्यावृत्तस्खलितावपि ।
परिवर्ताक्षेपबिन्दूद्वाहितोर्मिसमास्तथा ॥ २७ ॥
प्रेङ्खनिष्कूजितश्येनक्रमोद्घट्टितरञ्जिताः ।
संनिवृत्तप्रवृत्तो ऽथ वेणुश्च ललितस्वरः ॥ २८ ॥

ख्यो ऽलंकारः । एतस्मिन्नलंकारे मूर्च्छनायाः षडेव स्वरा व्याप्यन्ते । सप्तमस्य समाप्तिर्नास्ति ॥ २३- ॥ अधुनोद्वाहितं वर्णयति—मध्यमेनेति । त्रिस्वरयोः कलयोर्मध्यमेन स्वरेण तादृशा त्रिरावृत्तेन तूद्वाहिताख्यो ऽलंकारः ॥ -२४ ॥ त्रिवर्णं लक्षयति—अन्त्यस्येति । त्रिस्वरयोः कलयोरन्त्यस्य त्रिरावृत्तौ त्रिवर्णाख्यो ऽलंकारः ॥ २४- ॥ पृथग्वेणिमाचष्टे—त्रयाणामिति । त्रिस्वरयोः कलयोस्त्रयाणामपि स्वराणां त्रिरावृत्तौ पृथग्वेणिरलंकारः । एतेषु त्रिष्वप्यलंकारेषु सप्तस्वरावृत्तिर्नास्ति ॥ -२५ ॥ इत्यारोह्यलंकाराः ॥ अवरोह्यलंकाराँल्लक्षयति—अवरोहेति । एत एवावरोहक्रमेणोच्चारिता अवरोह्यलंकारा भवन्ति ॥ २५- ॥ इत्यवरोह्यलंकाराः ॥ संचार्यलंकारान्परिगणयति—मन्द्रादिरिति । मन्द्राद्यादयः

हुंकारो ह्रादमानश्च ततः स्यादवलोकितः ।
स्युः संचारिण्यलंकाराः पञ्चविंशतिरित्यमी ॥ २९ ॥
त्रिस्वरा ऽद्या कलैकैकमन्द्रत्यागेन चापराः ।
त्रिस्वराश्चेत्कला मन्द्राद्या मन्द्रादिस्तदा भवेत् ॥ ३० ॥
सगरि रिमग गपम मधप पनिध । (१)
ताः कला मन्द्रमध्यान्ताः क्रमाच्चेदपरौ तदा ।
मन्द्रमध्यो यथा—
गसरि मरिग पगम धमप निपध । (२)
मन्द्रान्तो यथा—
रिगस गमरि मपग पधम धनिप । (३)
त्यक्तान्तरं स्वरयुगं त्यक्तादारभ्यते पुनः ॥ ३१ ॥
युगं तादृक्समारोहेत्तदा प्रस्तार उच्यते ।
सग रिम गप मध पनि । (४)
पूर्वः पूर्वः परस्योर्ध्वाधोवर्ती क्रियते स्वरः ॥ ३२ ॥

पञ्चविंशतिरलंकाराः संचारिणः ॥ -२६–२९ ॥ तत्र मन्द्रादिं लक्षयति—त्रिस्वरेति । आद्या कला त्रिस्वरा प्रथमतृतीयद्वितीयस्वरयुक्ता, अन्या अपि मन्द्राद्याः कला एकैकमन्द्रत्यागेन यदि भवन्ति तदा मन्द्रादिरलंकारः ॥ ३० ॥ मन्द्रमध्यमन्द्रान्तौ लक्षयति—ता इति । तास्वेव पञ्चसु कलासु मन्द्रो मध्ये भवति चेन्मध्यश्चादौ तदा मन्द्रमध्यो ऽलंकारः । तास्वेव मन्द्रो ऽन्ते भवति चेदन्तिमश्चादौ तदा मन्द्रान्तो ऽलंकारः ॥ ३०- ॥ प्रस्तारं लक्षयति—त्यक्तान्तरमिति । त्यक्तान्तरं स्वरयुगं प्रथमतृतीयस्वरयुगमारुह्य त्यक्ताद् द्वितीयस्वरादारभ्य तादृक्त्यक्तान्तरं स्वरयुगं द्वितीयचतुर्थस्वरयुगम्, एवं तृतीयपञ्चमस्वरयुगं चतुर्थषष्ठस्वरयुगं पञ्चमसप्तमस्वरयुगं च यद्यारोहति तदा प्रस्ताराख्यो ऽलंकारः ॥ -३१, ३१- ॥ प्रसादं लक्षयति । पूर्व इति । पूर्वः पूर्वः स्वरः



यदा तदा प्रसादं तमाह श्रीकरणेश्वरः ।
सरिस रिगरि गमग मपम पधप धनिध । (५)
चतुःस्वरा कला तत्राद्यात्तृतीयं द्वितीयकात् ॥ ३३ ॥
तुर्यं गत्वा ऽऽदिमं गच्छेदेवमेकैकहानतः ।
चतुःस्वराः परा यत्र स व्यावृत्तः स्मृतो बुधैः ॥ ३४ ॥
सगरिमस रिमगपरि गपमधग मधपनिम । (६)
कलां प्रयुज्य मन्द्रादेर्द्विरुक्तोर्ध्वस्वरान्विताम् ।
अवरुह्येत चेदेष स्खलिताख्यस्तदा भवेत् ॥ ३५ ॥
सगरिममरिगस रिमगपपगमरि गपमधधमपग
मधपनिनिपधम । (७)
स्वरं द्वितीयमुज्झित्वा त्रिस्वरा ऽऽद्या कला यदि ।
त्यक्तादारभ्य तादृश्यो ऽन्यास्तदा परिवर्तकः ॥ ३६ ॥
सगम रिमप गपध मधनि । (८)
त्रिस्वराश्चेत्कलाः पूर्वपूर्वत्यागोर्ध्वसंक्रमैः ।

परस्य द्वितीयस्वरस्योर्ध्वाधोवर्त्याद्यन्तवर्ती यदि क्रियते तदा प्रसादाख्यो ऽलंकारः ॥ -३२, ३२- ॥ व्यावृत्तं लक्षयति—चतुःस्वरेति । एतस्मिन्कला चतुःस्वरा । तस्याः प्रथमतृतीयद्वितीयचतुर्थाद्याः स्वरा उच्चार्याः, प्रथमस्वरपरित्यागेनान्यदेवमेव कलात्रयं यत्र स व्यावृत्ताख्यो ऽलंकारः ॥ -३३, ३४ ॥ स्खलितं लक्षयति—कलामिति । मन्द्रादेरलंकारस्य प्रथमतृतीयद्वितीयस्वरयुक्तां त्रिस्वरां कलां प्रयुज्योर्ध्वं स्वरं चतुर्थं स्वरं द्विरुच्चार्य सकलावरोहेण चेदुच्चार्येत तदा ऽष्टस्वरकलः स्खलिताख्यो ऽलंकारः ॥ ३५ ॥ परिवर्तकं लक्षयति—स्वरमिति । द्वितीयस्वरमुज्झित्वा प्रथमतृतीयचतुर्थस्वरैस्त्रिस्वरा प्रथमा कला, त्यक्ताद् द्वितीयस्वरादारभ्यैवमेवान्याः कला यत्र स परिवर्तकाख्यो ऽलंकारः ॥३६॥ आक्षेपं लक्षयति—त्रिस्वरा इति । त्रिस्वराः कलाः पूर्वपूर्वपरित्यागेनोर्ध्वस्वर-

तदा ऽऽक्षेपः

सरिग रिगम गमप मपध पधनि । (९)

अथ बिन्दुः स यत्र प्लुतमधःस्वरम् ॥ ३७ ॥

कृत्वा ऽग्निवत्परं स्पृष्ट्वा ऽधः स्पर्शेनाखिलाः कलाः ।

स३रिस रि३गरि ग३मग म३पम प३धप ध३निध । (१०)

कलायां त्रीन्स्वरान्गीत्वा ऽवरुह्यैकं पराः कलाः ॥ ३८ ॥

यत्रैकैकोज्झिता गीतास्तद्वदुद्वाहितस्तु सः ।

सरिगरि रिगमग गमपम मपधप पधनिध । (११)

मूर्च्छनाऽऽदेः स्वरात्तुर्यं प्लुतीकृत्याद्यमेत्य च ॥ ३९ ॥

तुर्यगाने कलैकैकहानाद्यत्रापरास्तथा ।

स ऊर्मिः स्यात्

सम३सम रिप३रिप गध३गध मनि३मनि । (१२)

स तु समः कला यत्र चतुःस्वराः ॥ ४० ॥

व्याप्त्या च यदि क्रियन्ते तदा ऽऽक्षेपालंकारः ॥ ३६- ॥ बिन्दुं लक्षयति—**अथ बिन्दुरिति** । अधःस्वरं पूर्वस्वरं प्लुतं कृत्वा त्रिरुच्चार्य परं द्वितीयमग्निवत्सकृत्स्पृष्ट्वा ऽऽधः सकृदुच्चारणीयः । एवं द्वितीयस्वराद्याः पञ्चस्वराः कला यत्र स बिन्द्वाख्यो ऽलंकारः ॥ -३७, ३७- ॥ उद्वाहितं लक्षयति—**कलायामिति** । त्रीन्स्वरान्गीत्वैकं स्वरमवरोहेत ; पूर्वस्वरपरित्यागेनैवमेव द्वितीयस्वराद्या अन्याः कलास्तदोद्वाहिताख्यो ऽलंकारः ॥ -३८, ३८- ॥ ऊर्मिं लक्षयति—**मूर्च्छनाऽऽदेरिति** । मूर्च्छनाऽऽदेः स्वरात्तुरीयं चतुर्थं स्वरं प्लुतीकृत्य त्रिरुच्चार्याद्यं सकृद्गीत्वा पुनरपि चतुर्थं स्वरं सकृद्गायेत् , प्रथमस्वरपरित्यागेन चैवमेवान्याः कला यत्र स ऊर्म्यलंकारः ॥ -३९, ३९- ॥ समं लक्षयति—**स तु सम इति** । यस्मिन्कलायां चत्वारः स्वराः क्रमेणारुह्यन्ते ऽवरुह्यन्ते च, अन्या अपि

[1] इग्निमस्वरं,



तुल्यारोहावरोहैकैकहानादपरास्तथा ।

सरिगममगरिस रिगमपपमगरि गमपधधपमग मपधनिनिधपम । (१३)

कला गतागतवती द्विस्वरैकैकहानतः ॥ ४१ ॥

यत्रान्यास्तादृशः स स्यात्प्रेङ्खः

सरिरिस रिगगरि गममग मपपम पधधप धनिनिध । (१४)

निष्कूजितः पुनः ।

प्रसादस्य कलां गीत्वा तत्कलाऽऽदेस्तृतीयकम् ॥ ४२ ॥

गत्वा ऽऽद्यगानाद्भवति

सरिसगस रिगरिमरि गमगपग मपमधम पधपनिप । (१५)

श्येनः संवादियुग्मकैः ॥ ४३ ॥

क्रमात्सरिगमाद्यैः स्यात्

सप रिध गनि मस । (१६)

कला द्वित्रिचतुःस्वराः ।

आद्यस्वराद्यास्तिस्रः स्युर्द्वितीयाद्यादयस्तथा ॥ ४४ ॥

यत्रासौ क्रम इत्युक्तः

कलाः प्रथमैकैकस्वरपरित्यागेन, स समाख्यो ऽलंकारः ॥ -४०, ४०- ॥ प्रेङ्खं लक्षयति—**कलेति** । द्विस्वरा कला, गतागते आरुह्यते ऽवरुह्यते चेत्यारोहावरोहौ तद्वती, प्रथमैकैकस्वरपरित्यागाच्चान्याः कला यत्र स प्रेङ्खो ऽलंकारः ॥ -४१, ४१- ॥ निष्कूजितं लक्षयति—**निष्कूजित इति** । प्रसादालंकारस्य कलां प्रथमद्वितीयस्वरयुक्तां गीत्वा ऽऽदिस्वरात्तृतीयं तत आद्यं यदि गायेत्तदा निष्कूजितालंकारः ॥ -४२, ४२- ॥ श्येनं लक्षयति—**श्येन इति** । संवादिनां युग्मचतुष्टयेन षड्जर्षभगांधारमध्यमादिना श्येनालंकारः । अत्र षड्जपञ्चमयोर्ऋषभधैवतयोर्गांधारनिषादयोर्मध्यमषड्जयोश्च युग्मचतुष्टयम् ॥ -४३, ४३- ॥ क्रमाख्यमलंकारं

सरिसरिगसरिगम रिगरिगमरिगमप गमगमपगमपध
मपमपधमपधनि । (१७)

स तूद्धट्टित उच्यते ।
यत्र स्वरद्वयं गीत्वा पञ्चमाच्चतुरः स्वरान् ॥ ४५ ॥
अवरोहेत्कला गायेत्तथैकैकोज्झनात्पराः ।

सरिपमगरि रिगधपमग गमनिधपम । (१८)

द्विरुक्ता यदि मन्द्रान्ता मन्द्रादेः स्युः कलास्तदा ॥ ४६ ॥
रञ्जितः

सगरिसगरिस रिमगरिमगरि गपमगपमग मधपमधपम
पनिधपनिधप । (१९)

अथ भवेदेष संनिवृत्तप्रवृत्तकः ।
यत्राद्यपञ्चमौ गीत्वा तुर्यात्त्रीनवरोहति ॥ ४७ ॥
क्रमात्कला सा यत्रान्यास्तद्वदेकैकहानतः ।

सपमगरि रिधपमग गनिधपम । (२०)

लक्षयति—कला इति । प्रथमस्वरमारभ्य तिस्रः कला गेयाः । एका द्विस्वरा, एका त्रिस्वरा, एका चतुःस्वरा । एवं द्वितीयतृतीयचतुर्थस्वरमारभ्य तिस्रः कला यत्र गीयन्ते स क्रमाख्यो ऽलंकारः ॥ -४४, ४४- ॥ उद्घट्टितं लक्षयति—स त्विति । आदित आरभ्य स्वरद्वयं गीत्वा पञ्चमस्वराच्चतुरः स्वरानवरोहेत् , एवं द्वितीयं तृतीयं च स्वरमारभ्येत्येवं कलात्रयं यत्र स उद्घट्टिताख्यो ऽलंकारः ॥ -४५, ४५- ॥ रञ्जितं लक्षयति—द्विरुक्ता इति । मन्द्रादेः प्रथमतृतीयद्वितीयस्वरयुक्तस्य कला यदि द्विरुच्चार्यंते, अन्ते च मन्द्रो मूर्च्छनाप्रथमस्वरो निक्षिप्यते, तदा रञ्जिताख्यो ऽलंकारः ॥ -४६, ४६- ॥ संनिवृत्तप्रवृत्तकं लक्षयति—अथ भवेदिति । यत्र प्रथमं पञ्चमं च स्वरं गीत्वा तुर्यात्स्वरात्त्रीन्स्वरानवरोहेण गायेत् , एवमेका कला, प्रथमैकैकस्वरपरित्यागाच्चान्यत्कलाद्वयम् , स संनिवृत्तप्रवृत्ताख्यो



यत्राद्यः स्याद् द्विर्द्वितीयचतुर्थकतृतीयकाः ॥ ४८ ॥
सकृत्कला ऽन्याश्चैकैकहानाद्वेणुरसौ मतः ।

ससरिमग रिरिगपम गगमधप ममपनिध । (२१)

गीत्वा ऽऽद्यौ द्वौ चतुर्थं च यस्यां ताववरोहति ॥ ४९ ॥
सा कला ऽन्याश्च तादृश्यो यत्रासौ ललितस्वरः ।

सरिमरिस रिगपगरि गमधमग मपनिपम । (२२)

आदिमेन कला यत्र द्विस्वरा ऽऽद्या गतागतैः ॥ ५० ॥
स्वरैरेकोत्तरं वृद्धैः स हुंकारो निगद्यते ।

सरिस सरिगरिस सरिगमगरिस सरिगमपमगरिस
सरिगमपधपमगरिस सरिगमपधनिधपमगरिस । (२३)

ह्रादमाने प्रसन्नान्ता मन्द्रादेस्तु कला मताः ॥ ५१ ॥

सगरिस रिमगरि गपमग मधपम पनिधप । (२४)

यदा ऽऽरोहे ऽवरोहे च स्वद्वितीयं परित्यजेत् ।

ऽलंकारः -४७, ४७- ॥ वेणुं लक्षयति—यत्रेति । यस्मिन्नाद्यः स्वरो द्विर्गीयते, द्वितीयचतुर्थतृतीयस्वराश्च सकृद्गीयन्ते सैका कला, प्रथमैकैकस्वरपरित्यागाच्चान्याः कलाः, स वेणुरलंकारः ॥ -४८, ४८- ॥ ललितस्वरं लक्षयति—गीत्वेति । प्रथमस्वरद्वयं गीत्वा तदनन्तरं चतुर्थं गीत्वा तौ प्रथमद्वितीयाववरोहेत् । सैका कला भवति । अन्याश्च द्वितीयतृतीयतुर्यस्वराद्यास्तिस्रः कलाः । स ललितस्वराख्यो ऽलंकारः ॥ -४९, ४९- ॥ हुंकारं लक्षयति—आदिमेनेति । आदिमेन प्रथमेन स्वरेण द्विस्वरा कला गतागतैरारोहावरोहैः, ततस्त्रिस्वरा, ततश्चतुःस्वरा, ततः पञ्चस्वरा, ततः षट्स्वरा, ततः सप्तस्वरा, आरोहावरोहैर्यत्र गीयन्ते स हुंकाराख्यो ऽलंकारः ॥ -५०, ५०- ॥ ह्रादमानं लक्षयति—ह्रादमान इति । मन्द्रादेः प्रथमद्वितीयतृतीयस्वरयुक्तस्य प्रसन्नान्ताः प्रथमस्वरान्ताः कला यदि गीयन्ते तदा ह्रादमानाख्यो ऽलंकारः ॥ -५१ ॥ अवलोकितं लक्षयति—यदेति ।

चतुःस्वरा समकला तदा स्यादवलोकितः ॥ ५२ ॥

सगममरिस रिमपपगरि गपधधमग मधनिनिपम । (२५)

एवं संचार्यलंकारा आरोहेण प्रदर्शिताः ।

एतानेवावरोहेण प्राह श्रीकरणाग्रणीः ॥ ५३ ॥

इति संचार्यलंकाराः ।

अन्ये ऽपि सप्तालंकारा गीतज्ञैरुपदर्शिताः ।

तारमन्द्रप्रसन्नश्च मन्द्रतारप्रसन्नकः ॥ ५४ ॥

आवर्तकः संप्रदानो विधूतो ऽप्युपलोलकः ।

उल्लासितश्चेति तेषामधुना लक्ष्म कथ्यते ॥ ५५ ॥

कलास्तेषां द्वितीयाद्याः पूर्वैकैकप्रहाणतः ।

अष्टमस्वरपर्यन्तमारुह्याद्यं व्रजेद्यदि ॥ ५६ ॥

तारमन्द्रप्रसन्नो ऽयमलंकारस्तदोच्यते ।

संरिगमपधनिसंसं । (१)

मन्द्रादष्टममुत्प्लुत्य सप्तकस्यावरोहणे ॥ ५७ ॥

यदा चतुःस्वरा समालंकारस्य कला ऽऽरोहे ऽवरोहे च द्वितीयस्वरं परित्यजति तदा ऽवलोकिताख्यो ऽलंकारः ॥ ५२ ॥ एवमिति । एवमनेन प्रकारेण संचार्यलंकारा आरोहेण कथिताः । एताञ्श्रीकरणाग्रणीः शार्ङ्गदेवो ऽवरोहेणापि प्राह कथितवान् ॥ ५३ ॥ इति संचार्यलंकाराः ॥ गीतज्ञैः प्रदर्शिताँल्लोकप्रसिद्धानन्यान्सप्तालंकारान्कथयति—अन्ये ऽपीति ॥ ५४, ५५ ॥ लाघवार्थं सर्वेषां साधारणं लक्षणमाह—कलास्तेषामिति । एतेषां प्रथमकलालक्षणमेव वक्ष्यति—द्वितीयस्वराद्याः पूर्वैकैकस्वरपरित्यागात्कला ज्ञातव्याः ॥ ५५- ॥ तारमन्द्रप्रसन्नादिं विशदयति—अष्टमस्वरेति । प्रथमस्वरमारभ्याष्टमस्वरपर्यन्तमारोहेण गीत्वा प्रथमस्वरं यदि गायेत्तदा तारमन्द्रप्रसन्नाख्यो ऽलंकारः ॥ -५६, ५६- ॥ मन्द्रतारप्रसन्नं



मन्द्रतारप्रसन्नाख्यमाह माहेश्वरोत्तमः ।

संसंनिधपमगरिसं । (२)

आद्यं द्वितीयमाद्यं च द्विर्द्विर्गीत्वा द्वितीयकम् ॥ ५८ ॥

सकृदाद्यं यत्कलायां गायेदावर्तकस्तु सः ।

ससरिरिससरिस रिरिगगरिरिगरि गगममगगमग ममपप-
ममपम पपधधपपधप धधनिनिधधनिध । (३)

एतस्यैव कला ऽन्त्यौ द्वौ स्वरौ संत्यज्य गीयते ॥ ५९ ॥

यदा तदा संप्रदानमलंकारं विदुर्बुधाः ।

ससरिरिसस रिरिगगरिरि गगममगग ममपपमम पपधधपप
धधनिनिधध । (४)

युग्ममेकान्तरितयोस्त्यक्तादप्येवमेव चेत् ॥ ६० ॥

द्विर्द्विः प्रयुज्येत तदा विधूतो बुधसंमतः ।

सगसग रिमरिम गपगप मधमध पनिपनि । (५)

कलायामाद्ययोर्युग्मं चेत्तृतीयद्वितीययोः ॥ ६१ ॥

लक्षयति—मन्द्रादिति । मन्द्रादष्टमस्वरं गीत्वा यदि सप्त स्वरा अवरोहेण गीयन्ते तदा मन्द्रतारप्रसन्नाख्यो ऽलंकारः ॥ -५७, ५७- ॥ आवर्तकं लक्षयति—आद्यमिति । आद्यं स्वरं द्वितीयं पुनराद्यं च द्विर्द्विवारं गीत्वा पुनर्द्वितीयमाद्यं च यदि सकृद्गायेत्तदा ऽऽवर्तकाख्यो ऽलंकारः ॥ -५८,५८- ॥ संप्रदानं लक्षयति—एतस्यैवेति । एतस्यावर्तकस्यान्त्यं स्वरद्वयं विहाय यदि कला गीयन्ते तदा संप्रदानाख्यो ऽलंकारः ॥ -५९,५९- ॥ विधूतालंकारं लक्षयति—युग्ममिति । एकान्तरितं स्वरद्वयं द्विर्गायेत् ; त्यक्तमारभ्यैकान्तरितं स्वरद्वयं द्विर्गायेत् ; एवं चतुःस्वरः पञ्चकलो विधूताख्यो ऽलंकारः ॥ -६०,६०- ॥ उपलोलं लक्षयति—कलायामिति । प्रथमस्वरयोर्युग्मं द्विर्गीत्वा तृतीयद्वितीयस्वरयोर्युग्मं द्विर्गीयते यदा

द्विर्द्विः प्रयुज्यते तज्ज्ञैरुपलोलस्तदोच्यते ।

सरिसरिगरिगरि रिगरिगमगमग गमगमपमपम मपमपधपधप पधपधनिधनिध । (६)

द्विर्गीत्वा ऽऽद्यं तृतीयं च प्रथमं च तृतीयकम् ॥ ६२ ॥

सकृद्गायेद्यत्कलायां तमुल्लासितमूचिरे ।

ससगसग रिरिमरिम गगपगप ममधमध पपनिपनि । (७)

इति सप्तालंकाराः ।

इति प्रसिद्धालंकारास्त्रिषष्टिरुदिता मया ॥ ६३ ॥

अनन्तत्वात्तु ते शास्त्रे न सामस्त्येन कीर्तिताः ।

रक्तिलाभः स्वरज्ञानं वर्णाङ्गानां विचित्रता ॥ ६४ ॥

इति प्रयोजनान्याहुरलंकारनिरूपणे ।

तदोपलोलाख्यो ऽलंकारः ॥ -६१,६१- ॥ उल्लासितं लक्षयति—द्विरिति । यस्य कलायामाद्यं स्वरं द्विर्गीत्वा तृतीयं प्रथमं पुनस्तृतीयं च सकृद्गीयते तमुल्लासितमूचिरे संगीताचार्याः ॥ -६२, ६२- ॥ इति सप्तालंकाराः ॥ समस्तालंकारकथनमशक्यमित्याह—इतीति ॥ -६३, ६३- ॥ अलंकारप्रयोजनमाह—रक्तिलाभ इति । स्वराणां रञ्जकत्वज्ञानं स्वरूपज्ञानं स्थाय्यादिवर्णानां वैचित्र्यं चालंकारनिरूपणे प्रयोजनम् ॥ -६४, ६४- ॥

**इति प्रथमे स्वरगताध्याये षष्ठं वर्णालंकारप्रकरणम् ॥ ६ ॥**



## अथ सप्तमं जातिप्रकरणम्

शुद्धाः स्युर्जातयः सप्त ताः षड्जादिस्वराभिधाः ।

षाड्ज्यार्षभी च गांधारी मध्यमा पञ्चमी तथा ॥ १ ॥

धैवती चाथ नैषादी शुद्धतालक्ष्म कथ्यते ।

यासां नामस्वरो न्यासो ऽपन्यासो ऽंशो ग्रहस्तथा ॥ २ ॥

तारन्यासविहीनास्ताः पूर्णाः शुद्धाभिधा मताः ।

(क०) गानक्रियाऽऽत्मकवर्णालंकारनिरूपणानन्तरमलंकार्यतया प्रतीतगीताद्यनुगतत्वेन प्रसक्तानां जातीनां लक्षणमुद्दिष्टं विवेक्तुकामस्तल्लक्ष्यत्वेनाक्षिप्ता जातीः सप्रभेदं लक्षयितुमुद्दिशति—**शुद्धाः स्युरित्यादिना । जातय** इति । यथायोगं ग्रामद्वयाज्जायन्त इति जातयः । अत एवानित्यतया साकल्येन सामान्यरूपजातिलक्षणाभावे ऽप्यनेकगेयव्यक्तिष्वनुवृत्तत्वमात्रेण गोत्वादिजातिवज्जातय इति वा, गीतजातं तस्योपरञ्जनं वा ऽऽभ्यो जायत इति जातय इति वा जातिशब्दव्युत्पत्तिर्मतङ्गाद्यभिमता द्रष्टव्या । जातयः शुद्धा वक्ष्यमाणशुद्धत्वलक्षणोपेताः सप्त स्युः । ताः षड्जादिस्वराभिधाः ; षड्जादिस्वराणामभिधा इवाभिधा यासां ता इत्युपमानपूर्वपदो बहुव्रीहिः ; यद्वा षड्जादिस्वरवाचकाः षड्जादिशब्दाः प्रकृतित्वेनाभिधाः संज्ञा यासां ताः । अत्राभिधाशब्दस्यावृत्तिः कर्तव्या । तथैवोद्दिशति—**षाड्जीत्यादिना** । तासां शुद्धत्वं किमित्यत आह—**शुद्धतालक्ष्मेति** । यासां षाड्ज्यादीनां नामस्वरः षड्जादिरेव वक्ष्यमाणलक्षणन्यासत्वाद्यवस्थाऽऽपन्नो भवति, याश्च तारन्यासविहीनास्तारस्थाने न्यासरहिता इति विशेषनिषेधः शेषाभ्यनुज्ञां गमयतीति मन्द्रमध्यस्थानयोर्यथायोगं न्यासविधिरिष्यते । यदपि भरतेन 'न्यासः शुद्धासु मन्द्रे स्यात्' इत्युक्तं तत्तारनिषेधपरं द्रष्टव्यम् । अन्यथा

**विकृता न्यासवर्जैतल्लक्ष्महीना भवन्त्यमूः ॥ ३ ॥**

षाड्ज्यां मध्यषड्जन्यासत्वं मतङ्गोक्तं लक्ष्ये विरुध्येत। पूर्णाः सप्तस्वरयुक्ताः। शुद्धाभिधाः शुद्धा इति संज्ञा यासां ताः ॥ १—२- ॥

(सु०) जातीर्निरूपयति—**शुद्धाः स्युरिति**। शुद्धाः सप्त जातयो भवन्ति। तासां किं नामेत्यपेक्षायामाह—**ताः षड्जादिस्वराभिधा इति**। षड्जादयः सप्त स्वरास्तासां नाम्नि कारणभूताः। तासां तान्येव स्वरसंबन्धीनि नामानि कथयति—षाड्जीति। तासां शुद्धतालक्षणं प्रतिज्ञाय कथयति—**शुद्धतेति**। यासां जातीनां नामस्वर एव न्यासो ऽपन्यासो ऽंशो ग्रहश्च भवति, न्यासस्वरश्च तारो न भवति ताः शुद्धा जातयो ज्ञातव्याः। न्यासादिलक्षणं वक्ष्यति ॥१—२-॥

(क०) अमूः शुद्धाः षाड्ज्यादय एव। **न्यासवर्जैतल्लक्ष्महीना** इति। जातीनां शुद्धतायामभिहितेषु **नामस्वरस्यैव** न्यासापन्यासांशग्रहत्वेषु ससंपूर्णत्वेषु पञ्चसु लक्षणेषु मध्ये न्यासवर्जं न्यासनियमस्यैकस्य सम्यक् परिहृत्यैतल्लक्ष्मभिरपन्यासांशग्रहपूर्णत्वैर्हीना नियतैरेतैर्वर्जिताः। अयमर्थः—नामस्वरमेव न्यासं कृत्वा ऽपन्यासादीन्स्वरान्तराणि कुर्यादिति। **एवं कृता** यदि, तदा विकृता विकृतावस्थाऽऽपन्ना भवन्ति, न तु विकृतसंसर्गजातजातिवद्व्यपदेशान्तरभाज इत्यर्थः। अत्र न्यासनियमस्य **परित्यागो नेष्टः**; तस्मिन्नपि परित्यक्ते सति विकृतासु जात्यन्तरभेदकत्वेन प्रधानभूतावयवाननुवृत्तौ तासां तत्तच्छुद्धजातिभेदत्वप्रतीतिर्न स्यात् ॥ -३ ॥

(सु०) विकृता जातीः कथयति—**विकृता इति**। न्यासं विनोक्तलक्षणहीना विकृताः। न्यासलक्षणहीनत्वं तारन्यासत्वम्। तर्त्कि विकृतानां न संभवति? न। तदुक्तं मतङ्गेन—'याः शुद्धास्तासु नामकारी न्यासो नियमेन मन्द्रो भवति; या विकृतास्तासु नामकारी मन्द्रो भवतीत्यनियमः। तत्र शुद्धानां



**संपूर्णत्वग्रहांशापन्यासेष्वेकैकवर्जनात्।**
**भवन्ति भेदाश्चत्वारो द्वयोस्त्यागे तु षण्मताः ॥ ४ ॥**
**त्यागे त्रयाणां चत्वार एकस्त्यक्ते चतुष्टये।**
**भेदाः पञ्चदशैवैते षाड्ज्याः सद्भिर्निरूपिताः ॥ ५ ॥**
**तत्राष्टौ पूर्णताहीनाः सप्त त्वितरवर्जिताः।**
**द्विधा स्युः पूर्णताहीनाः षाडवौडुवभेदतः ॥ ६ ॥**
**अतो ऽष्टावधिका आर्षभ्यादिष्वौडुवजातिषु।**
**अतस्त्रयोर्विंशतिधा षट्सु प्रत्येकमीरिताः ॥ ७ ॥**

जातीनां शुद्धत्वं विकृतत्वं च रूपद्वयमस्ति; षड्जकैशिक्यादीनामेकादशजातीनां तु विकृतत्वमेव, न शुद्धत्वम्।' इति। जातिशब्दव्युत्पत्तिस्तु मतङ्गेनोक्ता—'श्रुतिस्वरग्रामसमूहाज्जायन्त इति जातयः; यद्वा ग्रहादिभ्यो जायन्त इति जातयः; अथ वा जायते रसप्रतीतिराभ्य इति जातयः; यद्वा सकलस्य रागादेर्जन्महेतुत्वाज्जातयः; अथ वा यथा नराणां ब्राह्मणत्वादयो जातयः शुद्धा विकृताश्च, एवमेता अपीति जातयः ॥' इति ॥ -३ ॥

(क०) न्यासव्यतिरिक्तसंपूर्णत्वादिषु चतुर्षु लक्षणेष्वेकद्व्यादिपरित्यागेन संभूतान्भेदान्षाड्ज्यादिषु यथासंभवं परिगणयति—**संपूर्णत्वेत्यादिना**। एकैकवर्जनादिति संपूर्णत्वादीनां स्वरूपनिषेधो न क्रियते, जात्यनुत्पत्तिप्रसङ्गात्; अपि तु नियतस्वरपर्युदासात्स्वरान्तरविधिर्विज्ञायते। **भवन्ति भेदाश्चत्वार** इति। संपूर्णत्ववर्जने कृते ग्रहांशापन्यासयुक्त एकः, ग्रहवर्जने संपूर्णत्वांशापन्यासवान्द्वितीयः, अंशवर्जने संपूर्णत्वग्रहापन्यासवांस्तृतीयः, अपन्यासवर्जने संपूर्णत्वग्रहांशयुक्तश्चतुर्थो भेदः, इति चत्वारो भेदाः। **द्वयोस्त्यागे तु षण्मता** इति। संपूर्णत्वग्रहाभ्यां संपूर्णत्वांशाभ्यां संपूर्णत्वापन्यासाभ्यां ग्रहांशाभ्यां ग्रहापन्यासाभ्यामंशापन्यासाभ्यां त्यक्ताभ्यां षड्

मेदा भवन्ति । **त्यागे त्रयाणां चत्वार** इति । संपूर्णत्वग्रहांशैः संपूर्णत्वग्रहापन्यासैः संपूर्णत्वांशापन्यासैर्ग्रहांशापन्यासैस्त्यक्तैश्चत्वारो भेदाः । चतुष्टयं त्यक्त एको भेद इत्येते पञ्चदशैव भेदाः षाड्ज्या निरूपिताः ॥ संपूर्णताहीनानामवान्तरभेदं वक्तुं विभजते—**तत्राष्टाविति** । तत्र पञ्चदशसु मध्येऽष्टौ भेदाः पूर्णताहीनाः संपूर्णत्वरहिताः । सप्त त्वितरवर्जिताः । संपूर्णत्वयुक्तत्वे सतीतरेषु ग्रहांशापन्यासेषु यथायोगमेकेन द्वाभ्यां त्रिभिर्वा वर्जिता द्विधा स्युः । पूर्णताहीना अष्टौ भेदाः षाडवौडुवभेदतो द्विधा स्युः षोडश भवन्तीत्यर्थः । ननु पूर्णताहीनानां भेदानां चतुःस्वरादिभिरपि भेदैः सह षड्विधत्वे संभवति कथं द्वैविध्यमिति चेत्; उच्यते—पूर्णताहीना इत्यनेन चतुःस्वरादीनां च प्रतीतौ सत्यामपि नञिवयुक्तन्यायेन जातिरागसंपादकत्वात्संपूर्णत्वसदृशप्रतिपत्त्या षाडवौडुवयोरेवात्र ग्रहणमिति । चतुःस्वरप्रयोगस्तु भरतेनापकृष्टध्रुवायामेवोक्तः । त्रिस्वरादीनां प्रयोगस्तु सामव्यतिरिक्तगीदौ[1] द्रष्टव्यः । षाड्ज्यपेक्षया ऽऽर्षभ्यादिषु षट्सु जातिषु भेदाधिक्यं दर्शयति—**अतो ऽष्टाविति** । अतो ऽस्याः पूर्णताहीनेषु षोडशस्वष्टाभिरेव षाडवभैदैः पूर्णतायुक्तैरितरवर्जितैः सप्तभिः सह पञ्चदशभेदवत्त्वेनोक्तायाः षाड्ज्या इतरास्वार्षभ्यादिष्वौडुवजातिष्वौडुवावस्थया ऽपि युक्तास्वष्टावौडुवभेदा अधिकाः । अतः कारणात्ता आर्षभ्यादयः षड् जातयः प्रत्येकं त्रयोविंशतिधेरिता इति सप्तसु जातिषु विकृतभेदा मिलितास्त्रिपञ्चाशदुत्तरं शतं भवन्ति ॥ ४—७ ॥

(सु०) विकृतभेदान्गणयति— **संपूर्णत्वेति** । शुद्धजातीनां चत्वारि लक्षणानि—नामस्वरग्रहत्वं नामस्वरांशत्वं नामस्वरापन्यासत्वं संपूर्णत्वं चेति । तत्र संपूर्णत्वपरित्यागेनैको विकृतभेदः, ग्रहपरित्यागेनैकः, अंशपरित्यागेनैकः,

[1] सामगाधर्क्षु.



**विकृतानां तु संसर्गाज्जाता एकादश स्मृताः ।**
**स्यात्षड्जकैशिकी षड्जोदीच्यवा षड्जमध्यमा ॥ ८ ॥**
**गांधारोदीच्यवा रक्तगांधारी कैशिकी तथा ।**
**मध्यमोदीच्यवा कार्मारवी गांधारपञ्चमी ॥ ९ ॥**
**तथा ऽऽन्ध्री नन्दयन्तीति तद्धेतूनधुना ब्रुवे ।**
**षाड्जीगांधारिकायोगाज्जायते षड्जकैशिकी ॥ १० ॥**

अपन्यासपरित्यागेनैकः, एवमेकैकपरित्यागे चत्वारो भेदाः । संपूर्णत्वग्रहपरित्यागेनैकः, संपूर्णत्वांशपरित्यागेनैकः, संपूर्णत्वापन्यासपरित्यागेनैकः, ग्रहांशपरित्यागेनैकः, ग्रहापन्यासपरित्यागेनैकः, अंशापन्यासपरित्यागेनैकः, एवं लक्षणद्वयपरित्यागे षड् भेदा विकृता भवन्ति । संपूर्णत्वग्रहांशपरित्यागेनैकः, संपूर्णत्वग्रहापन्यासपरित्यागेनैकः, संपूर्णत्वांशापन्यासपरित्यागेनैकः, ग्रहांशापन्यासपरित्यागेनैकः, एवं लक्षणत्रयपरित्यागे चत्वारो भेदा विकृता भवन्ति । लक्षणचतुष्टयपरित्याग एक एव भेदः । एवं षाड्ज्याः पञ्चदश भेदा भवन्ति । तेषु पूर्णताहीना अष्टौ, इतरलक्षणहीनाः सप्त । षाड्ज्याः षाडवत्वेनैवासंपूर्णत्वम् । अन्यासां षाडवत्वेनौडुविततत्वेन च भेदाधिक्यं कथयितुमाह—**द्विधा स्युरिति** । पूर्णताहीना भेदाः षट्स्वरत्वेन पञ्चस्वरत्वेन च द्विविधाः । अत आर्षभ्यादिषु षट्सु जातिष्वष्टौ भेदा अधिका विकृता भवन्ति । अतः प्रत्येकं तासां त्रयोविंशतिर्विकृता भेदाः । एतासां मिलिता विकृतभेदास्त्रिपञ्चाशदधिकं शतं भवन्ति ॥ ४—७ ॥

(क०) उक्तविकृतभेदसंसर्गोत्पन्नानां व्यपदेशान्तरभाजां विकृतजातीनां संख्यामाह—**विकृतानां त्विति** । तुशब्दो भिन्नक्रमः—विकृतानां संसर्गाज्जातास्त्विति । उक्ता विकृताः शुद्धजातीनामेवावस्थाऽन्तराणि, एताः पुनस्तद्विकृतभेदसंसर्गोत्पन्नत्वान्न तथेति तुशब्दार्थः ॥ ता उद्दिश्य तासां निमित्तभूतं विकृतावस्थाऽऽपन्नषाड्ज्यादिसंसर्गं दर्शयति—**स्यात्षड्जकै-**

षाड्जिकामध्यमाभ्यां तु जायते षड्जमध्यमा ।
गांधारीपञ्चमीभ्यां तु जाता गांधारपञ्चमी ॥ ११ ॥
गांधार्यार्षभिकाभ्यां तु जातिरान्ध्री प्रजायते ।
षाड्जी गांधारिका तद्वद्धैवती मिलितास्त्विमाः ॥ १२ ॥
षड्जोदीच्यवतीं जातिं कुर्युः कार्मारवीं पुनः ।
उत्पादयन्ति नैषादीपञ्चम्यार्षभिका युताः ॥ १३ ॥
नन्दयन्तीं तु गांधारीपञ्चम्यार्षभिका युताः ।
गांधारी धैवती षाड्जी मध्यमेति युतास्त्विमाः ॥ १४ ॥
गांधारोदीच्यवां कुर्युर्मध्यमोदीच्यवां पुनः ।
एता एव विना षाड्ज्या पञ्चम्या सह कुर्वते ॥ १५ ॥
कुर्युस्ता रक्तगांधारीं नैषादी च न धैवती ।
आर्षभीं धैवतीं त्यक्त्वा पञ्चभ्यः कैशिकी भवेत् ॥ १६ ॥

**शिकीत्यादिना पञ्चभ्यः कैशिकी भवेदित्यन्तेन** । अत्राष्टादशसु जातिसंज्ञासु षाड्ज्यादीनां कासांचिदन्वर्थतया योगरूढता, कार्मारव्यादीनां तु कतिपयानां केवलरूढतैवेति मन्तव्यम् ॥ ८—१६ ॥

(सु०) विकृतसंसर्गाज्जाता एकादश जातीर्नित्यविकृताः कथयति—**विकृतानां त्विति** । एतासामेकादशानां विकृतानां जातीनां कारणभूता जातीः कथयति—**षाड्जीति** । षाड्जीगांधारिकाभ्यां षड्जकैशिकी जायते । षाड्जीमध्यमाभ्यां षड्जमध्यमा । गांधारीपञ्चमीभ्यां गांधारपञ्चमी । गांधार्यार्षभिकाभ्यामान्ध्री । षाड्जीधैवतीगांधारीभ्यः षड्जोदीच्यवती । नैषादीपञ्चम्यार्षभीभ्यः कार्मारवी । गांधारीपञ्चम्यार्षभीभ्यो नन्दयन्ती । गांधारीधैवतीषाड्जीमध्यमाभ्यो गांधारोदीच्यवा । गांधारीधैवतीमध्यमापञ्चमीभ्यो मध्यमोदीच्यवा । गांधारी-



चतस्रः षड्जशब्दिन्यो नैषादी धैवती तथा ।
आर्षभी चेति सप्तैताः षड्जग्रामस्य जातयः ॥ १७ ॥
शेषाः स्युर्मध्यमग्रामे पूर्णत्वाद्यधुनोच्यते ।
कार्मारव्यथ गांधारपञ्चमी षड्जकैशिकी ॥ १८ ॥
मध्यमोदीच्यवेत्येता नित्यपूर्णाः प्रकीर्तिताः ।
षाड्जी च नन्दयन्त्यान्ध्री गांधरोदीच्यवेत्यमूः ॥ १९ ॥
संपूर्णषाडवाः प्राह चतस्रः काश्यपो मुनिः[1] ।
दशावशिष्टाः संपूर्णषाडवौडुविता मताः ॥ २० ॥

नैषादीमध्यमापञ्चमीभ्यो रक्तगांधारी । षाड्जीगांधारीमध्यमापञ्चमीनैषादीभ्यः कैशिकी ॥ ८—१६ ॥

(क०) सर्वासामपि जातीनां ग्रामविभागं दर्शयति—**चतस्र इत्यादिना** । अष्टादशसु जातिषु मध्ये यथायोगं संपूर्णत्वादिना साधर्म्यमाह—**पूर्णत्वादीत्यादिना** । पूर्णत्वादीत्यादिशब्देन षाडवत्वमौडुवत्वं च गृह्यते । नित्यपूर्णा नित्यं सदा पूर्णाः; न कदाचिदपि षाडवौडुवावस्थाऽऽपन्ना इत्यर्थः । संपूर्णषाडवाः, संपूर्णाश्च ताः षाडवाश्च । **षाड्जीनन्दयन्त्यान्ध्रीगांधारोदीच्यवाश्चतस्रो** जातयो भरतादिमतपर्यालोचनया संपूर्णत्वेन षाडवत्वेन च नियमिता इति निश्चित्य कथ्यन्त इत्यर्थः । एवं च सति यदा गाता ताः षाडवीकर्तुमिच्छति, तदा वक्ष्यमाणलक्षणानुसारेण षाड्ज्यां निषादलोपेन, नन्दयन्त्यान्ध्र्योः षड्जलोपेन गांधारोदीच्यवाया-मृषभलोपेन च षाडवत्वं नियतं द्रष्टव्यम् ॥ **दशावशिष्टा** इति । अवशिष्टा नित्यपूर्णाभ्यश्चतसृभ्यः संपूर्णषाडवाभ्यश्चतसृभ्यश्च व्यतिरिक्ता दश—

[1] सोढलात्मजः.

**पञ्चमीमध्यमाषड्जमध्यमाऽऽख्यासु जातिषु ।**
**स्वरसाधारणं प्रोक्तं मुनिभिर्भरतादिभिः ॥ २१ ॥**

आर्षभी गांधारी मध्यमा पञ्चमी धैवती नैषादी षड्जोदीच्यवा षड्जमध्यमा रक्तगांधारी कैशिकी चेति । संपूर्णषाडवौडुविताः; संपूर्णाश्च षाडवाश्चौडुविताश्च ता इति कर्मधारयः; दशाप्येताः संपूर्णत्वादिव्यवस्थाऽऽपन्ना इत्यर्थः । तद्यथा—आर्षभी षड्जलोपात्षाडवा, सपलोपादौडुवा । गांधारीरक्तगांधारीकैशिक्यो रिलोपेन षाडवाः, रिधलोपेनौडुवाः । मध्यमापञ्चम्यौ गलोपेन षाडवे, निगलोपेनौडुवे । धैवतीनैषाद्यौ पलोपेन षाडवे, सपलोपेनौडुवे । षड्जोदीच्यवा रिलोपेन षाडवा, परिलोपेनौडुवा । षड्जमध्यमा निलोपेन षाडवा, निगलोपेनौडुवेति ॥ १७—२० ॥

(सु०) एतासां कियत्यः कस्मिन्ग्राम इत्यपेक्षायामाह—**चतस्र** इति । एतासां जातीनां मध्ये षड्जशब्दवत्यश्चतस्रो जातयः षाड्जी षड्जकैशिकी षड्जमध्यमा षड्जोदीच्यवा चेति, तथा नैषादी धैवत्यार्षभी चेत्येताः सप्त षड्जग्रामोत्पन्नाः; शेषा एकादश मध्यमग्रामोत्पन्नाः ॥ जातीनां पूर्णत्वषाडवत्वौडुवितत्वानि प्रतिज्ञाय कथयति—**पूर्णत्वादी**ति । कार्मारवीगांधारपञ्चमीषड्जकैशिकीमध्यमोदीच्यवानां पूर्णत्वमेव, षाडवत्वमौडुवितत्वं च नास्ति । षाड्जीनन्दयन्त्यान्ध्रीगांधारोदीच्यवानां संपूर्णत्वं षाडवत्वं च विद्यते, औडुवितत्वं नास्ति । अवशिष्टानां दशानां संपूर्णत्वं षाडवत्वमौडुवितत्वं चास्ति ॥ १७—२० ॥

(क०) तत्र कासुचिज्जातिषु भरताद्युक्तं स्वरसाधारणप्रयोगे नियमं दर्शयति—**पञ्चमीत्या**दिना ॥ अनेनैव वचनेन पञ्चमीमध्यमाषड्जमध्यमासु तिसृषु जातिषु यथायोगं षड्जमध्यमपञ्चमानामन्यतमस्यांशत्वे स्वरान्तरस्यांशत्वे चोभयत्र स्वरसाधारणे प्राप्ते, स्वरान्तरांशत्वपक्षनिवृत्त्यर्थं स्वर-



**अंशेषु समपेष्वेतद्यथास्वनियमाद्भवेत्[1] ।**
**एतदल्पनिगास्वाहुः कम्बलाश्वतरादयः ॥ २२ ॥**
**अल्पद्विश्रुतिके रागभाषाऽऽदावपि तन्मतम् ।**
**निगयोरंशयोः षड्जमध्यमायां न तद्भवेत् ॥ २३ ॥**
**विकृता एव तत्रापि स्वरसाधारणाश्रयाः ।**

साधारणं परिसंख्याति—**अंशेषु समपेष्वि**ति । एतत्स्वरसाधारणम् । यथास्वनियमात्; स्वनियमः 'प्रयोज्यौ षड्जमुच्चार्य' इत्यादिनोक्तः, तमनतिक्रम्य । अत्रेयं व्यवस्था—पञ्चम्यां पञ्चमे ऽंशे, मध्यमाषड्जमध्यमयोः प्रत्येकं षड्जमध्यमपञ्चमेष्वंशेषु साधारणप्रयोग इति कम्बलाश्वतरादयः । एतत्स्वरसाधारणम् । काकल्यन्तरावित्यर्थः । अल्पनिगासु लोप्यनिषादगांधारासु जातिषु पञ्चमीमध्यमाषड्जमध्यमाऽऽख्यासु । एतदुक्तं भवति—निषादगांधारयोरन्यतरस्मिन्नंशे ऽन्यस्य तत्संवादित्वेन लोप्यत्वाभावात्काकल्यन्तरप्रयोगो न कर्तव्य इति । अल्पद्विश्रुतिके लोप्यनिषादगांधारे । **रागभाषाऽऽदावपी**ति । अत्र रागशब्देन ग्रामरागोपरागरागास्त्रयो ऽपि गृह्यन्ते; भाषाशब्देन भाषाविभाषाऽन्तरभाषास्तिस्रो गृह्यन्ते; आदिशब्देन पुना रागाङ्गभाषाऽङ्गक्रियाङ्गोपाङ्गचतुष्टयं गृह्यत इति दशविधो ऽपि रागप्रपञ्चो गृहीतः । तत्रापिशब्देन न केवलमल्पद्विश्रुतिकासु जातिष्वेव, किं त्वल्पद्विश्रुतिके रागादौ सर्वत्रापीति द्योत्यते । तत्काकल्यन्तरसाधारणं मतं भरतादीनां संमतम् ॥ उक्तमर्थं व्यतिरेकेणाप्युदाहृत्य द्रढयन्नाह—**निगयोरंशयोरि**ति । 'पञ्चमीमध्यमा-' इति भरतमतानुसारिणा वचनेन, 'एतदल्पनिगासु-' इति कम्बलाश्वतरादिमतानुसारिणा वचनेन चोपात्तासु

[1] यथास्वं नियमाद्भवेत्.

**एकांशा नन्दयन्ती च मध्यमोदीच्यवा तथा ॥ २४ ॥**
**गांधारपञ्चमीत्येतास्तिस्रो द्व्यंशास्तु धैवती ।**
**गांधारोदीच्यवा चाथ पञ्चमीत्युदिता इमाः ॥ २५ ॥**

पञ्चमीमध्यमाषड्जमध्यमाषाड्जीषु चतसृषु षड्जमध्यमाया विकृतसंसर्गजत्वेन केवलविकृतत्वाच्छुद्धताया अभावे ऽपीतरासां तिसृणां शुद्धावस्थायां विकृतावस्थायां चाविशेषेण स्वरसाधारणे प्राप्ते नियमयति—**विकृता एवेति**। **तत्रापीति**। तत्र पञ्चमीमध्यमाषाड्जीषु तिसृषु। अयमभिसंधिः—षाड्ज्यादिषु शुद्धावस्थायां विकृतस्वरप्रयोगो न कर्तव्य इति ॥ २१—२३- ॥

(सु०) **पञ्चमीति**। पञ्चमीमध्यमाषड्जमध्यमासु जातिषु स्वरसाधारणं प्रयोक्तव्यमित्युक्तं श्रीभरतादिभिः ॥ २१ ॥ **अंशेष्विति**। षड्जमध्यमपञ्चमेष्वंशेष्वेतत्स्वरसाधारणं नियमात्कर्तव्यम्। कथम्? यथास्वं स्वकीयं स्थानमनतिक्रम्य। यदा षड्जो ऽंशस्वरस्तदा षड्जसाधारणम्, यदा मध्यमपञ्चमौ तदा मध्यमसाधारणमिति। एतत्स्वरसाधारणमल्पनिषादगांधारासु जातिषु भवतीति कम्बलाश्वतरादय आहुः। अल्पनिषादगांधारे रागभाषाऽऽदावपि स्वरसाधारणं प्रयोक्तव्यमिति तेषां कम्बलाश्वतरादीनां मतम् ॥ २२, २२- ॥ **निगयोरिति**। यदा षड्जमध्यमायां निषादगांधारावंशौ तदा तत्स्वरसाधारणं न प्रयोक्तव्यम्। प्रायस्तु विकृता एव स्वरसाधारणयोगिन्यः ॥ -२३, २३- ॥

(क०) अथाष्टादशसु जातिषु यथायोगमेकांशकादिसप्तांशकान्तं वक्ष्यमाणलक्षणांशस्वरसंबन्धकथनेन संभूतामंशसंख्यामवधारयति—**एकांशा** इत्यादिना **जातिष्वष्टादशस्विम** इत्यन्तेन। एकांशा एकः स्वरो ऽंशो यासां ताः। नन्दयन्तीमध्यमोदीच्यवागांधारपञ्चमीनां तिसृणां वक्ष्यमाणलक्षणानुसारेण प्रत्येकं पञ्चमो ऽंशो वेदितव्यः। **द्व्यंशास्त्विति**। धैवतीगांधारोदीच्यवापञ्चम्यो द्व्यंशाः। तत्र धैवत्यामृषभधैवतावंशौ; गांधारोदीच्यवायां षड्ज-



**नैषाद्यार्षभिकाषड्जकैशिक्यस्त्र्यंशिका मताः ।**
**आन्ध्रीकार्मारवीषड्जोदीच्यवाश्चतुरंशिकाः ॥ २६ ॥**
**पञ्चांशा रक्तगांधारी गांधारी मध्यमा तथा ।**
**षाड्जीत्येताश्चतस्रः स्युः षडंशैकैव कैशिकी ॥ २७ ॥**
**सप्तांशा सूरिभिः षड्जमध्यमा परिकीर्तिता ।**
**इति त्रिषष्टिरंशाः स्युर्जातिष्वष्टादशस्विमे ॥ २८ ॥**

मध्यमौ; पञ्चम्यामृषभपञ्चमौ। **त्र्यंशिका मता** इति। नैषाद्यार्षभिकाषड्जकैशिक्यस्त्र्यंशिकाः। तत्र नैषाद्यां निषादषड्जगांधारास्त्रयो ऽंशाः; आर्षभ्यामृषभनिषादधैवताः; षड्जकैशिक्यां षड्जगांधारपञ्चमाः। **चतुरंशिका** इति। आन्ध्रीकार्मारवीषड्जोदीच्यवाश्चतुरंशिकाः। तत्रान्ध्र्यामृषभगांधारपञ्चमनिषादाश्चत्वारो ऽंशाः; कार्मारव्यामृषभपञ्चमधैवतनिषादाः; षड्जोदीच्यवायां षड्जमध्यमधैवतनिषादाः। **पञ्चांशा** इति। रक्तगांधारीगांधारीमध्यमाषाड्ज्यश्चतस्रः पञ्चांशाः। तत्र रक्तगांधार्यां सगमपनिषादाः पञ्चांशाः; गांधार्यामपि तद्वत्; मध्यमायां सरिमपधाः; षाड्ज्यां सगमपधाः। **षडंशेति**। एकैव कैशिकी षडंशा। तत्रर्षभव्यतिरिक्ताः षट् स्वरा अंशाः। **सप्तांशेति**। षड्जमध्यमा सप्तांशा। तस्यां षड्जादयः सप्त स्वरा अंशाः स्युः ॥ -२४—२८ ॥

(सु०) **अंशान्संख्याति—एकांशा इति**। नन्दयन्तीमध्यमोदीच्यवागांधारपञ्चमीष्वेक एको ऽंशः; धैवतीगांधारोदीच्यवापञ्चमीषु द्वौ द्वावंशौ; नैषाद्यार्षभीषड्जकैशिकीषु त्रयस्त्रयो ऽंशाः; आन्ध्रीकार्मारवीषड्जोदीच्यवासु चत्वारश्चत्वारो ऽंशाः; रक्तगांधारीगांधारीमध्यमाषाड्जीषु पञ्च पञ्चांशाः; कैशिक्येकैव षडंशा; षड्जमध्यमा सप्तांशा। एवमष्टादशसु जातिषु त्रिषष्टिरंशा भवन्ति। इयं तु संख्या जातीनां संपूर्णत्वे। षाडवत्वे तु सप्तचत्वारिंशदंशा भवन्ति। तदुक्तं

**ग्रहांशतारमन्द्राश्च न्यासापन्यासकौ तथा ।**
**अपि संन्यासविन्यासौ बहुत्वं चाल्पता ततः ॥ २९ ॥**
**एतान्यन्तरमार्गेण सह लक्ष्माणि जातिषु ।**
**षाडवौडुविते क्वापीत्येवमाहुस्त्रयोदश ॥ ३० ॥**

मतङ्गेन—"योज्याः सप्ताधिकास्ते च चत्वारिंशच्च षाडवे । अस्यार्थः—षाडवविधौ क्रियमाणे सप्तचत्वारिंशदंशा भवन्ति । कथम्? चतसृणां जातीनां नित्यपूर्णानां नवांशाः पातनीयास्त्रिषष्टिमध्ये । एषु नवांशेषु पातितेषु चतुष्पञ्चाशदंशा अवशिष्यन्ते । तत्रापि षड्जमध्यमा षाड्जी षड्जोदीच्यवा कैशिकी रक्तगांधारीत्यासां सप्तांशा अपवादभूताः पातनीयाः । तेषु सप्तांशेषु पातितेषु सप्तचत्वारिंशदंशा भवन्ति ।" इति । औडुवविधौ तु त्रिंशदंशा भवन्ति । तदुक्तं मतङ्गेन—"तथा ऽपवादनिर्मुक्तास्त्रिंशदौडुविते तु ते । अस्यार्थः" पूर्ववत् । षोडशसु पातितेषु नित्यपूर्णषाडवानां द्वादश पातनीयाः । अन्ये चापवादभूताः पञ्च । एवं त्रिंशदौडुविते ते ऽंशा भवन्ति । तथा चाह भरतः—

'पञ्चस्वरमौडुवितं विज्ञेयं दशविधप्रयोगज्ञैः ।
त्रिंशत्प्रकारविहितं पूर्वोक्तं लक्षणं तस्य ॥'

इति । अपकृष्टध्रुवासु जातीनां चतुःस्वरप्रयोगो ऽप्युक्तो भरतेन—

'षट्स्वरस्य प्रयोगो ऽस्ति तथा पञ्चस्वरस्य च ।
चतुःस्वरप्रयोगो ऽपि ह्यपकृष्टध्रुवास्वथ ॥'

इति ॥-२४—२८ ॥

(क०) अथ 'त्रयोदशविधं जातिलक्ष्म' इत्युद्देशे लक्ष्यत्वेनोपात्तजातिनिरूपणावसरे तदवयवत्वेन च प्राप्तांस्त्रयोदशापि ग्रहादीन्विभज्य क्रमेण लक्षयति—**ग्रहांशतारमन्द्राश्चे**त्यादिना । **षाडवौडुविते क्वापी**ति । नित्यपूर्णाभ्यो ऽन्यासु यथायोगमित्यर्थः । यद्यपि भरतमतङ्गादिभिः संन्यासविन्यासयोर्विदार्याश्रितत्वादपन्यासे ऽन्तर्भावेणान्तरमार्गस्याप्यंशाद्यवय-



**गीतादिनिहितस्तत्र स्वरो ग्रह इतीरितः ।**
**तत्रांशग्रहयोरन्यतरोक्तावुभयग्रहः ॥ ३१ ॥**
**यो रक्तिव्यञ्जको गेये यत्संवाद्यनुवादिनौ ।**
**विदार्यां बहुलौ यस्मात्तारमन्द्रव्यवस्थितिः ॥ ३२ ॥**
**यः स्वयं यस्य संवादी चानुवादी स्वरो ऽपरः ।**
**न्यासापन्यासविन्याससंन्यासग्रहतां गतः ॥ ३३ ॥**
**प्रयोगे बहुलः स स्याद्वाद्यंशो योग्यतावशात् ।**
**बहुलत्वं प्रयोगेषु व्यापकं त्वंशलक्षणम् ॥ ३४ ॥**

ङ्गानामन्योन्यसंघटनात्मकस्यांशादिसंबन्धाधीनसिद्धेः पृथगुद्देशो नापेक्षित इति दशकं जातिलक्षणमित्युक्तम्, तथा ऽपि संन्यासविन्यासयोः पृथगवयवत्वेनान्तरमार्गस्य तु सत्स्वंशादिष्ववयवेषु तेन विना प्रयोगासिद्धेस्तस्यावश्यिकत्वाल्लक्षणेषु पृथगुद्दिश्य त्रयोदशेत्युक्तं ग्रन्थकारेण ॥ **गीतादिनिहित** इति । तत्र तेषु त्रयोदशसु मध्ये, गीतादिनिहितः, गीतस्य रञ्जकस्वरसंदर्भस्यादावुपक्रमे निहितः । गृहीत इति येन गीतं गृह्यत इति वा ग्रहः । तत्रांशग्रहयोरित्यत्र तत्रेति गीतगानलक्षण इत्यर्थः । अंशग्रहयोरन्यतरोक्तौ, यत्र क्वचिदंश एवोच्यते न ग्रहः, यत्र च ग्रह एवोच्यते न त्वंशः, तत्रोभयग्रह उभयोर्ग्रहांशयोर्ग्रहो ग्रहणं भवति । अयमर्थः—यत्र गीतलक्षणे यस्य स्वरस्यांशत्वमुक्तं नान्यस्य ग्रहत्वं तत्र तस्यैव ग्रहत्वमप्युक्तम्, यस्य च ग्रहत्वमुक्तं नान्यस्यांशत्वं तत्रापि तस्यैवांशत्वमप्युक्तमिति । एतेनैतदुक्तं भवति—यस्यां जातौ ये यावन्तो ऽंशास्तत्र ते तावन्त एव ग्रहा इति । सर्वासु जातिषु ग्रहा अपि त्रिषष्टिरित्यर्थः । तथा चोक्तं भरतेन—

'त्रिषष्टिरंशा विज्ञेयास्तासां चैवांशवद् ग्रहाः' इति ।

मतङ्गेनापि—'सो ऽंशवत्त्रिषष्टिभेदभिन्नो बोद्धव्यः' इति ॥ **यो रक्ती-** त्याद्यंशलक्षणम् । रक्तिव्यञ्जकत्वादिधर्मयुक्तो यः स्वरः स संगीतभागत्वादंश इति व्यपदिश्यते गेये । रक्तिव्यञ्जक इत्येतावत्युच्यमाने स्वरगतरक्तिमात्रव्यञ्जकत्वं स्वरान्तराणामप्यविशिष्टमितीह स्वरसंदर्भभेदप्रतिनियतरक्तिविशेषव्यञ्जकत्वस्य विवक्षितत्वाद्वेय इति विशेषणं यथा वाक्यार्थभूतरसादिव्यञ्जकत्वं विवक्षितान्यपरवाच्ये ऽसंलक्ष्यक्रमध्वनौ स्वार्थमभिदधतः पदस्य । यत्संवाद्यनुवादिनौ । यस्यांशत्वेन लिलक्षयिषितस्य[1] स्वरस्य । अस्मिँल्लक्षणे प्रतिवाक्यं यच्छब्दो विधेयांशस्वरपरः । संवाद्यनुवादिनौ पूर्वोक्तलक्षणौ स्वरौ विदार्यां गीतखण्डे बहुलौ प्रचुरप्रयोगौ; यस्मात्तारमन्द्रव्यवस्थितिः, यमवधिं कृत्वोत्तरस्वरारोहेण तारव्यवस्था ऽधस्तनस्वरावरोहेण मन्द्रव्यवस्था च भवति; यः स्वयं यस्य संवादी, यस्य वादिव्यपदेशवतः स्वस्य स्वयमेव कदाचित्संवादी च भवति; अत्र चकार एवार्थः संवाद्येवेति; अनुवादी स्वरो ऽपरः, यस्यानुवादी त्वपर एव स्वरो भवति, न कदाचिदपि स्वस्य स्वयमनुवादीत्यर्थः; यथा लोके राजा प्रयोजनवशात्कचिदमात्यकृत्यकारी भवति न कदाचिदपि भृत्यकृत्यकारी, तद्वत्; यश्च न्यासापन्यासविन्याससंन्यासग्रहतां गतः सन्प्रयोगे बहुलो भवति; तस्य न्यासादिरूपापत्तिः प्रयोगबाहुल्ये हेतुः, स वादी योग्यतावशादंशः स्यात् । योग्यता नामात्र यथायोगं रक्तिव्यञ्जकत्वाद्युक्तलक्षणार्हत्वम् । तथा ऽऽह भरतः—

'रागश्च यस्मिन्वसति यस्माच्चैव प्रवर्तते ।
नेता च तारमन्द्राणां यो ऽत्यर्थमुपलभ्यते ॥
ग्रहापन्यासविन्याससंन्यासन्यासयोगतः ।
अनुवृत्तश्च यश्चेह सो ऽंशः स्याद्दशलक्षणः ॥'

[1] विवक्षितस्य.



इति । नन्वंशो ग्रह इति भरतादेशेन सर्वेष्वप्यंशधर्मेषु ग्रहस्य प्राप्तेषु ग्रहांशयोः को विशेष इति चेत्, उच्यते—ग्रहस्यांशातिदेशतस्तु प्राप्तं न केवलं वादित्वमेव धर्मः, अपि तु वादित्वादिचतुष्टयमपीति तयोर्भेद इति । यथोक्तं मतङ्गेन—'अंशो वाद्येव परं ग्रहस्तु वाद्यादिभेदभिन्नश्चतुर्विधः' इति ॥ दशानामपि लक्षणानां सप्तषष्टिरूपत्वाद्बहुलत्वमेवांशस्य नियतं लक्षणमित्याह—**बहुलत्वमिति** । प्रयोगे बहुलत्वं व्यापकमंशलक्षणमिति संबन्धः । **व्यापकमिति** । यो ऽंशः स बहुल इत्यविनाभावात् ॥ २९—३४ ॥

(सु०) त्रयोदशविधं जातिलक्षणं विभजते—**ग्रहांशेति** । **षाडवौडुविते कापीति** । याः कार्मार्व्यादयश्चतस्रो नित्यपूर्णास्ता विहायेत्यर्थः । ग्रहलक्षणं कथयति—**गीतादीति** । गीतस्य जात्यादेरादौ यः स्वरः प्रयुज्यते स ग्रह इत्युच्यते । **तत्रेति** । तत्र 'यः स्वरो ऽंशः स एव ग्रहः' इति नियमादंशग्रहयोरेकोक्तावुभयं लभ्यते । नन्वेवं तर्हि ग्रहांशयोः को भेदः? उच्यते—अंशो वाद्येव परम्; ग्रहस्तु वाद्यादिभेदभिन्नश्चतुर्विधः; अंशश्च रागजनकत्वात्प्रधानम्; ग्रहस्त्वप्रधानमिति तयोर्भेदः ॥ २९—३१ ॥ अंशलक्षणं कथयति—**यो रक्तिव्यञ्जक** इति । यो गीते रञ्जकत्वं व्यनक्ति, यस्य संवाद्यनुवादी च विदार्यां बहुलः । ननु विदारीशब्देन किमुच्यते? विदार्यते खण्ड्यते गीतं पदं वा यया सा विदारी । सा द्विविधा गीतविदारी पदविदारी चेति । सा विशेषेण तालाध्याये निरूपयिष्यते । यमवधिं कृत्वा मन्द्रतारव्यवस्था, यो वा यस्य संवाद्यनुवादी वा न्यासत्वमपन्यासत्वं विन्यासत्वं संन्यासत्वं ग्रहत्वं च प्राप्नोति, यस्य जात्यादिप्रयोगे बाहुल्यं संवाद्यंशश्चेत्युच्यते । **योग्यतावशादिति** । प्राधान्याद्वादिशब्दवाच्यत्वमन्यैर्लक्षणैरंशशब्दवाच्यत्वमिति । प्रयोगे बाहुल्यमेव मुख्यं लक्षणमंशस्येति कथयति—**बहुलत्वमिति** । ननु कथमस्यांशशब्दवाच्यत्वम्? अंशशब्देन भाग उच्यते; अयमपि जातिरागादिविभागकारित्वादंशशब्देनोच्यते, कारणे कार्यवदुपचारात् ॥ ३२—३४ ॥

**मध्यमे सप्तके ऽंशः स्यात्तस्मात्तारस्थितात्परान् ।**
**स्वरांश्चतुर आरोहेदेष तारावधिः परः ॥ ३५ ॥**
**अर्वाक्तु कामचारः स्यात्तारे लुप्तो ऽपि गण्यते ।**
**आतारषड्जमारोहो नन्दयन्त्यां प्रकीर्तितः ॥ ३६ ॥**

(क०) अथ तारव्यवस्थामाह—**मध्यमे सप्तके ऽंशः स्यादिति** । मध्यमे सप्तके, मध्यस्थानस्थितेषु षड्जादिषु सप्तसु स्वरेष्वित्यर्थः । **अंशः स्यात्**, षड्जमध्यमग्रामयोः प्राधान्यात्प्राबल्याच्च यस्मिन्ग्रामे यश्चतुःश्रुतिको ऽंशः षड्जो वा मध्यमो वा भवेत् । तारस्थिताद् द्विगुणात्तस्मात्षड्जाद्वा मध्यमाद्वा परांश्चतुरः स्वरान् । मध्यमग्रामे तावत्तस्मादिति तारमध्यमपरामर्शे तस्मादिति ल्यब्लोपे पञ्चमी । तमारभ्येत्यर्थः । तेन सह परांश्चतुरो मपधनीनारोहेदित्यर्थः । षड्जग्रामे तु तस्मादिति तारषड्जपरामर्शे तस्मादित्यवधौ पञ्चमी । ततः परांश्चतुरः स्वरान्रिगमपानारोहेदिति । एष तारावधिः, एष उक्तप्रकारस्तारावधिः । परो निरतिशयः । कुतः? मध्यमग्रामे तारनिषादात्परस्य स्वरस्यासंभवादेव ; षड्जग्रामे तु तारपञ्चमात्परयोर्धैवतनिषादयोः संभवे, शक्तौ च सत्यामपि तत्र प्रयोगे रक्तेरभावादिति ॥ **अर्वाक्त्विति** । अर्वाङ् न्यूनतारावधित्वेनोक्तयोर्निषादपञ्चमयोरधस्तात्तारे स्थितेषु यस्य कस्यचिदवधित्वे तु कामचारः, गातुरशक्तयेच्छया वा प्रवर्तनम् । **तारे लुप्तो ऽपि गण्यत** इति । तारे तारव्यवस्थाविषये । चतुर आरोहेदित्यत्र चतुर्षु मध्ये प्रयोगलक्षणवशादेकस्य स्वरस्य लोपे सत्यप्यारोहगणनायां सो ऽपि गृह्यते । नन्दयन्त्या जातेरपि मध्यमग्रामीणत्वात्तारव्यवस्थायां चतुःस्वरारोहे तारमध्यमस्य प्रारम्भावधित्वे प्राप्ते, तदपवादत्वेन तारषड्जस्य भरतादिमतात्परावधित्वं रुद्रटादिमतात्पूर्वावधित्वं च विहितमित्यभिसंधाय तन्त्रेणाह—**आतारषड्जमिति** । परावधित्व आ तार-

# MANUSCRIPTS NOTES

## ĀTREYA SMṚTI

BY A. N. KRISHNA AIYANGAR, M.A., L.T.

THE dharma s'āstra of Atri is to be found in several versions, as has been pointed out by Professor Kane in his survey of dharma literature.[1] Of the printed versions available to us the *Dharma S'āstra saṅgraha* (1876) edited by Jivānanda Vidyāsāgara is the earliest. This contains three works under the name of Atri.

1. *Laghu-atri-Samhitā*—in six chapters (pp. 1-12).
2. *Atri-samhita*, pp. 13 to 46 (in the same volume) without any division into cantos or chapters, but on a rough calculation running into nearly 400 verses.
3. *Vṛddhātri Samhitā* (pp. 47-59). This consists of five chapters, the fourth chapter having considerable prose passages, on Rahasya prāyas'citta.
4. *Atri Samhitā*.—A code of Dharma in 391 stanzas with Bengali translation as part of the *Ūnavims'atri-Samhitā* (pp. 1-24) Calcutta, 1903.
5. The Dharma S'astra Text, (1908) Vol. I by Manmatha Nath Dutt contains an *Atrisamhitā* (pp. 181-214) with 391 verses.

On comparison it is found that numbers 2, 4 and 5 are identical works.

6. The *Atrisamhitā* (pp. 9 to 27 of the *Smṛtīnām-samuccaya*) in the Ānandās'rama Sanskrit Series (1905) is in 400 verses and is the same as 2, 4 and 5.
7. *Atri-samhitā*, a code in 391 verses—with Hindi translation was published in Calcutta in 1911 along with *Hārita smṛti*. This *Atri samhitā* seems to the same as 2, 4, 5 and 6.

[1] *History of Dharma S'astra*, Vol. I, sect. 16.

8. The *Atri-Smṛti* (pp. 28-34 in the same place as No. 6) consists of 9 chapters of which chapters 4, 7 and 8 are mainly in prose. The concluding verses of chapter 1 are identical with the concluding verses of the *Vṛddhātreya-smṛti* (chapter 1) mentioned under No. 3.

9 and 10. The *Atri-Smṛti* found in the *litho*-edition of Benares (1872) and in the *Aṣṭādas'a-smṛtayaḥ* published by the Venkateswar Steam Press, Bombay (1923), are identical with Nos. 2, 4, 5, 6 and 7.

That Atri is a very ancient writer needs no further proof than his name being cited with authority by Manu, Yājñavalkya and Āpastamba.[2] The existence of so many versions must partially explain the difficulty in locating all the verses under Atri in the smṛti-digests.

The Adyar Library has a single manuscript copy of the *Ātreya Smṛti* bearing Shelf No. 33. E. 1. It is a palm-leaf manuscript in grantha character and consists of 53 folia. Its size is 18" by 1 2/5" and has an injured appearance. Portions of the manuscript have been eaten away in the middle, on one side. The average lines per page ranges between 5 and 7. In this manuscript, besides the *Ātreya Smṛti* the smṛtis of S'ātātapa, Bṛhaspati, Samvarta, Hārita, Dakṣa and Vyāsa are also found. The *Ātreya Smṛti* begins on folio 45b and continues upto 47a. From the colophon it would appear that the work is complete.

It begins:

*Asnātās'ī malam bhuṅkte hyajapī pūyas'oṇitam* I
*Ahutāsī kṛmim bhuṅkte hyadāta viṣamas'nute* II
*Caturas'ram brāhmaṇasya trikoṇam kṣatriyasya tu* I
*Vais'yasya vartulam caiva s'ūdrasyābhyukṣaṇam tathā* II

This and the succeeding portions correspond to the fifth chapter of the *Vṛddhātrisamhitā* mentioned under No. 3. At the same time a closer examination of the manuscript with the printed version has revealed certain important features, to justify not only

[2] *Āpastamba smṛti*, (p. 5) edited by me in this *Bulletin* commencing from Vol. V, part 3 and running serially.



a separate notice of the manuscript but even to print it as it is. There are several new verses found in this version. Correspondingly some of the verses found in the printed version have also been omitted by the manuscript. A detailed study of all the versions of the dharma literature under the name of Atri is under preparation.

There are four manuscripts of this smṛti in the India Office Catalogue which correspond to our manuscript with the name *Ātreya Smṛti*[3] In No. 1308 the last chapter begins with the same verse as our manuscript *Asnātās'ī* etc. All the others begin only with the next verse *Catuṣkoṇam brāhmaṇasya*. No. 1308 of Eggeling has six chapters whereas the *Vṛddhātri samhitā* of Jīvānanda contains only five chapters. It appears that what is found as chapter 5 in No. 1308 of Eggeling is additional matter when considered in relation to the printed version of Jīvānanda.

# आत्रेयस्मृतिः

हरिः ओम

अस्नाताशी मलं भुङ्क्ते ह्यजपी पूयशोणितम् ।
अहुताशी कृमिं भुङ्क्ते ह्यदाता विषमश्नुते ॥ १ ॥
चतुरश्रं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य च ।
वैश्यस्य वर्तु(ल)श्चैव शूद्रस्याभ्युक्षणं तथा ॥ २ ॥
ब्रह्मा विष्णुश्च रुद्रश्च श्रीहुताशन एव च ।
मण्डलान्युपभुञ्जन्ते तस्मात्कुर्वीत मण्डलम् ॥ ३ ॥
यातुधानाः पिशाचाश्च क्रूराश्चैव तु राक्षसाः ।
ह(र)न्ति रसमन्नस्य मण्डलेन विवर्जितम ॥ ४ ॥
गोमयं मण्डलं कृत्वा भोक्तव्यमिति निश्चितम् ।
यस्त्यक्त्वा भुवि तच्चान्नं भुक्त्वा चान्द्रायणं चरेत् ॥ ५ ॥
[4]भूम्यां पादौ प्रतिष्ठाप्य यो भुङ्क्ते वाग्यतः शुचिः ।

[3] Eggeling, Nos. 1309 to 1312.
[4] Eight lines from here are missing in the printed version edited by Jīvānanda-*Vṛddhātrisamhitā*, mentioned as No. 3 in p. 307.

भोजने भोजने विप्र: त्रिरात्रफलमश्नुते ॥ ६ ॥
आसनारूढपादस्तु ब्राह्मणो यस्तु भुञ्जति ।
मुखेन धमितं चान्नं तुल्यं गोमांसभक्षणे ॥ ७ ॥
आप: पाणिनखाग्रस्था आचामेद्ब्राह्मणो न तु ।
पिबेद्यदि सुरापानमित्येवं मनुरब्रवीत् ॥ ८ ॥
घृतं वा यदि वा तैलं ब्राह्मण्या नखनि:सृतम् ।
अभोज्यं तद्द्विजातीनां भुक्त्वा चान्द्रायणं चरेत् ॥ ९ ॥
[5] हस्तदत्तास्तु ये स्नेहाल्लवणव्यञ्जनानि च ।
दातारं नोपतिष्ठन्ति भोक्ता भुञ्जीत किल्बिषम् ॥ १० ॥
[6] भुक्तोत्तरे यदा विप्र: आर्द्रपाणिस्तु गच्छति ।
लक्ष्मीर्बलं यशस्तेज: आयुष्यं चास्य हीयते ॥ ११ ॥
[7] अभोज्यं ब्राह्मणस्यान्नं वृषलेन निमन्त्रितम् ।
ब्राह्मणान्नं ददच्छूद्रो शूद्रान्नं ब्राह्मणो ददत् ॥ १२ ॥
उभावेतावभोज्यान्नौ भुक्त्वा चान्द्रायणं चरेत् ।
[8] उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्त: कथञ्चन ॥ १३ ॥
भूमौ निधाय तद्द्रव्यं . . . . ज शुचि: ।
स्पृशन्ति बिन्दव: पादौ य आचामयत: परान् ॥ १४ ॥
न तैरुच्छिष्टभाव: स्यात्तुल्यास्ते भूमिगै: सह ।
[9] शावे शावगृहं गत्वा श्मशाने चान्तरे(थवा) ॥ १५ ॥
. . . . दूरस्थोप्यशुचिर्भवेत् ।
अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत् ॥ १६ ॥
संवत्सरे व्यतीते तु स्पृष्ट्वा त्वापो विशुद्ध्यति ।
[10] निर्दशं ज्ञातिमरणं श्रुत्वा पु(त्रस्य जन्म च) ॥ १७ ॥

[5] Corresponds to V, 8, *Vṛddhātrisaṃhitā*.
[6] *Ibid*, two lines are omitted.
[7] V, 9ff.
[8] V, 18—19.
[9] Corresponds to V, 27.
[10] *Ibid*, two lines omitted.



सवासा जलमाप्लुत्य शुद्धो भवति मानव: ।
[11] अशुद्धं स्वयमप्यन्यं शुद्धस्तु यदि संस्पृशेत् ॥ १८ ॥
विशुद्ध्यत्युपवासेन भुङ्क्ते कृच्छ्रेण सद्विज: ।
मृण्मयानां च पात्राणां प्रदाहाच्छुद्धिरिष्यते ॥ १९ ॥
स्नेहादिसंप्रयुक्तानां त्याग एव विधीयते ।
[12] जातसूतिकमुत्पन्नं पश्चात्प्रेतस्य सूतके ॥ २० ॥
उभे समं वा जायेत प्रेताहाच्छुद्ध्यते द्विज: ।
सूतके मृतके चैव मृतके चैव सूतके ॥ २१ ॥
तस्मात्संघातशौचे तु मृताशौचेन शुद्ध्यति ।
सूतकाद् द्विगुणं शावं शावाद्द्विगुणमार्तवम् ॥ २२ ॥
आर्तवादद्विगुणं सूतिस्ततोऽपि शवदाहक: ।
अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा ॥ २३ ॥
अज्ञाति: सलिलं स्पृष्ट्वा घृतं प्राश्य विशुद्ध्यति ।
[13] रात्रिं कृत्वा त्रिभागं तु द्वौ भागौ पूर्व एव च ॥ २४ ॥
उत्तरांश: प्रभातेन युज्यते मृतसूतके ।
ऋतुं पश्येत्तु पूर्वन्तु वारे क्रूरे वृणं स्मृतम् ॥ २५ ॥
स्नात्वेन्द्रव्रतमादाय देवताभ्यो निवेदयेत् ।
अपूपं लवणं मुद्गं गुडमिश्रं तथा हवि: ॥ २६ ॥
दद्याद्ब्राह्मणपत्नीभ्यो निशिभोजनमेव च ।
चतुर्थेऽहनि कर्तव्या ऋतुशान्तिस्तु यत्नत: ॥ २७ ॥
पुण्याहं वाचयित्वा तु होतव्यं शुद्धिरूच . . ।
[14] ऋतुस्नातां तु यो भार्यां शुचिवस्त्रामलङ्कृताम् ॥ २८ ॥
भोजयेद्धुतशेषं तु जपित्वाष्टोत्तरं शतम् ।
ब्राह्मणान्भोजयेच्चैव वाचयेत् स्वस्तिवाचनम् ॥ २९ ॥
तत:(पुत्र)मवाप्नोति तेजस्विनमनामयम् ।

[11] Corresponds to V, 29 ff.
[12] Two lines are omitted.
[13] Corresponds to V, 39.
[14] Four lines are omitted.

विवाहे वितते तन्त्रे होमकाल उपस्थिते ॥ ३० ॥
कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिकाः ।
स्नापयित्वा तु तां कन्यां तर्पयित्वा हुताश(नम्) ॥ ३१ ॥
(यु)ञ्जानामाहुतिं कृत्वा ततः कर्म प्रवर्तयेत् ।
[15] प्रधानहोमे निर्वृत्ते कुमारी यदि सार्तवा ॥ ३२ ॥
त्रिरात्रेऽपगते पश्चात् शेषकार्यं समापयेत् ।
[16] आर्तवा यदि चण्डाली(मुच्छि)ष्टा संप्रपश्यति ॥ ३३ ॥
आस्नानकालं नाश्नीयात् आसीना वाग्यता बहिः ।
पादकृच्छ्रं ततः कुर्यात् ब्रह्मकूर्चं ततः पिबेत् ॥ ३४ ॥
ब्राह्मणान्भोजयेत दद्यात् विप्राणामनुशासनात् ।
ब्राह्मणानां करैर्मुक्तं तोयं शिरसि धारयेत् ॥ ३५ ॥
सर्वतीर्थफलाद्विप्रो विशिष्टक्रतुरुच्यते ।
[17] रजस्वलायां प्रेतायां संस्कारविधिमाचरेत् ॥ ३६ ॥
ऊर्ध्वं त्रिरात्रात्प्रेतायां शवधर्मेण दाहयेत् ।
या मृता सूतिका नारी या मृता च रजस्वला ॥ ३७ ॥
पञ्चगव्यैः पावमान्यैः शवशुद्धिविधिः पुनः ।
रजस्वले च द्वे स्पृष्टे चतुर्वर्णस्य यास्त्रिया ॥ ३८ ॥
अतिकृच्छ्रं चरेत् पूर्वं क्रमेण तु विधीयते ।
रजस्वलायां स्नातायां पुनरेव रजस्वला ॥ ३९ ॥
विंशतेर्दिवसादर्ध्वं त्रिरात्रमशुचिर्भवेत् ।
[18] अनाथं ब्राह्मणं प्रेतं यो वहेत दहेत वा ॥ ४० ॥
. . . . . . . . . पूर्वं लभेत सः ।
अभ्यागतः स्वयं विष्णुरतिथिश्च महेश्वरः ॥ ४१ ॥

[15] One line omitted.
[16] Corresponds to V, 52.
[17] Corresponds to V, 59.
[18] From here चन्द्र सूर्यग्र—these verses are not found in the printed version.



वैश्वदेवः स्वयं ब्रह्मा ये तु भुञ्जन्ति ते त्रयः ।
वैश्वदेवान्तिके प्रा . . . . . पूजयेत् ॥ ४२ ॥
स चण्डालत्वमाप्नोति सद्य एव न संशयः ।
समिद्भारसहस्राणां घृतकुम्भशतानि च ॥ ४३ ॥
अतिथिर्यस्य भग्नाशो तस्य होमो निरर्थकः ।
(कपिला) क्षीरपानेन ब्राह्मण्या गमनेन च ॥ ४४ ॥
शूद्रो वेदाक्षरेणैव निष्कृतिर्नैव विद्यते ।
अङ्गुल्या दन्तकाष्ठश्च प्रत्यक्षलवणं तथा ॥ ४५ ॥
मृत्तिकाभक्षणं चैव तुल्यं गोमांसभक्षणे ।
सप्तम्यां तु यदा भानुः स्वयं भुञ्जीत भास्करः ॥ ४६ ॥
एकविंशत्यमावास्यां तत्तदालभते फलम् ।
उपानहौ यानछत्रं ब्राह्मणेभ्यो ददाति यः ॥ ४७ ॥
सत्यमश्वरथं प्राप्तः यन्नष्टं तन्नदीयते ।
[19] चन्द्रसूर्यग्रहे स्नात्वा दद्यात्स्नात्वा तु मुक्तयोः ॥ ४८ ॥
अमुक्तयोरस्तगयोः दृष्ट्वा स्नात्वा परेऽहनि ।
यस्यैव जन्मनक्षत्रे ग्रसितौ चन्द्रसूर्ययोः ॥ ४९ ॥
व्याधि प्रवासमृत्युश्च दुरितञ्च भवेत्क्षयम् ।
तस्माद्दानञ्च होमं च देवार्चनजपांस्तथा ॥ ५० ॥
कुर्यात्तस्मिन्दिने यत्नं तस्य शान्तिर्भविष्यति ।
[20] सर्वं गङ्गासमं तोयं राहुग्रस्ते दिवाकरे ।
सोमेप्येवं समं तोयं नद्यां स्नानं समाचरेत् ॥ ५१ ॥

इत्यात्रेय धर्मशास्त्रं संपूर्णम्

[19] Corresponds to V, 64.
[20] There are three additional lines in the printed version between this and the succeeding line.

# VIRŪPĀKṢAYAJVAN: HIS WORKS AND PROBABLE DATE

BY H. G. NARAHARI, M.A.

IN the Adyar Library is found the only known MS.[1] of the *Nṛsiṁha-vṛttamālā*,[2] a treatise on Sanskrit Metrics which serves also the dual purpose of a prayer to *Nṛsiṁha*, the Man-Lion incarnation of Viṣṇu. It bears the Shelf-number XXIII. G. 45 and is noticed on p. 39 a of the Second Part of the Library Catalogue. It is a palm-leaf MS., written in Telugu characters and consists of 41 folia. It is written in a small cursory hand and contains 7 lines in a page on an average. Though complete, such is the heavy damage wrought on it by worms that considerable portions of the text are eaten away.

The full name of its author is *Virūpākṣayajvan* as is evident from its colophons which run:

*Iti s'rīmaudgalyarāmacandrādhvarīndranandana virūpākṣayajvakṛta . . . adhikāraḥ*. That his father's name is *Maudgalya Rāmacandra* is also clear from this colophonic evidence.

There is a section in the work (foll. 28b-30b) on metres current in the Āndhra country *(Āndhrades'abhāṣāprasiddhamātrāvṛttapaddhatiḥ)*. This is a special feature of the work which is otherwise concerned only with metres in Sanskrit Literature. This fact indicates that the author is an *Āndhra* by birth. The affix *Maudgalya* attached to his name shows that he belongs to that *gotra*. Perhaps it may refer also to the town *Mudgal* in the Hyderabad Presidency, which is known for its famous *Nṛsiṁha* temple.

*Virūpākṣayajvan* is the author also of a commentary, called *S'āradas'arvarī*, on the *Kuvalayānanda* of Appayya Dīkṣita. This

[1] I am unable to say whether this work is the same as the *Nṛsiṁhavṛtta* (*Mysore* 291), cited by M. Krishnamachariar (*Classical Sanskrit Literature*, p. 911).

[2] This name occurs at the beginning of the work as well as in many sectional colophons of it. In the concluding colophon, the work is called *Nṛsiṁhavṛttamalika*; it is also called *Narasiṁhavṛttamala* (fol. 28b), *Narasiṁharatnamāla* (fol. 15b) and *Nṛsiṁharatnamala* (foll. 18a, 22a).



commentary has remained till now almost inaccessible for study. In fact, for a long time it was not known that the *S'āradas'arvarī* is a commentary on any work.

Thus, though *Oppert*[3] found an MS. of this work in the Library of *Raghubhaṭṭa* in (S'rī) *Bhaṭṭugosvāmivaṭṭāra*, Tanjore, he was ignorant of its real contents. The MS. of the work as such should have been inaccessible to him when he described[4] the work as a mere '*Kāvya*.' For his knowledge of this work, *Aufrecht* relies only on this MS. of *Oppert* and his description of it, with the result that, in his *CC.* (I. 642a), he calls it also a mere '*Kāvya*' and omits its name entirely in the course of his enumeration[5] of the commentaries on the *Kuvalayānanda*. *Hultzsch*[6] seems to be the first to recognize more or less the real nature of the *S'āradas'arvarī*. In the collection of Jambunāthabhaṭṭa, a Marāṭha Brahmin of Tanjore, he was able to find *two* complete MSS. of this work. One of these (No. 1617) is described[7] by him as a commentary on the *Candrāloka* by *Virūpākṣa*. This MS. contains the simple colophon: *Iti srī virūpākṣakṛtiḥ s'āradas'arvarī sampūrṇā*. Nothing more is given about the author in this MS.

A decayed and incomplete MS. (No. 5221)[8] of this work, full of lacunae and obtained from the same source, is in the Sarasvati Mahal Library, Tanjore. The final colophon of this MS. points out that this *Virūpākṣa* is the son of *Mudgala Rāmacandrādhvarīndra*:

> *Iti s'rī mudgalarāmacandrādhvarīndranandana s'rī virūpākṣakṛtiḥ s'āradas'arvarī sampūrṇā.*

This MS. seems to have been copied by *Veṅkatasudhī(-bhaṭṭa)*[9] on Thursday, the first day of the bright-half of the month of *Māgha* in the encyclical year *Vijaya*:

[3] *List of Sanskrit MSS. in Private Libraries of Southern India*, II. 8095.
[4] *Ibid.*, p. 474.
[5] CC. I. 113a; II. 22 ff.; III. 25a.
[6] *Reports on Sanskrit MSS. in Southern India*, III. 5.
[7] *Ibid.*, p. 56.
[8] *Descriptive Catalogue*, IX, 4038.
[9] The title page of the MS. seems to contain the inscription *Pustakam idam Veṅkatabhaṭṭasya* (*Ibid.*).

*Vijayābde site māghe prathamāyāṁ guror dine* |
*Vyalikhad veṅkaṭasudhīr enam s'āradas'arvarīm* ||

Jambunāthabhaṭṭa's Library contained a fourth MS. also of the same work. This seems to be the best of all the available MSS. of the *S'āradas'arvarī*, at least in the collection of Jambunāthabhaṭṭa. I was able to find this MS. in the Library of the late Pandit Subrahmanya Sastriar of Tanjore, now in the custody of Mr. K. Ramachandra Sarma, a colleague of mine in the Adyar Library, to whom my thanks are due not only for drawing my attention to this MS. with him, but also for having allowed me its use. This MS. is in paper and consists of 58 folia. Written in Devanāgarī in a medium hand, it contains 8 lines in a page: Size, 10½"×4½". Except for the absence of a few letters on fol. 58a the MS. can be said to be free from any lacunae. Its colophon is identical with that of the MS. in the Sarasvati Mahal Library, Tanjore, though it is copied by a different person. The scribal note at the end of this MS. runs:

*S'āke 1780. Kālayuktisaṁvatsaramārgas'īrṣas'ukladas'amyāṁ likhitam idaṁ vis'vanāthavyāsena. Pañcanadīs'ārpaṇam astu.*

The MS. was therefore copied in A.D. 1858 or on the tenth day of the bright-half of the month of *Mārgas'īrṣa* in the encyclical year *Kālayukti* by *Vis'vanāthavyāsa.*

A perusal of this MS. shows that the work is a commentary on the *Kuvalayānanda* rather than on the *Candrāloka.*[10] This is supported by the following verses[11] in the work itself:

*Vidyāyāḥ kāraṇam vighnavāraṇam turagānanam* |
*S'as'āṅkabhṛt padmayonimukheḍyantam namāmy aham* ||
*Ghanāmbhodanirāsena candrālokaprabhodhinīm* |
*Kurmaḥ kuvalayānandasiddhyai s'āradas'arvarīm* ||
*Kurvanti svaccham antar jaḍam api ca ghanāmbhodavārtām haranti*

[10] Hultzsch, *loc. cit.*; Tanjore Descriptive Catalogue, *loc. cit.* The only defence for this view seems to be that the *Kuvalayānanda* of *Appayya Dikṣita* is no more than an adaptation of the *Candraloka.*

[11] My MS. (*foll.* 1 b, 58a).



*Candrālokaprabodhiny akhilakuvalayānandasandhānas'īlā* |
*Saṅkalpāt sakalā (bhṛtkṛ)*[12] *tapadas'irasas' s'rīvirūpākṣanāmnaḥ*
*Prādurbhūtaprakās'ā jagati vijayatām s'āradī s'arvarīyam* ||

On fol. 8 of this MS. of the *S'āradas'arvarī*, the author cites a verse from his *S'aṅkaravijaya* in illustration of the *samastarūpaka.* The passage in question runs:

*Idam vyastarūpakam. Samastarūpakam yathā madīye S'aṅkaravijaye—*
*Salilārdrasuṣūkṣmakañcukī vivṛtottuṅgakucābjakos'ayoh* |
*Patitaṁ sa mano madhuvrataṁ punar āhartum alaṁ na subhruvām* ||

We have thus *S'aṅkaravijaya* as the name of another work of *Virūpākṣa.* I have not been able to discover any MS. of this work. It is not known to Aufrecht. Nor am I able to see any reference to it in any of the available Catalogues.

The information that is so far available about *Virūpākṣayajvan* is not sufficient to be of help in determining his date with any degree of accuracy. The citations in his works are usually from ancient writers and works like Kālidāsa, Bhāmaha, Daṇḍin, Māgha, Mahānāṭaka, Ratnāvalī and the Gītagovinda. These are of no help, because the fact that he lived later than the 16th cent. A.D. needs no proof. That his *S'āradas'arvarī* is a commentary on the *Kuvalayānanda* of Appayya Dikṣita (1550 A.D.)[13] should give 1600 A.D. at least as his *terminus a quo.* One of the MSS. of the *S'āradas'arvarī* was copied, as stated already[14], in A.D. 1858; this phenomenon should give 1800 A.D. as the *terminus ad quem.* The date of *Virūpākṣayajvan* can thus lie between the two broad limits, A.D. 1600 and A.D. 1800.

[12] Both my MS. as well as *Tanjore* 5221 have *lacunae* here. I fill up the gap with the help of *Hultzsch* 1617.

[13] S. Dasgupta, *History of Indian Philosophy*, I. 418.

[14] *Supra*, p. 316.

# REVIEWS

(1) *Paramārthacintāmaṇi* by Y. Subrahmaṇya S'arma; Adhyātmaprakās'a Office, Holenarasipur, Mysore State, 1941; pp. xxiv, 271; Price Rs. 2-12-0.

(2) *Upaniṣattugaḷa Modalane Paricaya* by Y. Subrahmaṇya S'arma; Adhyātmaprakāsa Office, Holenarasipur, Mysore State, 1941; pp. vi, 54; Price not stated.

For many a popular exposition of Advaita in Kannada, English and Sanskrit, the name of Mr. Y. Subrahmaṇya S'arma is well-known to the world of Indian Philosophy. The two Kannada books under review only add to the stock of his useful contributions.

In the first of these he attempts to enunciate what he calls a new theory of metaphysics, quite his own. It is based on no Sanskrit original, but derives nevertheless support from the Upaniṣads and the many commentaries thereon. The book is divided into six chapters; in the first chapter, the different systems of Indian Philosophy are analysed, their limitations pointed out, and the view maintained that it is only the Vedānta system that is of real help in the quest after *Paramārtha*; in the second is elaborated what the author calls the *Avasthātraya* method in arriving at *Paramārtha*; in the three succeeding chapters, the fundamental nature of *Ātman* which distinguishes it from *Anātman*, is discussed, and special emphasis is laid on the three aspects of *Ātman, viz., Sat, Cit* and *Ānanda*. In the concluding chapter, the author sums up his position stating that the *Avasthātraya* method is the only means at arriving at *Paramārtha*, and that the Vedānta system which propounds this method is only the culmination of the wisdom of the Upaniṣads.



The key-note of the book, briefly put, is that the highest truth (*Paramārtha*) consists in the knowledge of the immutability of the Soul in its several states (p. 13), and, to attain this knowledge, one has to examine with care the three states of the Soul, wakeful (*jāgrat*), dreaming (*svapna*) and sleeping (*suṣupti*). A conclusion like this cannot fail to fall ajar in the ears of any student of philosophy, for it has the merit neither of novelty nor of attractiveness. The doctrine of the permanence of the individuality of the Soul is the starting-point of all the systems of philosophy, and the Vedānta can claim no special rights for it. Also, mere knowledge of the unchangeable character of the Soul leads one no where; and if this should be the aim of all philosophy, few people would care to make a study of it. Philosophy would then be barren, and philosophic endeavour a futile exertion. Philosophy, at least in India, is never tolerated as mere gymnastics of the intellect. It is always expected to be of vital benefit to the seeker in bringing him the *summum bonum* of his existence. As said the great Kumārila:

> *Sarvasyaiva hi s'āstrasya karmaṇo vāpi kasya cit* |
> *Yāvat prayojanam no'ktam tāvat tat kena gṛhyate* ||
> (*S'lokavārttika*, I.12)

The second book is less adventurous in character. It is a sort of *prolegomena* to the study of the ten Upaniṣads found valuable by the systematists of Vedānta. It consists of six sections; the first, which is introductory in character, deals with the nature of the Upaniṣads and their importance; in the four succeeding sections we are introduced to the ten Upaniṣads themselves; the first of these gives the thirteen allegorical stories contained in these Upaniṣads, the second, the chief doctrines contained in them, the third, some of the means of self-realization mentioned in these texts, and the last, the many illustrations used in the Upaniṣads in the course of their teaching. The last section is the Conclusion.

This book will be found useful by all those who seek to understand the Upaniṣads in the light of Advaitic interpretation. It cannot serve, however, as a guide to those who would like to understand the Upaniṣads as they are, and without the taint of later interpretation. A critical study of the Upaniṣads shows that they cannot be described as *entirely* philosophical texts, and that there is much in them that is unphilosophical. Nor is it right to imagine that they have a single, definite philosophical doctrine to teach. They are only a conglomeration of diverse philosophical ideas which, singly or collectively, help these texts to form the foundation of each later system of Indian Philosophy.

Defects apart, these two books are a distinct addition to existent philosophical literature in Kannada. Written in a language which is easy, clear and simple, they are accessible to the layman to whom they are primarily intended. The scholar will find in them much food for thought.

H. G. NARAHARI

